R
S
V
L
00397
L78/XXXI
999

# Rashtriya Sanskrit Vidyapeetha Library

TIRUPATI - 517 507 (A.P.)

Acc. No. ______________ Call No. ______________.

This book should be returned on or before the date last marked below or otherwise fines will be levied at the rate of 0-15 Ps. per day.

| DUE DATE OF RETURN | DUE DATE OF RETURN | DUE DATE OF RETURN |
| --- | --- | --- |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

997

997

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 1

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ हेविळम्बि - कन्या [सं १

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

SEPTEMBER 1957

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription    Rs. Two only.

Do. With Sastraic Supplement    Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari*,
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः — श्रीगीतार्थदीपः । २२५—२३२

[illegible]
[illegible]
[illegible]
17, 18, 19

३२९ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ।
यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

३३० अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

अथ कैवल्यं प्राप्तानामप्यवरोहाभावादपुनरावृत्तिमाह श्लोकद्वयेन — तस्मात् - पूर्वप्रकृतात्, अव्यक्तात् - अचेतनप्रकृतिरूपात्, परः - पुरुषार्थतयोत्कृष्टः, अन्यः - ज्ञानैकाकारतया विसजातीयः, अव्यक्तः - केनचित्प्रमाणेन न व्यज्यत इत्यव्यक्तः, प्रमाणान्तराणि हि साधारण्येन तत्प्रतिपादकानि ; अतोऽयमात्मा स्वसंवेद्यस्वासाधारणाकारः, सनातनः भावः - चिरन्तनः पदार्थः, यः - एवंभूत आत्मा, स तु सर्वेषु भूतेषु - वियदादिषु सकारणेषु सकार्येषु महाभूतेषु, नश्यत्सु - विनाशं गच्छत्सु सत्सु, न विनश्यति - यथा तिलेषु दह्यमानेषु तदनुप्रविष्टं तैलमपि दह्यते नश्यत्पदार्थानुप्रवेशवशात्, तथाऽयं तत्र तत्र स्थितोऽपि न विनाशं गच्छति, किन्तु अव्यक्तः अक्षरः इति उक्तः — *'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते' इत्यादिषु क्षरणाभावात् चक्षुरादिकरणागोचरत्वाच्च अक्षर इति अव्यक्त इति चोक्तः । वक्ष्यमाणप्रकरणस्थत्वेऽपि 'उक्तः' इति भूतनिर्देशः §'निहताः पूर्वमेव' इतिवत्सत्सङ्कल्पारोहादुपपद्यते वा जीवम्, परमां गतिम् आहुः - प्रकृष्टं प्राप्यं वदन्ति, यम् - एवंभूतं स्वरूपेणावस्थितम् प्राप्य - गत्वा, न निवर्तन्ते - न संसरन्ति, तत् परमं - प्रकृष्टं, धाम - प्रकाशः, ज्ञानमिति यावत्, मम - मच्छेषभूतम् । यद्यपि 'अपरेयम्' इत्यादिना प्रागेव स्वशेषत्वमुक्तम् ; तथापि समष्टिचेतनमात्रविषयत्वं तत्र प्रतीयते ; इह तु मुक्तस्यापि स्वशेषत्वमुच्यत इत्यपौनरुक्त्यम् । परिशुद्धजीवप्राप्तिरप्यवरोहणाभावादपुनरावृत्तिरूपेति भावः ।

* गी. १२-३. § गी. २-२२

ப்ராஹ்மருத்ராதி ஐச்வர்யமனைத்தும் அழியும் தன்மை யுடையதன்றோ, கைவல்ய ப்ராப்தி என்பது அவ்வாறன்று. கைவல்யம்பெற்றவன் ஸம்ஸரிப்பதில்லை. அதிலிருந்து ப்ராஹ்ம மாநுபவ ரூபமான மோக்ஷம் பெற்றுவிடுகிறான். கைவல்ய தசையில் பரிசுத்தமான ஆத்ம ஸ்வரூபமானது போக்யமா கின்றது. அது முன்கூறிய அசேதநத்தைப் பார்க்கிலும் உத்க்ருஷ்ட புருஷார்த்தமாய் ஞாநாநந்த லக்ஷணமாகையாலே விலக்ஷணமாயுமுள்ளது. ஸ்வயம்ப்ரகாசமானது. நித்யம், ஆகா சாதி மஹாபூதம் அழியும் காலத்திலும் அதன் கார்யமான சரீ ரத்திலுள்ள இவ்வாத்மாவானது அழிவதில்லை. இந்திரியங்கள் முதலியவற்றால் அறிய முடியாமையாலும் அழிவில்லாமையா லும் அதை அவ்யக்தமென்றும் அக்ஷரமென்றும் சொல்லு கிறார்கள். அது ஐச்வர்யகதியைப் பார்க்கிலும் உயர்ந்தகதி. அவ்வநுபவம்பெற்றபிறகு ஸம்ஸரிப்பதில்லை. ப்ரக்ருதி ஸம்பந் தத்தினால் அழுக்கடைந்தொளியிழந்த ஸம்ஸாரி ஜீவனைப் பார்க்கிலும் முக்தாத்ம ஸ்வரூபமானது மயர்வற மதிநலம் பெற்று மேன்மையுடையது. 20, 21

३३१ पुरुषस्स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तस्स्थानि भूतानि येन सर्वमिदं ततम्॥ २२॥

ज्ञानिनः प्राप्यं तु ऐश्वर्यकैवल्यफलद्वयादत्यन्तविलक्षणमित्याह- हे पार्थ अर्जुन, भूतानि - वियदादीनि सकार्यकारणानि, यस्य - सर्वेषां प्रशासनेनान्तःप्रविश्य धारकतया प्रसिद्धस्य पुरुषोत्तमस्य, अन्तस्स्थानि - अन्तर्गतानि, येन - पुरुषेण, इदं सर्वं - जगत्, ततम् - व्याप्तम्, सः परः पुरुषस्तु - पुरुषसूक्तादिप्रसिद्धः पुरुषोत्तमस्तु, अनन्यया - न विद्यते अन्यः उपायतया प्राप्यतया च यस्यां सा अनन्या तया तदेकान्तयेति यावत्। भक्त्या स्नेहपूर्वानुध्यानेन, लभ्यः - प्राप्यः।

ஓ அர்ஜுனா, சேதநாசேதநாத்மகமான ப்ரபஞ்சமனைத் தையும் புருஷோத்தமனான ஸ்ரீகாந்தன் உட்புகுந்து நியமனம்

செய்து வருகின்றான். அத்தகைய எம்பெருமானை அவனையே உபாயமாகவும் ப்ராப்யமாகவும் கொண்டு பிரபிரியபக்தியினால் அடையவேண்டும். 22

२३२ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

अथ सप्तमाध्याये 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी च' इति प्रक्रान्तस्य पञ्चाग्निविद्यानिष्ठस्य जिज्ञासोः; ज्ञानिनश्च साधारणीमर्चिरादिकां गतिमाह– अत्र धूमादिमार्गकथनं हेयत्वार्थम्, अर्चिरादिमार्गोपदेशस्तु तदनुसन्धानार्थः । 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्ति' इति पञ्चाग्निविद्यानिष्ठस्य ब्रह्मनिष्ठस्य चार्चिरादिका गतिरश्रूयते । तयोरुपासने किञ्चिदस्ति विशेषः ; पञ्चाग्निविद्यानिष्ठस्तावत् परमात्मशरीरभूतस्वात्मोपासकः, ज्ञानी तु स्वात्मशरीरकपरमात्मोपासकः । अयमेव विशेष उदाहृतश्रुतौ विभागनिर्देशाभिप्रेतः । पञ्चाग्निविद्यानिष्ठस्य "जिज्ञासुः ज्ञानी" इति ज्ञानिव्यतिरेकश्च दर्शितोपासनभेदात् मध्ये स्वात्मानुभवविलम्बाच्च । ब्रह्मप्राप्तिस्तु द्वयोरप्यस्ति । अर्चिरादिगतिनिषेधस्तु ब्रह्मात्मकत्वानुसन्धानरहितस्वात्मोपासनविषयः । 'ये तु शिष्टास्त्रयो भक्ताः – सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक्' इति भारतोक्तिरपि आत्ममात्रानुभवसुखस्यास्थिरत्वादुपपद्यते । उत्तरोत्तरातिशयितपदप्राप्तावपि पूर्वपदभ्रंशमात्रात् च्यवनधर्मत्वमुच्यते श्रुतिस्मृतिषु - यथा प्रच्युतो वा एषोऽस्माल्लोकात्...' 'इन्द्रलोकात्परिभ्रष्टो मम लोकपरायणः' इत्यादि । अतो द्वयोरपि साधारणीहार्चिरादिगतिरुपदिश्यते–

'यत्र काले तु' इत्यत्र कालशब्दोऽहःप्रभृतिसंवत्सरान्तकालाभिमानिदेवताभूयस्तया मार्गस्योपलक्षणार्थः । हे भरतर्षभ, भरतश्रेष्ठ ! प्रयाताः - मृताः, योगिनः - ज्ञानिनः, पुण्यकर्माणश्च 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रात् योगिनश्च योगिनश्च योगिनः - इत्येकशेषः । यत्र काले (कालाभिमानिप्रचुरे)यस्मिन् मार्गे, अनावृत्तिं आवृत्तिं चैव - ज्ञानिनः अपुनरावृत्तिं पुण्यकर्माणः पुनरावृत्तिं च यान्ति, तं कालं - तं मार्गं वक्ष्यामि - उपदेक्ष्यामि ।

[ उद्यानपत्रिका XXXI-1

ஓ அர்ஜுனா! ஞானிகள் மரணமடைந்தால் அர்ச்சிராதி மார்க்கமும் மற்ற புண்யகர்மாக்கள் மரித்தால் தூமாதிமார்க்கமும் சாஸ்த்ர விஹிதமானது. முதல்மார்க்கத்தில் சென்றவர்களுக்கு ஸம்ஸாரதுக்கம் மறுபடி ஏற்படுவதில்லை. தூமாதிமார்க்கத்தால் சென்றவர்களுக்கு ஸம்ஸாரஸம்பந்தம் மறுபடியுண்டு, இந்த இரண்டு வழிகளையும் நீ அநுஸந்தானம் செய்வதற்காக உபதேசிக்கின்றேன். 23

२३३ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अत्र अग्न्यादिशब्दाः अग्न्यादिदेवतापराः । अग्निः ज्योतिः - अग्निरूपज्योतिः, अहः - दिवसाभिमानिनी देवता, शुक्लः - शुक्लपक्षाभिमानिदेवता, षट् मासाः मकरादिमिथुनान्ताः, उत्तरायणम् - उत्तरायणशब्दिताः, तदभिमानिदेवतेति यावत् । यत्र - यस्मिन् मार्गे, तत्र - तस्मिन् मार्गे प्रयाताः - मृताः, ब्रह्मविदः - ब्रह्मोपासकाः, जनाः ब्रह्म, गच्छन्ति - प्राप्नुवन्ति । उत्तरायणमिति संवत्सरादीनामुपलक्षणम् ।

'अर्चिरहस्सितपक्षानुदगयनाब्दमरुदर्केन्दून् ।
अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः ॥'

इति श्रीवरदगुरुभिस्तत्त्वसारे संगृहीतमिहानुसन्धेयम् ।

அக்னி, பகல், ஒளிநாள், உத்தராயணம், ஆண்டு, காற்று, ஸூர்யன், சந்திரன், வைத்யுதன் என்னும் மின்னல், தேவன், வருணன், இந்திரன், பிரமன் என்கிற பன்னிரண்டு தேவதைகளாகிய ஆதிவாஹிக புருஷர்களால் நடத்தப்படும் ப்ராஹ்மோபாஸகர்களுக்கு புநராவ்ருத்தியற்ற ப்ரஹ்மப்ராப்தி ஏற்படுகின்றது. 24

२३४ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥

अत्र योगशब्द उपायमात्रवाची । धूमादिमार्गसामर्थ्यात् पुण्यकर्मस्वरूपसम्बन्धिविशेषसिद्धिः । योगी - पुण्यकर्मनिष्ठः, धूमः - धूमाभिमानिनी देवता, रात्रिः - रात्र्यभिमानिनी देवता, तथा - उक्तप्रकारेण, कृष्णः - कृष्णपक्षदेवता, षण्मासाः दक्षिणायनम् - कटकादयो धनुर्मासान्ताः दक्षिणायनरूपाः, तदभिमानिदेवतेति यावत् । यत्र - यस्मिन्मार्गे, तत्र - तस्मिन् मार्गे, चान्द्रमसं - चन्द्रमसि भवं चान्द्रमसं, ज्योतिः तेजोरूपं फलम्, प्राप्य - भुक्त्वा, निवर्तते - फलक्षयात् पुनस्संसरति । अत्र धूमादिचतुष्टयकीर्तनं पितृलोकाऽकाशचन्द्राणामुपलक्षणम् ।

'धूमं रात्रिं च पक्षं तिमिरकलुषितं दक्षिणाऽवृत्तिमासान्
पश्चाल्लोकं पितॄणां गगनमपि सृतश्चन्द्रमस्येति कर्मी ।'

इत्यधिकरणसारावल्यां संगृहीतमिह भाष्यम् ।

*தூமம், இரவு, க்ருஷ்ணபக்ஷம், தக்ஷிணாயநம் ஆகியவற்றிற்கு அபிமானிகளான தேவதைகள் கொண்ட தூமாதிமார்க்கத்தினால் புண்யகர்மம் செய்பவன், பித்ருலோகம், ஆகாசம், சந்திரன் இவர்களை முறையே போய் அடைந்து புண்யகர்ம க்ஷயம் பிறந்தவாறே மறுபடி மனிதவுலகத்தை அடைகின்றான்.* 25

२२५ शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥ २६ ॥

उक्तमार्गद्वये श्रुतिप्रसिद्धिः प्रदर्श्यते- अत्र शुक्लपक्षकृष्णपक्षान्वयाद्वा शुद्ध्यशुद्धिविवक्षया वा गत्योश्शुक्लकृष्णशब्दोपचारः । जगतः ब्रह्मोपासने कर्मणि वाऽधिकृतस्य जनस्य, एते - पूर्वोक्ते, शुक्लकृष्णे - शुक्ला च कृष्णा च शुक्लकृष्णे, गती - सरणी, शाश्वते - प्रवाहरूपेणानाद्यनन्ते, मते हि - श्रुत्यभिप्रेते किल, * 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति' § 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति' इत्याद्या मार्गद्वये श्रुतयः । तयोः मार्गयोः एकया - शुक्लगत्या, अनावृत्तिं - अपुनरावृत्तिं, याति - प्राप्नोति, अन्यया - इतरया कृष्णगत्या, पुनः - भूयः आवर्तते - मनुष्यलोकमागच्छति ।

---

* छा. ५. २०-२        § छा. ५. २०-३

பரப்ரஹ்மோபாஸனம் செய்தவனுக்கு அர்ச்சிராதி மார்க்கமென்றும் புண்யகர்ம நிஷ்டனுக்கு தூமாதிமார்க்கமென்றும் இரண்டு கதிகள் நித்யங்களாய் ச்ருதிகளில் சொல்லப்பெற்றன. தூமாதிகதியானது ப்ரவாஹநித்யம் (மாறி மாறி முன்போல் வருவது) இவ்விரண்டு கதிகளுக்குள் அர்ச்சிராதி கதியால் சென்றவனுக்கு மறுபடி ஸம்ஸார ஸம்பந்தம் கிடையாது. தூமாதிமார்க்கத்தினால் சென்றவனுக்கு புநராவ்ருத்தியுண்டு. 26

३३६ नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

उपासनवत्परमपुरुषप्राप्त्यर्थं मार्गचिन्तनं अन्तकाले गन्तुरव्याकुलगमनार्थमपि भवतीत्याह - हे पार्थ ! अर्जुन ! एते - यथोक्ते, सृती - मार्गौ, जानन् - 'संसाराय एका, अन्या मोक्षाय' इति ज्ञानवान्, कश्चन योगी - कश्चिदपि योगनिष्ठः, न मुह्यति - हेयोपादेयमार्गद्वयविषये मोहं न प्राप्नोति । स्पष्टमार्गो भवतीति यावत् । हे अर्जुन ! तस्मात् - गतिचिन्तनस्य उक्तफलवत्त्वात्, सर्वेषु कालेषु - योगयुक्तः - गतिचिन्तनाख्ययोगेन युक्तः - सहितः, भव, 'योग' शब्दोऽत्र ध्यानमात्रविषयः गतिचिन्तनरूपं ध्यानविशेषमाह ।

ஓ அர்ஜுநா ! அர்ச்சிராதி தூமாதி என்கிற இவ்விரண்டு மார்க்கங்களையுமறிந்துள்ள யோகியானவன் அந்திமகாலத்தில் தான் செல்லவேண்டிய மார்க்கத்தில் ப்ரகாசம் பெறுகின்றான். ஆகவே எக்காலத்திலும் நீ கதிசிந்தனம் பண்ணுவாயாக. 27

३३७ वेदेषु यज्ञेषु तपस्सु चैव
दाने च यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥

ओं तत् सत् ।

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अक्षरपरब्रह्मयोगो नाम
अष्टमोऽध्यायः ।

---

इदं - सप्तमाष्टमाध्यायोदितं भगवन्माहात्म्यं, विदित्वा - सम्यगवधार्य, वेदेषु सम्यगधीतेषु, यज्ञेषु साद्गुण्येनानुष्ठितेषु, तपस्सु च सुतप्तेषु, दानेषु चैव सम्यग्दत्तेषु, एवमादिषु ; यत् पुण्यफलं - उत्तमलोकप्राप्त्यादिरूपं पुण्यस्य फलं, प्रदिष्टं - शास्त्रेणोपदिष्टम्. तत् सर्वं - फलजातम्, अत्येति - तृणवन्मन्यते, अत्येतीत्येतत् विवेकमूलविरक्त्यभिप्रायम् । अतिशयितफलवेदनं हि फलान्तरवैतृष्ण्यहेतुः । योगी - ज्ञानी सन्, आद्यम् - अनादि, परम् - उत्कृष्टम्, स्थानम् - श्रीवैकुण्ठरूपम्, उपैति च - प्रतिपद्यते च । अध्यायद्वयोदितभगवन्माहात्म्यज्ञानात् फलान्तरेषु वितृष्णः भगवदुपासको भूत्वा मुक्तिमेतीति तात्पर्यार्थः ।

इति श्रीगीतार्थदीपे अष्टमोऽध्यायः ।

---

இவ்வாறு ஏழாவது எட்டாவது அத்யாயங்களில் சொல்
லிய பகவந்மாஹாத்ம்யத்தை அறிந்தவன், அத்யயநம், தபஸ்,
தாநம், யஜ்ஞம் முதலியவற்றிற்குச் சொல்லிய ஐஹிகாமுஷ்மிக
புருஷார்த்தங்களைப் பொருட்படுத்தமாட்டான். அன்றிக்கே
பகவதுபாஸகனாகி மோக்ஷத்தையும் பெறுவான். 28

எட்டாவது அத்தியாயம் முற்றிற்று.

---

## अथ नवमोऽध्यायः ।

——x——

श्री भगवानुवाच—

२३८ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

उपासकभेदनिबन्धनाः ज्ञातव्योपादेयभेदाः पूर्वस्मिन्नध्याये प्रतिपादिताः। अत्र तु प्रधानतयोपासनस्वरूपं निष्कृष्यते। परमपुरुषमाहात्म्यं ज्ञानिनां विशेषश्च प्रागेव प्रकृते। तत्प्रभावविशोधनमत्रोपासनतत्फलानुप्रविष्टतया क्रियते । न तु प्रधानतया । अत्र 'इदं तु ते गुह्यतमम्' इति ज्ञानस्योपक्रान्तत्वात्, 'मन्मना भव' इति चोपसंह्रियमाणत्वात्, मध्ये च बहुशो भजनस्यैवाभ्यस्यमानत्वात्, प्रत्यक्षरूपत्वनिरतिशयप्रियत्वकीर्तनादिरूपत्वादीनां चापूर्वाणां भक्तिस्वरूपानुप्रवेशिनां प्रकाराणां प्रतिपाद्यमानत्वात्, स्वरूपतस्साध्यतया निरतिशयफलप्रतिपादनात्, 'राजविद्या' इत्यादिना प्रशंसारूपार्थवाददर्शनाच्चोपक्रमोपसंहारादितात्पर्यलिङ्गैः भक्तिस्वरूपनिष्कर्षोऽध्यायस्य तात्पर्यम् ; तदन्विततयाऽन्यदप्युच्यते—'इदं तु ते' इत्यत्र वक्ष्यमाणमेव बुद्धिस्थतया 'इदम्' इति निर्दिष्टम् । 'तु' शब्देन कर्मयोगज्ञानयोगाभ्यामस्याधिक्यं विवक्षितम् । तयोर्हि गुह्यत्वं गुह्यतरत्वं च। इदं तु गुह्यतमम् । इदं च शुश्रूषातिशयोत्थापनार्थं गोपनाधिक्यशिक्षणार्थं चोक्तम् । गुह्यतमम् - गोप्यतमम् । इदं - वक्ष्यमाणं, ज्ञानं तु - भक्तिरूपमुपासनाख्यं ज्ञानं तु, ज्ञानशब्दोऽत्र सामान्यविशेषन्यायात् भक्तिरूपज्ञानपरः । विज्ञानसहितम् - उपासनप्रकारज्ञानयुक्तम्, विशिष्टं ज्ञानं विज्ञानं ज्ञानगतो विशेषश्च उपासनप्रकार एव तत्सहितं यथा तथा, अनसूयवे - गुणेषु दोषाविष्करणचित्तवृत्तिरसूया, तद्विपर्ययश्च गुणेषु गुणाध्यवसायः, तद्युक्ताय, ते - तुभ्यम्, एतेनोपदेशयोग्यायोग्यविभागेन शिष्यशिक्षणं कृतम् । प्रवक्ष्यामि - कृत्स्नं लघु व्यक्तं च वक्ष्यामि, यत् - ज्ञानमुपासनाख्यं, ज्ञात्वा - अनुष्ठानपर्यन्तं विज्ञाय, न ह्यनुष्ठेयज्ञानमात्रादनुष्ठानफलम्। अशुभात् - मत्प्राप्तिविरोधिनः सर्वस्मात्पापात्, मोक्ष्यसे - मुक्तो भविष्यसि, उपासनस्वरूपं ज्ञात्वा तदनुष्ठानद्वारा मोक्ष्यस इति यावत् । इदं तु ते इत्यादिना पूर्वेणान्वयः ।

Registered No. M 2300

Book XXXI ॥ श्रीः ॥ No. 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

:o:

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ हेविळम्बि - तुला [ सं २

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

OCTOBER, 1957

For the rate of subscription please see inside

# UDYANA PATRIKA.

---

Annual Subscription  Rs. Two only.

Do. With Sastraic Supplement  Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूर्षाङ्किर्दृयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः।
(संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वसंख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

---

## विषयाः ॥

1 उद्गातृदशाननम्।
2 मुकुन्दमाला।
3 राज्यविपर्ययः।
4 अखिलभुवनमहिमा।
5 संस्कृतस्य पुनरुज्जीवनम्। (4)
6 प्रकृतिभेदः।

TIRUPATI

दशाननः— महोदर, अद्य नूनं तुषारशिखरस्य नेदीयसि वर्त्मन्येव वर्तामहे । पश्य,

अग्रे घनीभवदमन्दझरीतलोढ-
प्रालेयगण्डदृषदन्वयविक्षिप्तःस्थाल् ।
आरोहति पुष्पकमपीदमधःप्रपात-
निर्घातसन्ततिमिवानुभवत्यकाण्डे ॥ ७२ ॥

प्रहस्तः- (स्वगतम्) प्रतिहतममङ्गलम् । शठनायिकेव देवस्याद्य वाणी प्रायो भवत्यविश्वसनीयप्रकृतार्था ।

विद्युज्जिह्वः— देव, कः सन्देहः । ननु प्राप्ता एव वयं हरावासस्थानं कैलास-गिरेरस्मिन् शिखरम् । किञ्च पश्यत्वदूर एव भवान् आकारव्यक्तिम् ।

तथा हि—

आलिप्तभस्मपुनरुक्तवपुःप्रकाशा
आपिञ्जरायतविकीर्णकपर्दभाराः ।
एते हरानुचरभूतगणा नु नाम
शैवाललक्ष्मतुहिनोपलदर्शनीयाः ॥ ७३ ॥

दशाननः— महोदर, तेन हि मन्दीक्रियतां विमानवेगः । समन्तान्नयन-कौतुकं निर्विशावः । अद्य चास्य कैलासशृङ्गस्योपरि विमानराजः —

स्तिमितविततपक्षः किञ्चिदावर्जितांसः
शफरचलनलक्ष्मस्वप्रमत्तोग्रचक्षुः ।
शरदि तनिमभाजः पल्वलस्योपरिष्टात्
खगपतिरिव चक्रावर्तरीतिं विधत्ताम् ॥ ७४ ॥

महोदरः— (शनैः शनैर्विमानवेगं नियच्छति)

नेपथ्ये

अयि भोः, करङ्क-कीकस-करोटिकाय-रुद्रट-भीभट-विकट-दंष्ट्रिलास्थिल-कराल-कङ्कालमुखाः प्रमथनाथाः, एवं भृङ्गिरिटिर्वः समाज्ञापयति ।

अद्य किमपि चिरादनिर्भिन्नसमाधिर्निर्व्यापारो देवः । तदनया दिशा अलकावस्कन्दिनो नक्तञ्चराः यथा न परिस्पन्दन्ते तथा भवद्भिरुदायुधैर्व्यग्रीभवितव्यमिति ।

प्रहस्तः—कथं निर्व्यापारः शङ्कर इति ।

महोदरः— किं युद्धकातरतया ध्यानव्याजमङ्गीकरोति ।

विद्युज्जिह्वः— अथास्यानुचरानितस्ततो धावतो निष्पिष्य तद्रुधिरधाराभिः समाधिस्थमभिषिञ्चामः ।

दशाननः— भवत्वेवं तावदुद्घोषयामः । भो, भो, भूतप्रेतपिशाचाः गिरिशपार्षदापशदाः, निवेदयत दशाननस्य प्रधर्षणां युष्मत्स्वामिने । अद्यालकाप्रमाथदुर्ललितभुजविंशतिरुपागतोऽहं रणातिथिरिति । कथमेतेऽपि किमप्यप्रतिपद्य शनैर्दृष्टिपथान्निरपयान्ति । अहो नु भोः, यत्खलु विस्मितोऽस्मि । अपि नाम तरस्वतो वयं कैलासपरिसर एव वर्तामहे । सर्वेश्वरजनस्य निलयेऽस्मिन् द्वार एव शत्रुभिरवस्कन्दिते दौवारिकोऽपि दुर्लभो भवति । सर्वोऽप्युदासीन इव निवर्तते परिजनः । न कापि गुप्तिः क्रियते । कष्टं तपोवनप्रायमिदं स्थानम् । दूरात् शृणुमो वैभवविरुदावलिम् । आरादरातिप्रातिमुख्यमपि कातरतया विवर्जयन्तः प्रलीयन्ते । अहो तूलप्रायं जगदखिलं भुजशालिनाम् । तत्किमद्य करवाणि सङ्घर्षदोहदकण्डूलदोर्मण्डलः ।

विचित्य गिरिकन्दराण्यमुमुपोढमिथ्यातपः-  
समाधिमुपहन्मि किं सपदि दिक्तटीबन्धनम् ।  
हठादुपरि पातयाम्युत किमट्टहासारवै-  
रमुं किमुत चूर्णयाम्यचलमेव सत्र्यम्बकम् ॥ ७५ ॥

नेपथ्ये

विजये, विजये, हा धिक्, शापतिरस्कृतामपि तपस्विनीं शून्यहृदया न स्मरासि ।

दशाननादयः - (शृण्वन्ति)

पुनर्नेपथ्ये

भट्टिणि, इमे स्वः प्रदोषसन्ध्याशिवगाली ।

चेट्यौ, कुत वां कथाविच्छेदो जातः ।

भट्टिणि, घोरतमानां निशाचराणामद्यादूरादारवः श्रूयते । तदन्तःपुर-मुपगम्यैव कथितशेषं श्रोतुमर्हसि ।

दशाननः— (सविस्मयम्) कुतोऽयमालापः ।

(सर्वे सावधानं शृण्वन्तः परितः पश्यन्ति ।)

पुनर्नेपथ्ये

अहो धिक्, अद्य खलु प्रपञ्चशरण्यः पुत्रदारानुपेक्षते । स्वैरेवास्मा रक्षितव्योऽधुनाऽस्माकं संवृत्तः । तदेतम् । नन्दिनं द्रक्ष्यामः ।

दशाननः— स्त्रीजनस्येव श्रोत्रसुधास्यन्दी मधुरालापः । (दृष्ट्वा) महोदर, किञ्चिद्दक्षिणतः बालारुणप्रकाशालिप्रहरिदन्तरस्यास्य काञ्चनशरवणस्य दिशा विमानमुद्योजय । यत्रैताः निष्टप्तहेमगौराङ्ग्यः कलालापपेशलाः मत्तकाशिन्यः परिवर्तन्ते । अहो, चक्षुष्मत्तायाः साफल्यम् ।

महोदरः— अयि विमानराज, किञ्चिद्दक्षिणतः काञ्चनशरवणस्यास्यैव सद्यः सन्निहितो भव ।

नेपथ्ये

अयि विमानराज, शापितोऽसि जगन्मातुः पादकमलाभ्यां यदीतः पद-मपि चलसि ।

दशाननः— अये क एष विमानं स्तम्भयति । महोदर, वाह्यतां वाह्यतां विमानराजः ।

विद्युज्जिह्वः— अये, कोऽन्य मे जिह्वाज्योतिषि शलभीभविष्यति ।

महोदरः— अहो स्तब्धं विमानम् । अयि, विमानराज (इत्यादिमन्त्रमा-वर्तयति ) हा धिक्, रूढमूलमिव स्थावरं संवृत्तम् । वातविद्धः केतु-पटोऽप्यस्य न मनाक् चञ्चति । कुतोऽद्य विमानपरिस्पन्दाशंसालवो-ऽपि नः । नूनं यक्षैः कृतवैराणामस्माकं यक्षिणी मार्गरोधिनी संवृत्तेति तर्कयामि ।

दशाननः— आः कुतोऽस्मासु यक्षिणी वा कश्चिदन्योऽपि वा प्रभविष्यति ?

विद्युज्जिह्वः—महोदर, महोदर, चोद्यतां विमानराजो भूयो मन्त्रानुस्मरणेन एतत् त्रिलोकविजयिनो दशकन्धरस्य शासनमिति ।

महोदरः— महाभाग, प्रगल्भवाचाल, अद्य भवानपि मत्तो विदितमन्त्र एव ननु । तद्वाह्यन्तां भवतैव काममेते हंसमुखप्रग्रहाः । एष निवृत्त-नियोगो भवामि ।

विद्युज्जिह्वः— धिङ्मूर्ख, अकल्य, ...

दशाननः— आः एष गोचरीभूतो विमानस्तम्भनदुर्विदग्धः पातकी । अहो दर्शनानुरूपं चेष्टितमस्य सर्वाङ्गकुटिलस्य ।

(इत्यट्टहासं मुञ्चति ।)

ततः प्रविशति समुद्धृतशूलः क्रुद्धो भगवान् नन्दी ।

नन्दी— मा तावद्भोः मन्दमते ! सत्वरं निवर्तस्व अस्मात् विपाकदारु-णात् चापलप्रसङ्गात् यदि जीवन्तमात्मानमिच्छसि ।

दशाननः— (सावज्ञहासम्) यदि जीवन्तमात्मानमिच्छामि ? अरे रे, विमानस्तम्भनमिथ्यापौरुष, वामचेष्टित, वामन, न खलु जानासि त्वत्पुरःस्थं लङ्केश्वरम् ।

नन्दी— अरे, दुर्मते, जानामि त्वां स्वैर्दुराचारैर्विपन्नप्रायाभ्युदयम् । पश्य, मूढ, पश्य,

शिष्टान् हंसि निरङ्कुशो मुनिगणानालोड्यस्याश्रमा-
नुद्यानानि भिनत्सि नाकिसदसां वायुः प्रवृद्धो यथा ।
वज्रक्रूरनिपातदोर्दशयुगप्रक्षुब्धदेवद्विजान्
लोकानाकुलयस्यहो बत हतः स्वैरेव पापैरसि ॥ ७६ ॥

दशाननः— अयं नः प्रशस्तिपाठः । न तु नाम निन्दा ।

नन्दी— अरे पापिष्ठ, आत्मश्लाघादुर्विदग्ध, राक्षसपशो, साधुजनाभि-शापोपदग्धः प्रागेव त्वमिति विरमामि तावत् त्वयि शापनिपातनपौन-रुक्त्यात् । तद्विरम, विरमास्मादश्रेयोनिधानात् पूज्यव्यतिक्रमचा-पलात् ।

अयं भगवतः शैलो देवदेवस्य शूलिनः ।
सर्ववैमानिकालङ्घ्यः प्रादक्षिण्यक्रमाद्दते ॥ ७७ ॥

तत्प्रतिपद्यस्व हितमात्मनः यावन्न ते चापलफलं परिणामयिष्यते ।

दशाननः— अयमपरः शौर्यभ्रष्टोऽस्मासु हितोपदेशव्यसनी । अहो, कतिविधाः क्षीणसत्त्वानां कातर्यनिगूहनोपायाः । अरे, दिक्पालकापसदपादोपजीविन, दौवारिकहतक, किमु शिक्षयसि दशाननस्य विनयप्रवृत्तिं विपक्षेऽपि । धिक् त्वां, त्वत्स्वामिनं च ।

दिक्कोणाञ्चिलयनकानि संश्रयन्तो
यं देवाश्चकितमपाङ्गयन्ति यान्तम् ।
तस्यापि प्रतिभटनाशदुःस्थदोष्णः
क्षुद्रस्त्वं क तु भविता तव प्रभुर्वा ॥ ७८ ॥

नन्दी— (कर्णौ पिधाय) शान्तं पापम् । न हि श्रोतुमर्हा ईश्वरापवादाः । (सक्रोधम्) अपेहि रे, पौलस्त्यकुलकलङ्क अपेहि मे दृष्टिपथात्, यावन्न त्वां दृशैव धक्ष्यामि ।

दशाननः— (सामर्षाटोपम्) अरे रे, वृथाशूलधर, जर्जरानडुवन्, किमिति प्रगल्भसे । एष शृङ्गे ते समुत्पाटयामि । (इत्यभिपतति)

नन्दी— अरे, दुर्वार, भ्रष्टो भव । (इति शपति)

(दशाननः अन्तरिक्षात् अधः पतति)

विद्युज्जिह्वादयः— हा हा महाराज, (इत्यनुपतन्ति)

(दिवः पुष्पवृष्टिः पतति । दुन्दुभयो नदन्ति)

नेपथ्ये

जयति भगवान् द्वितीयो हर इव नन्दी सुरान्वयानन्दी ।
यद्वाग्वज्रनिपातात् गण्डोपलवत् पतत्यसौ पापः ।

नन्दी— ईषत्स्खलितवदस्य महापातकिनः । अनन्तरकरणीये तु देवः प्रमाणम् । न खल्वात्मना किमप्यस्मिन्नात्ययिकमापादयितुमिच्छामि । यतश्च विशेषतस्तोषितमहेश्वरा मूर्धन्यास्य पूर्वपुरुषाः येषु देवयोरात्मीयत्वप्रतिपत्तिरासीत् । विरलावग्रहा खल्वनादिजगत्पित्रोर्दयावृष्टिवैखरी भूतसामान्ये । तदत्र वृत्तान्तनिवेदनमात्रेणास्मन्नियोगो निवर्तताम् । यावद्देवस्य योगनिद्राप्रबोधक्षणं प्रतिपालयामि । अथ वा नचिरादेव नूनमेष दुर्वृत्तः प्रतिबोधयिष्यति देवं नूतनेन केनचिदुपम-

दोपोद्धातेन। आत्यन्तिकव्यापत्तेरर्वाक् कुतो नु नाम विशृङ्खलानां खलानामपथादुपरतिर्घटते। भवितव्यता खलु बलवती।

नेपथ्ये

भगवन्, शङ्करौपवाह्य, अवसरप्राप्तमनुष्ठेयमधिकृत्य भवता मन्त्रयितुकामस्सुरपुरोधाः सपुरन्दरः प्राप्तः।

नन्दी— के वयं मन्त्रेषु। दैवतन्त्रके जगति कुतो वा मन्त्रस्य परिणतिकल्पनाकल्पता। भवतु नाम। गृहागतौ प्रवरातिथी सम्भावयामि।

(इति निष्क्रान्तः)

इति श्रीमहालिङ्गकविविरचिते उद्गातृदशाननानाम्नि नाटके चतुर्थोऽङ्कः।

---

अथ पञ्चमोऽङ्कः॥

---

ततः प्रविशति व्योमविमानस्थः पुरन्दरः वाचस्पतिना सह।

पुरन्दरः— एता नन्दीश्वरक्षिप्रदर्शनोद्योगिनां हि नः।
चतुर्दशसमायन्ते चतुर्दश विनाडिकाः॥ ७९॥

वाचस्पतिः— न केवलमस्माकम्। पश्यतु भवानधस्तात्।

अस्यापि नन्दिनः क्रोधादपभ्रष्टस्य रक्षसः।
चतुर्दशसमायन्ते चतुर्दश विनाडिकाः॥ ८०॥

अथवा कृतं कालगणनया। कालकालस्य खलु सन्निधौ वर्तामहे।

वत्सरा नाडिका एव चतुर्दश चतुर्दश।
तावुभौ व्यत्ययेनापि कालरूपी किलेश्वरः॥ ८१॥

पुरन्दरः— अयमुपस्थितो नन्दी—

प्रविश्य

नन्दिकेश्वरः— स्वागतं प्रवरातिथिभ्याम् ।

पुरन्दरः— भोः शैलादे,

त्रैलोक्योद्भटमारमूर्तिमिव तं क्ष्वडं पुरा यः पपौ
देवो मूर्तिमती दया दिविषदां त्राणव्रते दीक्षितः ।
क्वासौ सम्प्रति नः किमस्त्यवसरः कस्मान्न विज्ञाप्यते
विश्वग्रासविसारिविंशतिभुजादुर्लङ्घ्यदर्पो रिपुः ॥ ८२ ॥

नन्दी— सोऽस्य दर्प एवाचिरात् प्रतीहारीभवितुमर्हति । यतः,

तेजोभङ्गमवाप्तानां निकृतिः परमा गतिः ।
विशेषतो दुर्मदानामीदृशां वैरकाङ्क्षिणाम् ॥ ८३ ॥

वाचस्पतिः— सुष्ठु भवताऽयं विनयातिक्रमान्निवारितः ।

नन्दी— किं नदीरयो रोधःपातेन निवार्यते ।

वाचस्पतिः— अवितथम् । कुबेरवृत्तान्तं श्रुत्वा परमेश्वर एवात्र प्रति विधातुं पारयिष्यति ।

पुरन्दरः— यथा नावशेषो दशवदनकथायाः तथा प्रतिविधाय परमेश्वरोऽनुगृह्णातु सुरानिति प्रार्थनयान्तर्गतया उपस्थितौ स्वः भगवतः पादमूलम् ।

नन्दी— अथ यक्षेश्वरः किं कल्यशरीरः ।

वाचस्पतिः— स नन्दनलताकुञ्जे सेवितः स्वर्वधूगणैः ।
शेते नासत्यनिर्व्यूढव्रणसंरोपणक्रियः ॥ ८४ ॥

नन्दी— धिक् कष्टम् ।

पुरन्दरः— (अधोऽवलोक्य) हन्त भोः, किमेष दशकन्धरो व्यवस्यति ?

विलुठ्य पुनरुत्थितः सपदि संभ्रमाव्याभितः
परीक्ष्य गिरिमूलमर्पितभुजस्तदभ्यन्तरे ।
विनम्रतनुरुच्छिरा विकटमेकजानुस्थिति-
र्निरुध्य पवनं हृदि द्रुतमसौ समुद्युज्यसे ॥ ८५ ॥

वाचस्पतिः— समुद्धरिष्यति कैलासं मूलादिव ।

पुरन्दरः— (प्रहस्य) मूढः खल्वसौ।

नन्दी— दिवस्पते, मैवम्। नास्ति दुष्करं रक्षःप्रवेकस्य।

वाचस्पतिः— सत्यमाह भवान्। यतः—

अङ्गुलिखनितशतकक्षुण्णप्रत्यन्तमेष कैलासम्।
मुकुटमिव भेत्तुमिच्छति नगाधिराजस्य सामर्षः॥ ८६॥

पुरन्दरः— अहो भीषणमुपक्रान्तं रक्षसा।

नन्दी— चलतीवाचलः (इति स्खलनं नाटयति)

पुरन्दरः— खमुत्पततु भवान्।

नन्दी— न क्षममिदं मे दौवारिकस्य। तत् प्रत्यवेक्षिष्ये कीदृक् किमिति कैलासे। (इति रभसेन निष्क्रान्तः)

पुरन्दरः— अहो प्रक्षोभः सार्वत्रिकः कैलासे,

लुठन्ति गणशो गणा विलुठितैः सह ग्रावभि-
र्विरुज्य फडिति द्रुमा दृशशतं पतन्ति क्षणात्।
महानुदयते रवः क्षुभितभूतजातव्यथा-
भयोदयनिरङ्कुशः सपदि कम्पमाने गिरौ॥ ८७॥

वाचस्पतिः—

केचित्पार्षदपुङ्गवाः कृतधियः सद्यः श्रयन्तेऽम्बरं
गाढाश्लेषपरायणाः स्वदयिता धृत्वाऽवलम्बे दृढम्।
सिद्धाः किन्नरयक्षपन्नगगणा विद्याधराश्चेतरे
सस्त्रीकाः खमुपेत्य विस्मयवशात् पश्यन्ति दूरे स्थिताः॥ ८८॥

पुरन्दरः— किमिदानीं समुद्रमथनावर्तित इव मन्दरः परिभ्रमति श्वेतशैलः।

वाचस्पतिः— मन्ये हठात्तोलयतो दशवदनस्य विंशतिभुजेष्वप्यप्राप्य विश्रमं विसंष्ठुलः परिभ्रमति शैल इति।

तेन चासौ—

व्यस्तैर्वनस्पतिशतैरपविद्धबाहु-
रद्रिर्झराम्बुभिरवाप्तदुकूलशोभः।

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २१] कलि ५०५८ हेविलम्बि - तुला [सं २


## मुकुन्दमाला ॥

—:o⊗o:—

भक्तापायभुजङ्गगारुडमणिस्त्रैलोक्यरक्षामणि-
र्गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः ।
यः कान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः
श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ २२ ॥

'मामेकं शरणं व्रज' इति सर्वफलसाधनभूतां शरणागतिमुपदिष्टवन्तं भगवन्तं श्रीकृष्णं अकृतज्ञभावं स्मरन् पुनः प्रार्थयते ।

भक्तानामपायः विपदेव भुजङ्गः सर्पः तस्य गारुडमणिः गरुड-देवताको मणिः । तस्य सन्निधाने यथा सर्पो निर्वीर्यो भवति भीतोऽपसर्पति च, तथा उपस्थिताऽपि विपत् स्मृतिसन्निहितेन भगवता भक्तजन-बाधने नष्टसामर्थ्या भवति । निवर्तते च ।

भक्तरक्षणेन किं भगवतः पक्षपातदोषो भवति ? न, नैव । स हि त्रैलोक्यरक्षामणिः । लोकत्रयवर्तिसर्वजनरक्षणोद्युक्त एव सर्वदा । अजात-भक्तयस्तु मूढाः रक्षापेक्षां तस्मिन् अकुर्वन्तः दुःखमनुभवन्ति । एषामयं दोषः, न भगवतः ।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥

इतीदं भगवद्वचनमत्र स्मर्तव्यम् । भूदेवी वेधःप्रभृतिभिर्देवैस्सह क्षीरसागरं गत्वा भगवति शरणागतिं कृत्वा यत् ततः 'वसुदेवपुत्रत्वेनावतीर्य भवत्याः पीडापरिहारं करिष्यामी'ति अनुग्रहमलभत तदनेन विशेषणद्वयेन अभि-प्रेतम् ।

अवतीर्णस्य भगवतो गुणाननुभवति- गोपीलोचनेत्यादिना। गोपीलोचनान्येव चातकाः पक्षिणः तेषां जीवनप्रदतया अत्यन्तमादरणीयोऽम्बुदः अम्बुदमणिः।

सौन्दर्यमुद्रामणिः। लोकातिशायिसौन्दर्यवान् अयं इति मुद्राविशिष्टो मणिः। यद्वा चेतनानामचेतनानां वा अन्येषां सर्वेषां 'इदं सुन्दरम्' इति मुद्रादानक्षमो मणिः। यद्भगवत्सम्बन्धभाक् तत्सेवोपयोगि च तदेव सुन्दरं नान्यत् किमपीति हि निश्चिन्वन्ति तत्त्वविदः। अतः सौन्दर्यमुद्रामणिः।

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः॥

इत्ययं श्रीमद्भागवतश्लोक इहानुसन्धेयः।

श्रियःपतित्वमाह- यः कान्तामणीति। 'राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि' इत्युक्तरीत्या साक्षात् श्रीरेव हि रुक्मिणी। एतेन फलितमुक्तं देवशिखामणिरिति। श्रियःपतिर्हि देवानामपि देवः। अयं देवदेवः गोपालचूडामणिर्बभूव। आश्रितवात्सल्यादिवशात्। न तु भोगलिप्सया कामुकतया वा।

एवंविधो गोपालचूडामणिः नः श्रेयो दिशतु। कर्मयोगाद्यनुष्ठानाशक्तानां तत्साध्यं मोक्षं ददातु।

मां पालयेति पूर्वस्मिन् श्लोके स्वार्थं प्रपत्तिः। 'नः' इत्यस्मिन् श्लोके स्वकीयानामपि श्रेयस्सिद्धये प्रपत्तिः।

---

# राज्यविपर्ययः॥

(7)

(पौरसमाजः)

गुरुदत्तः— अयि भो महान्तः, सखायः, युवानः सर्वेषां भवतां अत्र सन्निधापनप्रयोजनं भवन्तो जानन्त्येव। अयं नूतनः कश्चित् काल आगतः, यः लोके राज्ञां अत्यन्तं प्रतिकूलो दृश्यते। सर्वत्र प्रजाः राजानं द्विषन्ति। सिंहासनादवरोपयन्ति। देशात् सपुत्रकलत्रं निरस्त्वं निष्कासयन्ति। राजराज्यं परिसमाप्य जनराज्यं स्थापयन्ति। अयं विपर्ययः

साङ्क्रामिको रोग इव दिशि दिशि झटिति प्रसृतः। एकद्वान् देशान् विना अन्यत्र सर्वत्र अधुना राजकथा सर्वथैव लुप्ता। यत्र राजा वर्तते तत्र सः निरधिकारः, जनप्रतिनिधिः यद्वदति तत् कुर्वन् तद्धीनसर्वकार्यः तत्परवशो वर्तते।

न परमित्थं राजद्रोहे अपि तु चिरन्तनसामयाचारिकधर्मव्यवस्थाद्रोहेऽपि जनानां महानभिनिवेशः। तत्र समस्ववादिनः केचित्। साधारणस्ववादिनः केचित्। धनिकदरिद्रभेदमपाकृत्य देशजनेषु एकस्य यावत् स्वं तावदेवेतरस्येति सर्वसाम्यवतीं दशां सम्पादयितुमीहन्ते प्रथमे। यस्य सर्वं स्वं कस्यापि स्वकीयं स्वमिति किमपि भवितुं नार्हति। सर्वसाधारणं राज्यशासनाधीनं वर्तेत। यो यो जनः यद्यत् कर्म करोति स स तदनुरूपां जीविकां लभेत। इति ईदृशीं जनसमूहस्थितिं स्थापयितुं यतन्ते अपरे। इमे स्वोद्देशनिर्वर्तने तीव्रोद्यमाः। स्वकीयं, सन्निहितांश्च देशान् तादृशस्थितिभाजः कृत्वा इतरानपि सर्वान् देशान् तथा कर्तुं व्यवस्यन्तः तदनुगुणान् बहून् मार्गान् आश्रयन्तः सन्ति। तत्तद्देशजनेषु केचन तैराकृष्टमनसः स्वस्वदेशे तां साधारणस्वपद्धतिं प्रवर्तयितुमिच्छन्ति। कोलाहलं कुर्वन्ति। अवशादुत्पद्यमानान् कलहान् न गणयन्ति। स्वपरपीडोपनिपाताच्च न बिभ्यति। एतादृशाः कतिपये सम्प्रति अस्मदीयमिदं नगरमागताः जनानां बोधनं कुर्वन्ति। सा नवीना पद्धतिरस्मत्प्रदेशेऽस्मिन् उपक्षेपणीया, आदरणीया, प्रतिष्ठापनीया, इति। अस्मिन् विषये अस्माभिः अविलम्बेन कश्चन निर्णयः कार्यः। अन्यथा प्रदेशान्तरेषु देशान्तरेषु च यथा, तथा अत्रापि अचिरात् शान्तिर्नश्येत्, सङ्घर्षो भवेत्, सर्वेषां बहुधा पीडा भवेत्।

आनलः— अस्माभिः किं कर्तव्यमिति ते वदन्ति।

गुरुदत्तः— राजराज्यं निवर्त्य प्रजाराज्यं स्थापनीयमिति वदन्ति।

आनलः— किमुक्तं भवति?

भानुमान्— किं नाम तत्र तिरोहितम्?

आनलः— न खलु तत्र किञ्चित् तिरोहितमस्तीत्यहं ब्रवीमि। अपि तु अर्थशून्यं तद्वचनमिति।

गुरुदत्तः— कथम्?

आनलः— राज्यं कस्य स्वं भवति? राजा च वर्तते, प्रजाश्च वर्तन्ते। राज्ञश्च तद्राज्यं, प्रजानां च। तथा सति राजराज्यनिवर्तनं नाम

किम्? प्रजाराज्यस्थापनं नाम किम्? (करघोषः)

गुरुदत्तः— साधु साधु आर्य, अस्मत्प्रदेशराज्यशासनं तावत् तथा समी-चीनं, तथा शोभनं, यथा न कस्यचिच्छेदबुद्धिर्भवति। अस्मदीय राज्यमिति सर्वो मन्यते। परं तु देशान्तरेषु यद्वर्तते तत्परिज्ञाने तस वचनस्यार्थः सुग्रहः स्यात्।

भानुमान्— राजा विद्रावणीयः। ततः परं तत् प्रजाराज्यं भवति। एवं कर्तव्यमिति ते अपेक्षन्ते।

आनलः— अराजकं प्रजाराज्यं केन शासनीयम्?

भानुमान्—प्रजाभिः स्वयमेव।

आनलः— शिरश्छेदनीयम्। इतरैरेवाङ्गैः शरीरं रक्षणीयमिति कुतो न भवति? (सर्वे हसन्ति)

गुरुदत्तः – तथा प्रबला आर्यमिश्रस्य प्राचीनप्रक्रियावासना, यथाऽत्र परितः प्रवर्तमाना उच्चावचा विपर्यया अत्रभवतः बुद्धिं नैव प्रवेष्टुं शक्नुवन्ति। भवतु। निर्बन्धपरास्ते विपर्ययवादिनः। अस्मान् लघु न मोक्ष्यन्ति। यथा ते वदन्ति तथा वा कर्तव्यम्। तेषामुद्देशसिद्धेः अत्र अवकाशः सर्वथा नास्ति, इति दृढं प्रतियन्तः यथा ते यथागतं निवर्तेरन् तथा वा किमपि कर्तव्यम्? अन्यतरः कल्पः अत्र अद्य निर्धारणीयः। विलम्बासहो विषयः।

सुभद्रः— मान्या महान्तः, चिरानुवृत्तः सुप्रतिष्ठितः कश्चन शासनप्रकारः अस्मत्प्रदेशे वर्तते। अस्य निवर्तने वा प्रकारान्तरप्रवर्तने वा को हेतु-रस्ति? अद्यावधि अपरिहृतः कोऽनर्थः परिहृतो भविष्यति। अलब्धं किं सुखं लप्स्यते? इदं तावत् प्रथमं तेषां मुखात् श्रोतव्यम्।

आनलः-- राजद्रोहिणः असम्भाव्यास्ते अस्मज्जनपदे वासमेव नार्हन्ति। प्रहृत्य निष्कासनीयाः यदि स्वयमेव नापयान्ति।

गुरुदत्तः— सत्यं धर्मानुरोधी स एव कार्यक्रमः। किन्तु कालानुरोधेन शमावलम्बनमिदानीं आवश्यकम्। अथ यत् अत्रभवान् सुभद्र आह तत्र ब्रवीमि। राज्यविपर्यासकारणानि बहुधा तेषां मुखात् श्रुतानि। न तु तानि अस्माकं समञ्जसानि भान्ति। तेषां वचनानि श्रुतवन्तो बहवः अस्मदीयममात्यप्रवरमुपेत्य विज्ञाप्य प्रतिबोधं लब्ध्वा निवृत्ताः। तैः कृतानां पत्रिकाप्रकटनानामपि प्रत्यादेशप्रकटनानि अमात्यवर्येण अकारिषतैव। परं तु ते न विरमन्ति।

घनश्यामः– तर्हि एकं कार्यं कुर्याम। विपर्ययवादिनां सकाशं गत्वा ब्रूयाम– 'वयं न किञ्चिज्जानीमः। न राज्यतन्त्रे वयं निष्णाताः। अस्मदीयोऽमात्यप्रभुः सौजन्यनिधिः। तं सभायां सन्निहितं करिष्यामः। तस्य सम्मुखे यद् युष्माकं वक्तव्यं तत्सर्वं ब्रूत। तत्र यन्निर्णीतं भवति तद्वयं करिष्यामः' इति। (सर्वत्र करघोषः)

गुरुदत्तः— उचितमेतत्। किन्तु अमात्यं प्रति निराशास्ते। नाल सम्मतिं करिष्यन्ति। अथापि तन्निर्बन्धसङ्कटपरिहारस्य अयमेव मार्गः। एवमेव कुर्याम।

---

# अत्रिच्यवनमहिमा ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—:o:—

अयं श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकस्मिन्नध्याये वर्ण्यते—

वायुः कार्तवीर्यार्जुनमेवमब्रवीत्— हैहयश्रेष्ठ, सुमहात्मनोऽत्रेः कर्म मत्तः शृणु। देवा दानवाश्च घोरे तमसि मिथोऽयुध्यन्त। तत्र स्वर्भानुस्सोमभास्करौ शरैरविध्यत्। नृपतिशार्दूल, तदा तमसाग्रस्तास्ते देवास्सहितैर्बलिभिरसुरैर्निहन्यन्ते स्म। दैतेयैर्हन्यमानाः क्षीणप्राणा दिवौकसस्तपोधनं तपस्यन्तं विप्रमत्रिमपश्यन्। अथास्यात्यरशान्तक्रोधं जितेन्द्रियमेनमित्थमकथयन्, 'प्रभो, इमौ चन्द्रादित्यावुभावपि दैत्यैरिषुभिरताड्येताम्। तमसा वृतेऽस्मिन्देशे वयमपि शत्रुभिर्हन्यामहे। शान्तिं नाधिगच्छामः। भयान्नस्त्रायस्व' इति। तदनु अत्रिः 'कथं भवतो रक्षिष्यामि' इत्यपृच्छत्। ते गीर्वाणाः 'त्वं तिमिरघ्नश्चन्द्रमास्सविता च भूत्वा अस्माकं दस्यूनां हन्ता भव' इति प्रत्यवदन्। इत्थमावेदितोऽत्रिस्तदैव तमोनुदिन्दुरभवत्। सुधांशुवत्प्रियदर्शनस्स सस्नेहमैक्षत। पार्थिव, अत्रिर्निशाकरं दिवाकरञ्च मातिप्रभं दृष्ट्वा स्वेन तपसा तयोस्संयुगे प्रकाशमतनोत्। तदा जगद्वितिमिरं प्रदीप्तञ्चाकलयत। त्रिदशानां प्रत्यर्थिसार्थान् स्वेन तेजसा सुतरामजयच्च। अत्रिणा दह्यमानान्महासुरानालोक्य

तेन रक्षितास्ते वृन्दारका अपि तदा तान् पराक्रमैरघ्नन् । उत्तमतेजसा-
ऽत्रिणा भानुस्समभास्यत । आदितेया अरक्ष्यन्त । आत्मनो विधुत्वे-
ऽप्यधीयत च । राजर्षे, अत्रिर्द्वितीयेन चर्मवाससा फलभक्षेण जपता द्विजे-
नात्रिणा कृतं कर्म पश्य । सुमहात्मनोऽत्रेः कर्म विस्तारेणाभणम् । राजन्,
महात्मनश्च्यवनस्य महत्कर्म वक्ष्यामि । आकर्णय । च्यवनः अश्विनोः
प्रतिसंश्रुत्य पाकशासनमेवमुवाच— 'अश्विनौ त्वया देवैश्च सह सोमपौ
कुरु' इति । इन्द्रः, 'महाव्रत, अस्माभिर्निन्दितावेतावश्विनौ कथं सोमपौ भवे-
ताम् । एतौ देवैर्न सदृशौ । तस्मादस्मानेवं मा लप । अश्विभ्यां साकं सोमं
पातुं नेच्छामः । विप्र, अन्यद्यद्वचनमाख्यास्यसि तदनुसृत्य करिष्यामः' इति
व्याहरत् । च्यवनः, 'सुरेश्वर, देव, इमावश्विनौ भवद्भिस्सहितौ सोमन्ध-
येताम् । एतावुभावपि सुरौ सूर्यपुत्रौ च । यथोक्तमाचर्यताम् । एतत्कुर्वतां वः
श्रेयो भवेत् । एतदकुर्वतां वस्तन्न स्यात्' इत्यभाषत । पुरुहूतः, 'द्विजोत्तम,
अहमश्विभ्यां सह सोमं न पास्यामि । अन्ये यथाकामं तं पिबन्तु'
इत्याचष्ट । च्यवनः, 'यदि मदुक्तिं नानुरोत्स्यसि मया सद्यः प्रमथितो
सखे सोमं पास्यस्येव' इत्यभ्यधत्त । ततश्च्यवनेनाश्विनोर्हिताय सहसा
किञ्चित्कर्म समारभ्यत । तत्र मन्त्रैस्सुरा अभ्यभूयन्त । भगवान् शुनासीर-
स्समारब्धं तत्कर्म वीक्ष्यामर्षाकुललोचनो वज्रं विपुलं शैलञ्चोद्यम्य च्यवनं
प्रति समुपाद्रवत् । तपोनिधिश्च्यवन आपतन्तं तमालोक्यैव सवज्रपर्वतं
तमद्भिस्सिक्त्वाऽस्तम्भयत । अनन्तरं स महामुनिराहुतिमयं व्यात्ताननं
महाघोरं मदनामानं संक्रन्दनस्यारातिमसृजत् । तस्य दन्तसहस्रं शत-
योजनं परमदारुणास्तस्य दंष्ट्राद्वियोजनशताश्चासन् । तस्य हनुर्भूमाववर्तत ।
अस्यास्यं दिवमस्पृशत् । सवासवास्सर्वा देवता महार्णवे तिमेर्मुखं प्राप्त-
मत्स्या इव तस्य जिह्वामूलमध्यतिष्ठन् । ततो मदमुखसमीपगास्ते दिविषदा
स्सम्मन्त्र्य मिलितास्सन्तः 'अस्मै द्विजातये प्रणम । विगतज्वरा अश्विभ्यां
सार्धं सोमं पिबाम ।' इति पुरन्दरमगदन् । तदनु स सुत्रामा प्रणतः
च्यवनेनोक्तन्निरवर्तयत । च्यवन एतावश्विनौ सोमपायिनावकल्पयत् ।
ततो वीर्यवान् स मुनिस्तत्कर्म समापयत् । अक्षेषु मृगयायां मद्यपाने
स्त्रीषु च मदं व्यभजच्च । राजन्, एतैरक्षदेवनादिदोषैर्नराः क्षयं यान्ति ।
न संशयः । तस्मात् मानव एतान् दोषान् नित्यं दूरतः परिवर्जयेत् ।
'राजन्, ते च्यवनस्याप्येतत्कर्म प्राकीर्तयं' इति ।

---

# संस्कृतस्य पुनरुज्जीवनम् ॥ (4)

(R. Rajagopalan, M. A., Bangalore)

:o:

अनादिकालादारभ्य निरतिशयवैभवेन विराजते भारतीय संस्कृतिः। भारतभूमिस्तावत् पुरातनग्रीक् - रोमन् - चीनादिराष्ट्राणां मध्ये महाकीर्तेर्भाजनमभूदिति, पूर्वोक्तदेशानां प्रभावे नामावशेषतां गते, भारतस्योन्नतिरविच्छिन्नतया अद्यापि प्रभावशालिनामाधुनिकराष्ट्राणां मध्ये सगौरवं विलसतीति च देशचरित्रलेखकानां सुविदितमेव। तस्य निदानं तावत् नश्वरेषु सांसारिकविषयेषु, कालत्रयेऽप्यबाध्यमानायाः सर्वोत्कृष्टतत्त्वमय्याः अस्मद्देशीयसंस्कृतेर्गरिमेति विदितचरमेव। एतादृशमहिमसंपन्नायां धर्मानुष्ठानगरिष्ठायां भारतभूम्यां देवा अपि जनिमभिलषन्तीति न किमपि चित्रम्।

भारतीयसंस्कृतेरौन्नत्यं तदाधारस्तम्भभूतया संस्कृतभाषयैवेति, सैव अस्मत्संस्कृतेरादर्शस्थानीयेति, अस्मद्देशीयविविधभाषायाः मातेति च सर्वविदितम्। अस्मद्देशीयधर्मग्रन्थाः सर्वे एतद्भाषामया एव। अत एव भारतदेशोन्नतिकांक्षिभिः सर्वैरस्मद्देशीयसंस्कृतिरक्षणधुरीणैर्भाव्यम्। एतदर्थं संस्कृतभाषाध्ययनस्यावश्यकता स्पष्टैव।

कतिपयदिनेभ्यः प्राक् राष्ट्रनिर्वाहकैर्नियुक्तेन "संस्कृतस्य - आयोगेन" संस्कृताभिमानिनां तदध्यायिनां च मनांसि संतुष्टानि भवितुमर्हन्ति। तत्सभासदो विद्वांसः संस्कृताध्ययने इदानीं विद्यमानन्यूनतापरिहरणाय यतेरन्निति विश्वसिमः। आधुनिकसंसारे तस्या औपयिकत्वं यथा सम्यक् संपद्येत तथा ते यत्नपरा भवितुमर्हन्ति। संस्कृताध्ययनविषये सुप्रसिद्धे द्वे पद्धती अनुस्रियमाणे दृश्येते। पूर्वकालादारभ्य अनुस्रियमाणा वेदशास्त्राध्ययनभूयिष्ठा पाठशालापद्धतिः आधुनिकशालासु अनुस्रियमाणा नवीना पद्धतिश्चेति।

'पौर्वकालिकपद्धत्या आधुनिकप्रपञ्चे न कोऽप्युपयोगः, न च प्राचीनार्वाचीनपद्धत्योः सुसंमेलनं संभवेत् इति' न वाच्यम्। कालधर्मानुसारेण बहूनां व्यवहाराणां व्यत्यस्तता सर्वेषामनुभवगोचरा एव। तस्यां विमनस्का अपि वयं अनिवार्यतया क्षमावन्तो भवामः। मूलभूततत्त्वाविरोधेन कालधर्मानुसारेण च आवश्यकविपरिणामपरा भवितु-

महोमि:। "न कदापि प्राचीनपद्धतेस्त्यागो युक्तः। तस्याः संरक्षणमेव सर्वेषां श्रेयस्करम्। प्राचीनपद्धतेरावश्यकता सुप्रसिद्धैः पण्डितैः बहुभिः एवं विज्ञप्यमाणा अस्ति। "प्राचीनपद्धत्या वेदशास्त्राध्ययनस्य यावत् व्युत्पादकत्वं गाढत्वं च संपद्यते तावदाधुनिकपद्धत्या न संभवतीति तत्र तत्र विराजमानाः पण्डिता एव प्रमाणम्। दुरूहाणां विविधानां शास्त्राणां तत्तत्परिपाट्याऽध्ययनं विना तत्तच्छास्त्रतत्त्वावगमः दुश्शक एव। नो चेत् शास्त्रतत्त्वयाथार्थ्यावगमदौर्लभ्येन, अयथार्थावगमेन च शास्त्राणां वैयर्थ्यमेव स्यात्। एतदर्थं प्राचीनपद्धतिः तदनुसारिणः पण्डिताश्चावश्यं रक्षणीयाः" इति। क्षयोन्मुखानां शालानामुद्धरणं निष्कास्यमानानां पण्डितानां संरक्षणं चावश्यं करणीयम्। तत्र तत्र पण्डितेभ्यः किंचित् साहाय्यं कुर्वद्भ्यो मठाधिपेभ्यो धन्यवादान् समर्पयामः। राष्ट्राधिपैश्च तेषां जीविकाव्यवस्थायै यत्नपरैः भाव्यमित्यत्र संस्कृतायोगस्य चिन्ता प्रवर्तेदिति विश्वसिमः।

न चार्वाचीनपद्धत्या न कश्चिदुपयोग इति मन्तव्यम्। प्राचीनपद्धत्या संस्कृताध्ययनस्य यावती गाढता संजायते तावती नवीनपद्धत्या असंभाव्या। अथापि तत्र वैशाल्यस्य व्यापकत्वस्य च संभवहेतोः तत्प्रोत्साहनमपि अनिवार्यमेव। संस्कृताध्ययनोपयोगं जानद्भिः पाश्चात्यराष्ट्राधिपैः स्वेषु स्वेषु राष्ट्रेषु संस्कृतकेन्द्रस्थानानि निर्माय तदध्ययनप्रवर्तने बद्धश्रद्धैः भूयते। अस्मदीयप्राचीनग्रन्थानां बहूनां प्रकाशनाध्ययनगवेषणादयः तैः बहुधा अक्रियन्त, क्रियन्ते च। किंतु भारते तदध्ययनस्य प्रोत्साहः नाद्यापि सम्यक् निष्पादितो भवति। आधुनिकपाठशालासु संस्कृताध्ययनस्य वैरल्यमेव तस्य प्रमाणम्। क्षयोन्मुख्यां प्राचीनपद्धत्यां अवज्ञाऽनादरवत्यां च नवीनपद्धत्यां संस्कृताध्ययनस्य का गतिरिति संशयग्रस्तान्येव सर्वेषां मनांसि। संस्कृतिरक्षणे बद्धश्रद्धानां राष्ट्रनिर्वाहकाणां संस्कृताध्ययने क्रियमाणा यत्नाः सफला भवेयुरिति आशंसामहे।

द्वयोरपि पद्धत्योः रक्षणप्रोत्साहनेनैव संस्कृताध्ययनस्य गाढत्वव्यापकत्वादयो गुणाः सम्पन्ना भवेयुः। अधुना नियुक्तानां आयोगसदस्यानां कार्याचरणानि पूर्वोक्तदुरवस्थापरिहरणोपक्रमाणि भूत्वा सर्वेषां हितकारीणि भवेयुरिति विश्वसिमः। तेषामग्रे क्रियन्ते अस्माभिः एतानि सूचनानि।

संस्कृताध्ययनस्य व्यापकत्वसंपादनाय आङ्गलकलाशालासु दीयमानोऽवकाशः इतोऽप्यधिको भवितुमर्हति । प्रौढशालाकक्ष्यासु तदध्ययनमनिवार्यतया, तदनन्तरं महाकलाशालासु ऐच्छिकतया च भवितुमर्हति। पिपठिषूणां संस्कृताध्यायिनां प्रोत्साहनाय किञ्चिद्द्रव्यपरिमितानि पारितोषिकाणि वितरणीयानि । तदर्थं तत्तत्प्रान्त्यराज्यनिर्वाहकाणां, धनिकानां मठाधिपानां च साह्यं संपाद्यम् । मुख्यतः राष्ट्रकेन्द्रसमाधिकारिभिः एतदर्थं प्रतिवर्षं स्वकोशेभ्यः साहाय्याचरणं कर्तव्यम् । तदभावे संस्कृताध्यायिनः यथापूर्वं विरला एव भवेयुः, यतः अद्यतनशिक्षणप्रणाल्यां माणवकाः सर्वे सनिर्बन्धं त्रिभाषाध्यायिनो भवन्ति। प्रान्तीय - राष्ट्र - आङ्गलभाषाणामध्ययनं आवश्यकं विद्यते । किंच लोकोपयुक्तं आधुनिकशास्त्राणामध्ययनम् । एवं सति संस्कृताध्ययनं विद्यार्थिनां केवलं श्रमायैव जायेत। संस्कृतस्य अद्यतनैच्छिकाध्ययनविभागे निवेशेन न किमपि गणनार्हं फलं निष्पन्नं भवेत्। एतदर्थमेव पूर्वोक्तक्रमः सनिर्बन्धं अनुष्ठेयतया प्रतिभाति । स्वतन्त्रे भारते राष्ट्रकल्याणकांक्षिभिः सर्वैः संस्कृताध्ययनस्य यथापूर्वं स्थानमानदानपरैर्भाव्यम् । नो चेत् संस्कृताध्यायिनां संख्या इतोऽप्यतिविरला भवेत् । संस्कृतपाण्डित्यं च स्मरणीयदशामापद्येत । भारतीयसंस्कृतिश्च महाघातस्य पात्रीभूय देशे महान्तमनर्थमुत्पादयेत् । अद्य यावदनुभूयमानायाः राष्ट्रियसामाजिककष्टपरम्परायाः निदानं संस्कृताध्ययनावज्ञैवेति उक्ते इयं नातिशयोक्तिः स्यात्। अस्मद्देशस्थानां विभिन्नानां जनस्तोमानां संघटनशक्तिः संस्कृतेनैव पूर्वमासीदिति, अद्यापि तेनैव निर्वाह्या, इति च न केवलं पण्डितानां मतं किंतु राष्ट्रनिर्वाहकपुरुषाणामपि । तदेव भारतीयवैविध्यमनोज्ञकुसुममालायां सूत्रस्थानं वहति। सूत्राभावे मालायाः मनोहरत्वमुपयोगित्वं च कुतः संभवेत्। अस्मत्संस्कृतिबोधकग्रन्थानां पठनेनैव सम्प्रजात्वसंपादनं सुशकम्। तेन राष्ट्रोन्नतिश्चेति बहूपयुक्तस्य संस्कृताध्ययनस्य आवश्यकतां प्रति किमु वर्णनीयम् !

---

यतः शरीरं मनसो वशेन प्रवर्तते वापि निवर्तते वा ।
युक्तो दमश्चेतस एव तस्माच्चित्तादृते काष्ठसमं शरीरम् ॥

TIRUPATI



# प्रकृतिभेदः ॥

रामः—पश्य रे, शकटकार आह्वयति । एहि शकटमारुह्य गच्छेव ।

कृष्णः— पश्य तावत् सम्यक् शकटम् । कति तत्र उपविष्टाः सन्ति । किमावयोस्तत्र अवकाशोऽस्ति ?

रामः— किमरे, आवयोः तया चिन्तया ? शाकटिक आह्वयति । स आवयोस्तत्र अवकाशं कल्पयिष्यति ।

कृष्णः— अवश्यं कल्पयिष्यति । क आह नेति ? तत्र उपविश्य कस्यचित्पादेन, अपरस्य जानुना, इतरस्य अंसेन घट्टनं, अन्यस्य श्वासानिलवीजनं, सर्वेषां स्वेदगन्धाघ्राणं, इति सर्वमनुभवनीयम् ।

रामः— सञ्चारेण पादयोः या रुजा तामपेक्ष्य सर्वमिदं सह्यम् ।

कृष्णः— पादरुजा मे सुसहा । नैतच्छकटारोहणदुरवस्था । त्वं शकटे याहि । अहं पादचारेणैव आगच्छामि ।

---

ये वर्धिताः करिकपोलमदेन भृङ्गाः
प्रोत्फुल्लपङ्कजरजस्सुरभीकृताङ्गाः ।
ते साम्प्रतं प्रतिदिनं क्षपयन्ति कष्टं
निम्बेषु चार्ककुसुमेषु च दैवयोगात् ॥ १ ॥

कस्त्वं भद्र खलेश्वरोऽहमिह किं घोरे वने स्थीयते
सिंहव्याघ्रमृगादिभिर्वनचरैः खाद्योऽहमित्याशया ।
आत्मानं त्यजसे किमर्थमधुना मद्देहमांसाशया
प्रत्युत्पन्ननृमांसभक्षणधिया खादन्तु सर्वानपि ॥ २ ॥

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 3

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ हेविळम्बि - वृश्चिक [ सं ३

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

NOVEMBER, 1957

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः ।
(संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः — श्रीगीतार्थदीपः । २३३—२४०

ஸ்ரீபகவான் அருளியதாவது:-

ஓ அர்ஜுனா! நீ குறைகூறாமையுள்ளவன். உனக்கு கர்ம யோக ஞான யோகங்களைப் பார்க்கிலும் மிகவும் ரஹஸ்யமாயுள்ள பக்தியோகத்தை அநுஷ்டானம் செய்யும் முறையோடு உபதேசம் செய்யப்போகின்றேன். அதை அறிந்து அநுஷ்டானம் செய்து பகவத்ப்ராப்தி விரோதிகளான ஸர்வ பாபங்களும் விலகி முக்தனாவாய். 1

२३९ राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

उपायान्तरेभ्योऽस्योपासनस्यातिशयं दर्शयति— इदं - उपासनम् राजविद्या - विद्यानां राजा, दीप्त्यतिशयवत्त्वात्; दीप्यते हीयं अतिशयेन ब्रह्मविद्या सर्वविद्यानाम्। राजगुह्यं - गुह्यानां राजा, राजदन्तादिषु पाठादयमर्थो लभ्यते। यद्वा राज्ञां विद्या राज्ञां गुह्यं इति विग्रहः। महामनसामियं विद्येति यावत्। अजहल्लक्षणया गौणीं वृत्तिमाश्रित्य वोक्तार्थलाभः। राजानो हि विस्तीर्णागाधमनसः। त एव गोपनीयगोपनकुशलाः इति तेषामेव गुह्यम्। उत्तमं पवित्रम् - मत्प्राप्तिविरोध्यशेषकल्मषापहम्, प्रत्यक्षावगमम् - अवगम्यत इत्यवगमः विषयः, प्रत्यक्षभूतोऽवगमो विषयो - यस्य ज्ञानस्य तत् प्रत्यक्षावगमम्, भक्तिरूपेणोपासनेनोपास्यमानोऽहं तदानीमेवोपासितुः प्रत्यक्षतामुपगतो भवामीति यावत्। धर्म्यं - धर्मादनपेतम्, धर्मत्वं हि निश्श्रेयससाधनत्वम्। स्वयं फलभूतानां फलान्तरसाधनत्वरूपं धर्मत्वं दुर्लभम्। अथापि स्वरूपेणैवात्यर्थप्रियत्वेन तदानीमेव मद्दर्शनापादकतया च स्वयं निश्श्रेयसरूपमपि निश्श्रेयससाधनमिदं कर्तुं सुसुखं - करणे सुसुखं, स्वरूपतो विषयतश्चात्यर्थानुकूलत्वात् सुखेनानुष्ठेयम्। अव्ययम् - फलक्षयात् न व्येतीत्यव्ययम् - अक्षयम्, मत्प्राप्तिं साधयित्वाऽपि स्वयं न क्षीयते। एवंरूपमुपासनं कुर्वतो मत्प्रदाने कृतेऽपि न किञ्चित्कृतं मयाऽस्येति मे प्रतिभाति। अतोऽपवर्गरूपं फलमप्येतस्य नालम्।

பக்தியென்பது சிறந்த வித்யை, மிகவும் மறைக்க வேண்டியது. எல்லையடைவதற்கு ப்ரதிபந்தகங்களைத் தகையும் இது

போக்குகின்றது. இந்த பக்தியினுல் அதற்கு விஷயமான நான் ப்ரத்யக்ஷமாகிறேன். அநுஷ்டிக்கும்போது ஆநந்தரூபமாயிருப்பதோடு பேரின்பமாகிய மோக்ஷத்திற்கு ஸாதநமுமாகின்றது. ஆநந்த ரூபமாகையால் அநுஷ்டிக்க ஸுகரமானது. இதற்குப் பலமாக மோக்ஷாநந்தத்தை யளித்தும் பர்யாப்தமன்று என்று நான் எண்ணுகின்றேன். ஆதலால் மோக்ஷமாகிய பலத்தினுலும் இதற்கு அழிவு இல்லை. 2

२४० अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥

उक्तप्रकारश्रद्धेयभक्त्यनुष्ठानाभावे मोक्षो न सिद्ध्यति इति दर्शयन्, निरतिशयसुखस्यास्य सर्वैरनुष्ठानाभावे हेतुं च वदन्, 'नान्यः पन्था अयनाय' इत्यादिकमुपबृंहयति– हे परन्तप, शत्रुतापन ! अश्रद्धाहेतव आन्तरशत्रवोऽपि त्वया निराकार्या इति सम्बुद्धेर्भावः - अस्य - निरतिशयप्रियरूपस्य मत्प्राप्तिसाधनस्याव्ययस्य, धर्मस्य - भक्तिरूपमोक्षोपायस्य, अश्रद्दधानाः– श्रद्धा - विश्वासपूर्वकत्वरा तया शून्याः, पुरुषाः - नास्तिकाः पापकारिणः, मां - परमात्मानम्, अप्राप्य - अलब्ध्वा, मृत्युसंसारवर्त्मनि- मृत्युरूपं - मरणगर्भत्वात् बाधकत्वाद्वा मृत्युस्वरूपं यत् संसारस्य वर्त्म नरकतिर्यक्त्वादिप्राप्तिमार्गः तस्मिन्, निवर्तन्ते - नितरां वर्तन्ते निश्चयेन वर्तन्त इति यावत् ।

இவ்வாறு ஸுகரமும் ஸுகரூபமுமான பக்தியை அநுஷ்டானம் செய்வதில் விச்வாஸமும் த்வரையும் வேண்டும். அது இராமையால் புருஷர்கள் என்னை அடையாமல் மரணத்தைக் கொடுக்கக்கூடிய ஸம்ஸார மார்க்கத்திலே உழல்கின்றார்கள். அச்ரத்தைக்கு காரணங்களான அகத்திலுள்ள காமம் முதலிய சத்ருக்களை நீ வெல்லவேண்டும். 3

२४१ मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥

TIRUPATI LIBRARY

३४२ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

एवमध्यायप्रधानार्थस्य प्रापकस्योपासनस्य माहात्म्यमुक्तम् ; अथ प्राप्यमाहात्म्यद्वारापि तदेव स्थिरीक्रियते — इदं सर्वं जगत् - चेतनाचेतनात्मकं कृत्स्नं जगत्, अव्यक्तमूर्तिना - अप्रकाशितस्वरूपेण, मया ततं - व्याप्तम्, (ततः) सर्वभूतानि - चेतनाचेतनात्मकानि सर्वाणि वस्तूनि, मत्स्थानि - मयि अन्तर्यामिणि, अवस्थितानि, तेषु - चेतनाचेतनेषु, अहं न चावस्थितः 'मत्स्थानि सर्वभूतानि' इति प्रस्तुतप्रकारा स्थितिरत्र निषिध्यते, अहं तु न तदायत्तस्थितिः, मत्स्थतौ तैर्न कश्चिदुपकारः स्वरूपेण सङ्कल्पेनादृष्टादिना वा।

भूतानि - पूर्वोक्तचेतनाचेतनवस्तूनि, मत्स्थानि - न च घटादिषु जलादीनि यथा वर्तन्ते न तथा तानि मयि वर्तन्ते, घटादयो हि विना सङ्कल्पं स्वरूपेणैव धारकाः, अहं तु स्वेच्छया धारयामि, स्वेच्छाधीनधारकत्वं विहितम्, अस्वतन्त्रतया धारकत्वं तु निषिद्ध्यत इति न विरोधः। मे - मम ऐश्वरं योगम् - ईश्वरासाधारणं सङ्कल्परूपध्यानम् - 'योगस्सन्नहनोपायध्यानसङ्गतियुक्तिषु' इति कोशः। पश्य वक्ष्यमाणमवधारय, [अहम्] भूतभृत् - सर्वेषां भूतानां भर्ता - नियमनेन धारकः, भूतस्थो न च - धार्येषु भूतेषु नाहं तिष्ठामि, न च तैः मम कश्चिदुपकार इति यावत्। मम - आत्मैव - सङ्कल्परूपं मन एव, भूतभावनः - भूतानि भावयति इति भूतभावनः - सत्ता - तादधीन्यनियमनाद्युपलक्षणमिदम्। भूतानां भावयिता धारयिता नियन्ता च मत्सङ्कल्प एवेति यावत्।

பக்தியினால் ப்ராப்யனான என்னுடைய மாஹாத்ம்யத்தைக் கேட்பாயாக! சேதநாசேதநங்களாகிய அனைத்திலும் நான் உட்புகுந்து வ்யாபித்திருக்கின்றேன். எனது ஸ்வரூபத்தை அவை ஒன்றுமறியமாட்டா. நான் அவற்றைத் தாங்குகின்றேன். என்னை அவை தாங்கவில்லை குடம் ஜலத்தைத் தாங்குவது போல் யான் அவற்றைத் தாங்குகின்றதாக நினையாதே. அதை அது ஸ்வரூபத்தாலேயே தரிக்கும். யானோ எனது ஸங்கல்பத்

திணாலும் ப்ரபஞ்சத்தை தரிக்கின்றவன். இது ஈச்வரனான எனக்கே உரியதொன்று. அந்த ஸங்கல்பத்தினால் ப்ரபஞ்சத்தை உட்புகுந்து நியமித்து தரிப்பவன் யானே. 4, 5

३४३ यथाऽऽकाशस्थितो नित्यं वायुस्सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

सर्वस्यास्य स्वसङ्कल्पायत्तस्थितिप्रवृत्तित्वे निदर्शनमाह–'आकाशस्थितः' 'सर्वत्रगः' इत्याभ्यामीश्वरैकधार्यत्वं तदेकप्रेर्यत्वं च विवक्षितम् । महत्त्वं चान्याशक्यत्वायोक्तम् । यथा महान् - परिमाणतो विपुलः, आकाशस्थितः आकाशे निरालम्बनदेशे, वर्तमानः - वायुः - सर्वत्रगः - सर्वत्र गच्छति, स तु वायुर्निरालम्बनो मदायत्तस्थितिरिति अवश्याभ्युपगमनीयो मयैव धृत इति विज्ञायते, तथा - एवमेव, सर्वाणि भूतानि - चेतनाचेतनात्मकानि, मत्स्थानि - मयि स्थितानि मयैव धृतानि, इति - उपधारय - विजानीहि ।

வாயுவானது பெரியது அது ஆதாரமற்றது. ஆகாசத்திலேயே இருந்துகொண்டு எங்கும் ஸஞ்சரிக்கின்றது. அதற்கு நானே ஆதாரம் என்பதில் ஐயமில்லையே. அவ்வாறாகவே எல்லா வஸ்துக்களுக்கும் யானே ஆதாரம் என்பதாகத் தெளிவாயாக. 6

३४४ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

सकलेतरनिरपेक्षस्य भगवतस्सङ्कल्पात् सर्वेषां स्थितिः प्रवृत्तिश्चोक्ता । तथा तत्सङ्कल्पादेव सर्वेषामुत्पत्तिप्रलयावपीत्याह— हे कौन्तेय, अर्जुन ! सर्वभूतानि - जङ्गमस्थावरात्मकानि सर्वाणि भूतानि, मामिकां - मच्छरीरभूतां, प्रकृतिं - तमश्शब्दवाच्यां नामरूपविभागानर्हाम्, कल्पक्षये, चतुर्मुखावसानसमये, यान्ति, तानि - भूतानि, कल्पादौ - सृष्ट्यारम्भे अहं पुनः - भूयोऽपि विसृजामि - उत्पादयामि ।

ஓ அர்ஜுநா! ப்ரபஞ்சமனைத்தும் ப்ராக்ருத ப்ரளயமெனப் படும் சதுர்முகப்ரளய காலத்தில் எனது சரீரமாகிய தமஸ்ஸு எனப்படும் ப்ரக்ருதியில் லயம் பெறுகின்றன. மறுபடி ஸ்ருஷ்டி ஆரம்பத்தில் அவற்றை நானே ஸ்ருஷ்டிக்கின்றேன். 7

३४५ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

'विसृजामि' इत्युक्तायाः समष्टिव्यष्टिरूपायाः सृष्टेः प्रकारः प्रदर्श्यते— स्वां - स्वकीयां, प्रकृतिं - प्रधानात्मिकां, अवष्टभ्य - अष्टधा परिणमय्य, उपादानद्रव्यस्य कर्त्राऽवष्टम्भो ह्यधिष्ठानम्; तच्चाभिमतकार्यविशेषानुगुण-मध्यमावस्थाप्रापणम्। *'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥' इति प्रागुक्तमष्टविधत्वम्। प्रकृतेः - त्रिगुणात्मिकायाः, वशात् - स्वभावात्, अवशं - अस्वतन्त्रम् इमं - चतुर्विधं देवतिर्यङ्मनुष्यस्थावरात्मकं, कृत्स्नं - सावान्तरभेदं सकलं, भूतग्रामं - भूतानां देवत्वादि जात्यवच्छिन्नव्यष्टिजीवानां ग्रामं समुदायम्, पुनः पुनः - काले काले, विसृजामि - विविधं सृजामि, विचित्रनामरूप-देशकालभोगादियुक्तं करोमि।

முன் சொல்லிய ஸ்ருஷ்டிப்ரகாரம் எவ்வாறென்றால் முதலில் எனது மூலப்ருக்ருதியிலிருந்து மஹான், அஹங்காரம், மனஸ்ஸு, புத்தி, பஞ்சபூதங்கள், என எட்டுவிதமாக ஸமஷ்டி ஸ்ருஷ்டி முதலில் ஏற்படுகின்றது. பிறகு ப்ரக்ருதி பாதந்த்ரமான ஜீவ வ்யஷ்டியை, தேவன், திர்யக், மநுஷ்யன், ஸ்தாவரம் என்று நான்கு ஜாதியுடையதாயும், அவற்றிலும் உட்பிரிவுகள் பற்பலவாகவும் நான் ஸ்ருஷ்டிக்கின்றேன். 8

३४६ न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

विषमसृष्ट्यादीनि कर्माणि नैर्घृण्याद्यापादनेन भगवन्तं न बध्नन्ती-त्याह— हे धनञ्जय! अर्जुन, तेषु - कर्मसु - विषमसृष्टिस्थितिसंहारनिग्रहा-

नुग्रहादिषु कर्मसु, असक्तम् - प्रयोजकत्वरूपसम्बन्धरहितम्, असक्तत्वे दृष्टान्त उच्यते- उदासीनवत् आसीनं इति । यथा कस्मिंश्चित् कर्मणि उपेक्षकः तत्र प्रयोजकत्वरूपसम्बन्धरहितः, तथा कर्तृत्वे सत्यपि तस्मिन्नंशे प्रयोजकत्वरहितं, मां, तानि कर्माणि - विषमसृष्ट्यादीनि, न च निबध्नन्ति - नैर्घृण्यादिदोषदुष्टं न कुर्वन्ति, क्षेत्रज्ञानां पूर्वकृतान्येव कर्माणि देवादि-विषमभावहेतवः नत्वहं तत्र प्रयोजकः । चश्शङ्कानिवृत्तौ ।

அர்ஜுனா ! ஸ்ருஷ்டி முதலியவை நான் செய்கின்றேனேயாகிலும் ஒருவன் தேவனாகவும் மற்றொருவன் மனுஷ்யனாகவும் இவ்வாறான வேற்றுமைகளுக்கு அவரவர்கள் புண்ய பாப கர்மாக்களே காரணமின்றி நான் காரணமல்ல. அவ்வேற்றுமையில் உபேக்ஷகன் யான். ஆதலால் தயை இல்லாமை, பக்ஷபாதம் என்றுப்போலுள்ள தோஷங்கள் என்னிடம் கிடையா. 9

३४७ मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्धि परिवर्तते ॥ १० ॥

यदि कर्मानुगुणा विषमसृष्टिः, तर्हि प्रकृतिरेव परिणामशीला तदनुगुणं परिणमतां, किं त्वयेत्यत्रोच्यते– हे कौन्तेय, प्रकृतिः - तमश्शब्द-वाच्या नामरूपविभागानर्हा, अध्यक्षेण - साक्षात्कर्त्रा, मया - अधिष्ठात्रा-सचराचरं - जङ्गमस्थावरसहितं जगत्, सूयते - उत्पादयति । 'जगत्' शब्दः पूर्वार्धेऽप्यन्वेतव्यः । 'प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः' इति पूर्वोक्तरीत्या मदधिष्ठानवशात् प्रकृतिः परिणमते । न तु स्वतन्त्रा, अतो नोक्तचोद्यावकाशः । अनेन हेतुना - क्षेत्रज्ञकर्मानुगुणमत्सङ्कल्प-रूपकारणेन, जगत् - सचराचरम्, परिवर्तते हि - प्रलीयते किल । सृष्टि-हेतुरीक्षणमेव प्रलयहेतुरपि इति यावत् ।

ஓ அர்ஜுனா ! என்னுடைய ஸங்கல்பத்தினாலேயே மூல ப்ரக்ருதியானது ஜங்கமஸ்தாவரரூபமான ப்ரபஞ்சத்தை உண்டு

பண்ணுகின்றது. ஜகத்தின் ப்ரளயமும் என்னுடைய ஸங்கல்பத்தினாலேயே ஆகலால் மூலப்ரக்ருதியையும் ப்ரேரணம் செய்பவன் யானே. அது ஸ்வதந்த்ரமன்று. 10

२४८ अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥

महात्मनां विशेषं वक्तुं मूढानां स्वभाव उच्यते— भूतमहेश्वरं - सर्वभूतानां महान्तं ईश्वरं, मानुषीं तनुं आश्रितम् - सर्वसमाश्रयणीयत्वाय मनुष्यसम्बन्धिनं देहं रामकृष्णादिरूपं परिगृहीतवन्तं, मां- मम- परं भावम् - प्रकृष्टं परमात्मत्वं, अजानन्तः, मूढाः - अविवेकिनः, अवजानन्ति - इतरसजातीयं मत्वा तिरस्कुर्वन्ति ।

நான் ஸர்வேச்வரனாயிருக்கச் செய்தேயும் ஆச்ரிதர்களை உய்விப்பதற்காக ராமகிருஷ்ணாதி மனுஷ்யாவதாரம் செய்கின்றேன். அறிவிலிகள் இவ்வுண்மையை அறிவதில்லை. ப்ராக்ருத மனுஷ்யனாகவே என்னை நினைத்து அவமதிக்கின்றார்கள். 11

२४९ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

प्रस्तुतस्य परमेश्वरतिरस्कारस्य हेतुफले प्रतिपाद्येते- राक्षसीं - रक्षस्सम्बन्धिनीं तामसीं, आसुरीं चैव - असुरसम्बन्धिनीं राजसीं क्रोधलोभादिमयीमपि च, मोहिनीं - भगवत्परत्वतिरोधानकरीं, प्रकृतिं - स्वभावं, श्रिताः - अधिगतवन्तो जनाः, विचेतसः - सर्वत्र विगतयाथात्म्यज्ञानाः, अत एव मोघज्ञानाः - सर्वेष्वर्थेषु विपरीतज्ञानतया निष्फलज्ञानाः, स्वाधीनप्रवृत्त्यभिमतफलराहित्यमेव ज्ञानस्य निष्फलत्वम् । तत एव मोघाशाः - मोघाः आशाः येषां ते निष्फलवाञ्छिताः, अत एव मोघकर्माणः - निष्फलारम्भाः, भवन्ति इति शेषः । यदुद्दिश्यारम्भान् कुर्वते तत्सर्वं निष्फलं भवतीति यावत् ।

என்னுடைய உண்மையை மறைக்கக்கூடிய ராக்ஷஸஸ்வபாவத்தையும் ஆஸுரஸ்வபாவத்தையும் பெற்றவர்களுக்கு எல்லாவற்றிலும் தத்துவஞானத்தை இழந்தமையால் ஞானம் பயனற்றதாகி எண்ணமும் நிஷ்பலமாகி செயலும் வீணாகின்றது. என்னை அவர்கள் திரஸ்காரம் செய்வதற்குக் காரணம் அவர்களுடைய ஸ்வபாவம். 12

३५० महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

एवमवज्ञाप्रवृत्तमूढभूयिष्ठे लोके निष्फलस्तवावतार इति शङ्काया-
मवतारसाफल्यकारिणां महात्मनां वृत्तकथनव्याजेन भक्तिं प्रसञ्जयति–
हे पार्थ ! दैवीं - सात्त्विकीं, प्रकृतिं - स्वभावं शमदमादिलक्षणां आश्रिताः -
प्रपन्नाः, महात्मानस्तु - अक्षुद्रचित्तास्तु, मां - साधुपरित्राणाय मनुष्यत्वे-
नावतीर्णं मां, भूतादिं - भूतानां आदिकारणं, अव्ययं - ज्ञानसङ्कोचादि-
हेयरहितं, ज्ञात्वा, अनन्यमनसस्सन्तः अतिप्रियत्वातिरेकेण मद्भजनेन
विना मनसश्चात्मनश्च बाह्यकरणानां च धारणं अलभमानाः, भजन्ति -
मद्भजनैकप्रयोजनाः, सेवन्ते ।

ஸாத்விகஸ்வபாவரான மஹாத்மாக்களோ வென்னில் என்னை ஜகத்காரணமாயும் ஜ்ஞானஸங்கோசமில்லாதவனாகவும் தெளிந்து என்னுடைய பஜனத்தையே ப்ரயோஜனமாகக் கொண்டு பஜனம் செய்கின்றார்கள். 13

३५१ सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

भजन्तीत्युपासनं प्रसक्तम् ; अथ तदेव कीर्तनयतननमस्कारेषु प्रेरयदत्यर्थप्रियत्वलक्षणावस्थया विशेष्यते— 'सततं' इति 'भक्त्या' इति च कीर्तनयतननमस्कारनित्ययुक्तत्वोपासनेषु पञ्चसु अविशेषेणान्वेति, मां परमात्मानं, सततं - अनिशं, भक्त्या कीर्तयन्तः - भगवन्नामसङ्कीर्तनं

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

——:o:——

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ हेविळम्बि - धनुः [सं ४

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

DECEMBER, 1957

For the rate of subscription please see inside.

# UDYANA PATRIKA.


Annual Subscription  **Rs. Two only.**

Do. With Sastraic Supplement  Rs. 3—0—0


## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।


निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D.T. Tatacharya Siromeni, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयाः ॥


1 श्रद्धातद्दशाननम् ।
2 अभिनवा अचार्यचरणाः ।
3 मुकुन्दमाला ।
4 राज्यविपर्ययः ।
5 कश्यपोचरथ्यागस्त्यवसिष्ठमहिमा ।
6 विमर्शगोष्ठी ।
7 प्रकृतिभेदः ।

सध्वानगह्वरमुखैरभिनीतगीतिः
प्रस्फोटशब्दकृततालइव प्रनृत्तः ॥ ८९ ॥

पुरन्दरः— अहो बाहुपराक्रमो दुर्वृत्तस्य । न जाने किं प्रतिपत्स्यते कैलासनाथ इति । दिष्ट्या स्वैरपचारैरासन्नविनिपातो दुरात्मा ।

वाचस्पतिः— (दृष्ट्वा साश्चर्यम्) अथेदानीं सहसा प्रकृतिस्थः शैलकूटः ।

पुरन्दरः— एवमेतत् । अमी किल—

पुनर्लब्धस्वास्थ्याः सरभसमथोत्थाय हि गणा
विचिन्वन्तो भूपात्रवनमुकुटादीनि परितः ।
भ्रमन्ति स्वैर्गात्रैरलघुदृषदुरुपिष्टविकलै-
र्वहन्तो धातूनां विविधकृतवैवर्ण्यरचनाः ॥ ९० ॥

वाचस्पतिः— अमी पुनरन्ये,

दिष्ट्येति संश्लिष्य वधूसुतादीन्
सन्दृशन्ति केचिन्नयनैः सबाष्पैः ।

(दृष्ट्वा सहासम्)

असौ गजास्यः कुतुकाय कार्यं
विलोठयत्यद्रितटीष्वभीक्ष्णम् ॥ ९१ ॥

(सविमर्शम्) तत्कथमेतत् ?

अधरोत्तरमापाद्य विपर्यासं च वा बहु ।
क्षणेन मदनिर्मुक्त इव शैलो व्यवस्थितः ॥ ९२ ॥

(नेपथ्ये महान् विरावः)

वाचस्पतिः— अयं व्यथमानः फूत्करोति पौलस्त्यहतकः । दिष्ट्या अनुदासीनः परमेश्वरः ।

पुरन्दरः— नूनं महादेवसङ्कल्पेन स्थिरीभूतः कैलासः पिनष्टि पापिष्ठम् ।

वाचस्पतिः— अहो दुःश्रवो रवः ।

दशभ्यो वक्त्रेभ्यः स्फुटघटिततारस्वरमसौ
हठादुद्यन् कर्णौ व्यथयति पविस्फोटविकटः ।

प्रतिध्वानैः पीनैर्मुखरयति दिक्कुञ्जकुहरा-
ण्यचर्याः साश्चर्या भयपरिगताः प्राणिनिवहाः ॥ ९३ ॥

पुरन्दरः— दिष्ट्या शत्रोरार्तस्वरं शृणुवः। गुरो, बद्धः पापिष्ठः। भग्न-भुजश्च प्रशान्तो भविष्यति। तदन्यं भगवतः सेवावकाशमन्विष्यावः। क्षीयमाणमिवाशरपशु पश्यामि। यत्तर्जनगर्जनानि मुक्त्वा तार-प्ररोदः संवृत्तः।

वाचस्पतिः— भोः,

कारुण्येन च चण्डिम्ना दुःश्रवो रक्षसो रवः।
मनो व्यथयति क्षिप्रं रिपोरपि रुजोत्कटः ॥ ९४ ॥

पुरन्दरः— भवतु। यक्षेश्वरः प्रतिनन्दिष्यति वार्तामिमाम्। साम्प्रतमेव पुनरावासयितव्या अलका। किं निवर्तावहे।

वाचस्पतिः— एष भृङ्गिरिटिरायाति।

(ततः प्रविशति भृङ्गिरिटिः)

भृङ्गिरिटिः— मत्प्रतीक्षाविधैतौ वासववाचस्पती। (इत्युपसर्पति)

वाचस्पतिः— भद्रं भोः, भृङ्गिरिटे, कोऽन्वसौ वृत्तान्तः।

भृङ्गिरिटिः—

पादाङ्गुष्ठं नमयति विभुः पीडितस्तेन शैलः
पापात्मानं दशमुखमधःप्रोतबाहुं पिनष्टि।
सोऽयं रौति प्रणदति रटत्यञ्जसा फीट्करोति
स्वैरेवास्रैरुपचितसरश्चण्डमण्डूकलक्ष्यः ॥ ९५ ॥

पुरन्दरः— सुष्ठु खलु व्यपनीताऽस्य रक्षसः भुजदर्पकण्डूः महाग्रावो-च्चयघर्षणेन।

भृङ्गिरिटिः— बाढम्। अद्य खल्वस्य बलवीर्यदृप्ता भुजा निष्पेषयन्त्र-ग्रथितानामिक्षुकाण्डानां दशामनुभवन्ति।

वाचस्पतिः— यावदशिथिलं भगवतः पादाङ्गुष्ठो गिरिपृष्ठे निष्ठितः तावत् अस्मादृशानां स्वस्तिमती स्थितिः।

पुरन्दरः— भृङ्गिरिटे, कीदृशो भगवतः सेवावकाशः ।

भृङ्गिरिटिः— (स्वगतम्) न खलु देवयोर्मानकलहमन्तरेण किमपि प्रज-ल्पितव्यम् । एवं भवतु । (प्रकाशम्) रक्षःप्रक्षोभकातरां देवीं समाश्वासयन् तिष्ठति देवः । तत्प्रतिपाल्योऽवसरः ।

पुरन्दरः— भवतु । पश्चात् सेविष्यावहे । उपरतप्रायो रिपुरिति मन्ये । यदि तावत् कृपालुः नान्तरा मोचयिष्यति तदा शक्यमस्माभिर्निर्भयैः सञ्चरितुम् ।

भृङ्गिरिटिः— आशुतोषो नः स्वामी । तस्मिन्नपराद्धोऽपि लघुनापि प्रियाचरणेन नैर्ऋतेन्द्रः न केवलं न नङ्क्ष्यति परं तु वरलाभेन वर्धिष्यते इति प्रत्येमि ।

पुरन्दरः— अहो अत्याहितम् ।

बृहस्पतिः— किं तल्लघु प्रियाचरणम् ।

भृङ्गिरिटिः— (स्वगतम्) हा धिक्, निर्भिन्नं मया रहस्यम् । (प्रकाशम्) यत्किञ्चित् घुणाक्षरन्यायेनासङ्कल्पोपहितं विरुद्धाचरणस्यापि संभाव्यते नाम ।

बृहस्पतिः— कुतः संभाव्यते ? स्फुटं भण यदि न रहस्यम् ।

भृङ्गिरिटिः— (स्वगतम्) अद्यैव रहस्यभेदी जनः शापमाप । सङ्कटे खलु पतितोऽस्मि । किमिदानीं करोमि । भवत्वेवं तावत् । (प्रकाशम्) आह भगवान् नन्दी भवन्तौ न चिरादभिभाषिष्ये इति । स एव जानाति कथमिति ।

पुरन्दरवाचस्पती— (परस्परं सशङ्कं पश्यतः)

(नेपथ्ये हाहारवः)

पुरन्दरः—(सोच्छ्वासम्) मा तावत् स धूर्तः 'भक्तिपारवश्यात् सपीठं भगवन्तं सपार्षदं शिरोऽधिरोप्य नर्तितुं प्राक्रंसि । नान्यथा सम्भावनीयम्' इति श्लक्ष्णमुक्त्वा छलयिष्यति वरदानविश्रृङ्खलम् । जागर्तु पार्श्वे नन्दी ।

वाचस्पतिः—(स्वगतम्) अहो विरसमुपन्यस्तं दुरभ्यस्तप्राभववासनाकुलितमतिना।

भृङ्गिरिटिः—(स्वगतम्) अहो प्रश्रयव्यपेतानि दुर्भाषितानि दुर्मेधसां वित्तेश्वराणाम्। (प्रकाशं सवैलक्ष्यम्) यथार्हं प्रतिबोध्यतां तावन्नन्दी।

वाचस्पतिः— को न्वयमद्रिशिखरे फीट्करोति।

पुरन्दरः— न तावत् स जाल्मः पुनः प्ररूढबलः—

भृङ्गिरिटिः— (दृष्ट्वा सहासम्) अहो प्रहसनम्।

> प्रवेश्य शुण्डामुपलान्तराले
> क्वचित्ससीत्कारगुरुप्रकम्पः।
> तले तताङ्घ्रिः कृतकर्णतालः
> फीट्कारमुन्मुञ्चति कुञ्जरास्यः॥ ९६॥

पुरन्दरवाचस्पती— (हसतः)

भृङ्गिरिटिः— पार्श्वगतं कुमारं विनोदयितुं भ्रातृवत्सलस्येदं क्रीडितम्। (स्मृत्वा) द्रष्टव्यौ मे वत्सौ।

पुरन्दरः— स्वनियोगमनुतिष्ठतु भवान्। आवामपि कुबेरं समाश्वास्य तमेव पुरस्कृत्य भगवद्दर्शनावसरं प्रतिपालयिष्यावः।

इति सर्वे निष्क्रान्ताः।

इति पञ्चमोऽङ्कः।

---

# अथ षष्ठोऽङ्कः ।

ततः प्रविशन्ति विषण्णा विद्युज्जिह्व-महोदर-प्रहस्ताः कैलासमूले निषण्णाः ।

महोदरः— (सपरिदेवनम्)

विद्युज्जिह्व, विचेतनो निशिचराधीशः प्रहस्त, प्रभु-
र्हस्तैरद्रिनियन्त्रितैरशरणः शेतेऽत्र लङ्केश्वरः ।
हा मातामह, केकसीप्रियसुतं जानासि नैतादृशं
हा धिक् ! किं करवाम का गतिरहो भर्ता कथं मोक्ष्यते ॥ ९७ ॥

प्रहस्तः— हा धिक् ! एवं भो दिक्पतिविजयाशंसा पर्यणंसीत् ।

विद्युज्जिह्वः— पश्यतु भवान् परिभवम्—

वियति मिलिताः सद्यः स्वर्गौकसो धृतकौतुका
अयि निपतितः शत्रुर्दिष्ट्येति संप्रणदन्त्यमी ।
कितव सदृशं जातं भुङ्क्ष्वैनसः फलमित्यहो
विबुधसुदृशः सन्दष्टोष्ठा रुजन्ति निजाङ्गुलीः ॥ ९८ ॥

प्रहस्तः— कष्टं बत भोः, यदसमीक्ष्यकारिभिः दिक्पालकसाधारण्येनावज्ञातो महेश्वरः । न च स्मृतं सार्वभौमोऽयं सुरासुराणाम् ऋजुःप्रकृत्या दयालुश्च, विशेषतोऽस्मत्पितामहचरणानां वरप्रदायी, झटित्यस्माभिर्वरिवस्योपहारपरितोषणीय इति ।

विद्युज्जिह्वः— विशीर्णमस्मन्मन्त्रबलं यत्सन्धेयानभिषेणयामो यातव्यांश्चोपेक्षामहे ।

महोदरः— नाकलोकं प्रस्थितान्नः सुरकार्यलम्पटः स कपटनाटकवटुः ज्ञातिधर्ममनुसृत्य अन्तर्हितदुरुदर्कैः आपातसमञ्जसैस्तैश्छलयामास ।

प्रहस्तः— स एवास्माकमद्य दुर्निमित्तं जातः ।

विद्युज्जिह्वः—चतुरः स प्रतिबध्नन्निव निषिद्धे नः प्रवर्तयामास ।

प्रहस्तः— एवं प्रवीणाः सुरहितैषिणः। अस्माकं तु शौर्यमेकं परायणम्। (श्रुत्वा) महोदर, स्वामिनः पार्श्ववर्ती भव। निःसहं हुङ्करोतीव वेदनया।

महोदरः— तथा (इति निष्क्रान्तः)

प्रहस्तः— विद्युज्जिह्व, सर्वमिदानीमाकुलीभूतम्— क्षेमं नः यदि स्वामी केवलमपोद्धृत्य बाहून् अभ्यर्थितासुः परावर्तते लङ्काम्। पश्य,

यक्षाणामलका पुनः करगता नष्टं च नः पुष्पकं
कीर्तिः कश्मलिता भुजा विमथिताः प्राप्तोऽवमानः परः।
मोघाः सर्वमनोरथाश्चिरधृता दैत्याधिराज्याश्रया
अस्मिन् मत्कुणपेषमाशरपतौ पिष्टे हरस्याङ्घ्रिणा॥ ९९॥

विद्युज्जिह्वः— तत् कीदृगिदानीं हरप्रीणनमाचरितव्यम्?

प्रहस्तः— स्वामी खलु तव विज्ञाप्यः।

प्रविश्य

महोदरः— स्वामी व्रणज्वरेणोन्मादावस्थायामिव वर्तते।

तथा हि—

हा मन्नन्दन, मेघनाद, न रिपून् बध्वा तवोपाहरं
हा मन्दोदरि, मन्दभागिनि मुधा जीविष्यसि प्रेयसि।
ध्वस्ते मय्यमरप्रभापहमहादर्शश्रियामासह-
स्त्वंहो राक्षसपुङ्गवाः कनु लयं यूयं भिया प्राप्स्यथ॥ १००॥

इति प्रलपति। करुणं च विचेष्टते।

उद्वेल्लति त्रुटितपन्नगपुच्छतुल्यं
निःश्वासदीर्घमधरान् दशति प्रगाढम्।
उद्वृत्तविंशतिविलोचनपिङ्गलिम्ना
श्मश्रूणि रञ्जयति शश्वदिवोच्छिखानि॥ १०१॥

प्रहस्तः— विद्युज्जिह्व, पितरं मे समानय स जानात्यत्र प्रतिविधानम्।

विद्युज्जिह्वः— प्रागेव किल शुकः प्रेषितः ससहस्रकुलं मातामहमानयेति। कुतोऽद्यापि न दृश्यते।

महोदरः— सर्व एव मन्त्रो विपर्यस्तः । हा धिक् ।

प्रहस्तः— विद्युज्जिह्व, कदाचिदलकापरिसरे असानपश्यन् पर्यटति । तदन्विष्य वृत्तान्तमावेद्य इहानय ।

विद्युज्जिह्वः— यद्यलकां प्राप्तस्तदा यक्षहर्यक्षाणां क्ष्वेडितकोलाहलेनैव ज्ञात्वा विपरीतम् उपरि वृत्तान्तकातरः परिभ्रमन् यदृच्छावशादिहाप्युपेयात् । तत्कुतोऽन्विष्यते ।

प्रहस्तः— छिद्यतां ते आलस्यकथा ।

महोदरः— (दृष्ट्वा) इतः समभिवर्तते सुहृद्गोष्ठी । पृष्ठतश्च ते पिता ।

ततः प्रविशति

शुकसारणाभ्यां निर्दिश्यमानमार्गः मारीचेन सह सुमाली ।

शुकसारणौ— अत्रामी लङ्केश्वरामात्याः ।

मारीचः— किममी विविक्ते तिष्ठन्ति ।

(प्रहस्तादयः शोकं नाटयन्तः उत्तिष्ठन्ति)

सुमाली—(परिक्रम्य दृष्ट्वा सामर्षम्) भोः किं शोचथ ? भवद्भिर्हि मन्त्रिमहत्तरैरपथेऽपकृष्टो राजा । प्रहस्त, त्वमपि खलु मूढो जातः ।

न ते ज्ञातं मात्रा गिरिशिरसि सन्ध्यातनयया
परित्यक्तं गर्भं द्युतिविजितसूर्यं प्ररुदितम् ।
वृषारूढो गच्छन् वियति भगवान् सार्धमुमया
भवो दृष्ट्वा (सास्रम्) यत्नः पितुरयमकार्षीत्करुणया ॥ १०२ ॥

तदा च,

व्याजीकृत्य सुकेशं सर्वेषामप्यकल्प्यत प्रभुणा ।
सद्यो गर्भोत्पत्तिः प्रसूतिरपि नो वयःप्राप्तिः ॥ १०३ ॥

अथान्येद्युः,

सुकेशतनयानां नो निग्रहाय सुरार्दिनाम् ।
प्रार्थितो भगवानूचे यत्तु तद्विस्मृतं नु वः ॥ १०४ ॥

विद्युज्जिह्वः— कथं विस्मरिष्यामः।

सुकेशे सापेक्षः प्रभुरथ सुरानाह रुदतो
भषद्भिर्विद्राव्य प्रतिदिशमविश्रम्य मृदितान्।

करौ धून्वन् यात प्रचलत न वध्या मम वरै-
रमी वीर्योपेता मयि विहितभावा इति किल ॥ १०५ ॥

प्रहस्तः— जानतामेव प्रमोहः कुतोऽपि जातः।

महोदरः—भर्तुः प्रकृतिसिद्धया विजिगीषुतया तिरोभूता विशेषसंस्काराः।

मारीचः – एवमतीते कार्यकाले मुधाऽस्माकं बुद्धिः प्रसीदति।

सुमाली— मारीच, अस्ति मे प्रत्ययः इदानीमपि, यत्—

सुकेशतनयस्यैनं दौहित्रं सान्त्वितः प्रभुः।
महादेवोऽपिराड्व्याद्व्ययः करुणाम्बुधिः॥ १०६ ॥

महोदरः—बाढम्। अस्मासु सापेक्षतयैव कैलासनाथः अपराधकर्तुः बाहु-मात्रं निपीड्य तं सावशेषजीवितं करोति।

सुमाली— जगत्पितुः कुतः कोपः सापराधेषु जन्तुषु।
यथोचितं शिक्षणं तु प्रकृष्टोदर्कहेतवे ॥ १०७ ॥

तद्दर्शयत मे मार्गं वत्सदर्शनाय। समाश्वास्य वत्सं क्षिप्रमेव तस्मै हित-मुपदिशामि।

(सर्वे चलन्ति)

विद्युज्जिह्वः— कथं सारणमारीचौ मातामहेन सङ्गतौ? कीदृशीदानी-मलका?

सुमाली— महादेवसखः कुबेर इति, कैलासपरिसर इति च विचिन्त्य शुकसमागमक्षण एव युष्मद्विचेष्टितेषु जाताशङ्कः प्रास्थिषि कैलासं प्रति। अस्मिन्नेवान्तरे प्रत्यागतानां यक्षाणां कोलाहलेन विदितस्वामिभङ्गौ निर्गतौ सारणमारीचौ प्रत्यासीदन्तं मामिदमित्थमिति बोधयामासतुः। सर्वथा दुष्करमाचरितम्। (सहसा दृष्ट्वा) अये वत्सः। (सविषादम्) हन्त भोः कारुण्यम्—

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३१] कलि ५०५८ हेविलम्बि - धनुः [सं ४


## अभिनवा आचार्यचरणाः ॥

:o*o:

श्रीमद्- अहोबिलमठदिव्यास्थाने द्विचत्वारिंशे पट्टे मूर्धाभिषिक्तानां श्रीरङ्गशठकोपयतीन्द्रमहादेशिकानां ज्ञानवैराग्यानुष्ठानानि यथा, तथा औदार्यमपि अभ्यधिकं लोकप्रसिद्धम् । तेषु कीर्तिशेषतां गतेषु श्रीवीरराघवशठकोपयतीन्द्रमहादेशिकाः तस्मिन् स्थाने मूर्धाभिषिक्ता अभवन् । तीर्थक्षेत्रयात्राहेतोः शिष्यवर्गानुग्रहाय च उत्तरदेशयात्रायां स्थितास्ते मासात्पूर्वं नैमिशारण्ये किञ्चिदस्वास्थ्यं प्राप्य परमं पदमगच्छन् । एषामनुग्रहेण तस्मिन् दिव्यास्थाने चतुश्चत्वारिंशे पट्टे मूर्धाभिषिक्ताः पूर्वाश्रमे मुकूर राजगोपालाचार्याः इति प्रसिद्धा महान्तः 'श्रीवण् शठकोपश्रीवेदान्तदेशिकयतीन्द्रमहादेशिकाः' इत्यभिख्यया सम्प्रति विराजन्ते । श्रीसन्निधौ चिरात् आस्थानविद्वत्पदमलङ्कृतवन्त इमे, सभाकाले अन्यदा च सविधं गच्छतां विदुषां अपेक्षितसर्वसौकर्यसंविधाने यथार्हसम्भावनालम्भने च सोत्साहं स्वयं प्रवृत्ताः असाधारणीं उदारमनस्कतामात्मनः सुप्रकाशितवन्तः । त इमे स्वयमद्य तदाचार्यपदं यदधितिष्ठन्ति तन्नूनं विदुषां धर्मस्य च महद्भाग्यम् ।

# मुकुन्दमाला ॥

शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसम्पूज्यमन्त्रं
संसारोत्तारमन्त्रं समुपचिततमस्सङ्घनिर्याणमन्त्रम् ।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्टसन्त्राणमन्त्रं
जिह्वे श्रीकृष्णमन्त्रं जपजप सततं जन्मसाफल्यमन्त्रम् ॥ २३ ॥

एवं नारायणमन्त्रमात्रस्य तदर्थावगमपुरस्सरं शरणागतिरनुष्ठेयेत्युपदिदेश। अन्ते च शरणागतेरुपदेष्टारं भगवन्तं कृष्णं स्मृत्वा प्रार्थनामकरोत् । अथाद्य कृष्णमन्त्रमात्रस्यापि तथा कर्तुं शक्यमित्यभिप्रेत्य तदावर्तनाय जिह्वां प्रार्थयते– शत्रुच्छेदेति ।

शत्रवः कामक्रोधलोभमोहमदमत्सररूपाः अन्तःशत्रवः । तेषां नाशनाय उपयोक्तव्यः एको मुख्यो मन्त्रः श्रीकृष्णमन्त्रः । 'न क्रोधो न च मात्सर्यम्' इत्युक्तरीत्या तन्निवृत्तिरनेन भवति ।

> त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
> कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥

इति भगवता उपदिष्टं तत्परित्यजनं विवेकिनां प्रथमकर्तव्यम् । तत्र सर्वसुकरः एक उपायः श्रीकृष्णमन्त्रजप एव । कोऽस्य मन्त्रस्य विशेष इति चेदुच्यते । उपनिषद्वाक्यरूपः अत एव पूज्यः अयं मन्त्रः । 'ब्रह्महत्यां तरति' इत्यादिभिः कलिसन्तरणोपनिषद्वाक्यैः स्तुतश्चायं मन्त्रः । सकलं यथा तथा, एकमपि उपनिषद्वाक्यं अपरित्यज्य सामस्त्येन उपनिषद्वाक्यैः सम्पूज्यः । 'सर्वैः' इति पर्यवसितम् । कृष्ण एव हि कारणं ब्रह्म ।

संसारादुत्तारहेतुः मोक्षरूपोत्तमपुरुषार्थप्रदः । कथम ? अनादिकालात् समुपचितं राशीभूतं तमः तमोगुणविजृम्भणफलभूतं कर्म तत्सङ्घस्य आत्यन्तिकविनाशकारी खल्वयं मन्त्रः । अतः संसारोत्तारहेतुः ।

ये यदैश्वर्यमिच्छन्ति देवानां मानुषाणां मुक्तानां वा सम्बन्धि, तेषां तस्य सर्वस्य साधकः । न परमेवमिष्टप्राप्तिकृत अपि तु अनिष्टनिवृत्ति-

कदपि। इदमभिप्रेत्योच्यते– व्यसनेत्यादि। व्यसनं विपदेव भुजगः सर्पः तेन यः सन्दष्टो जनः तस्य ततो रक्षणकारी।

इत्थमिष्टानिष्टप्राप्तिपरिहारहेतुत्वमुक्तम्। न परमेतावत्। अन्योऽपि कश्चिद् विशेषोऽस्तीत्याह– जन्मेति। अस्य मन्त्रस्य जपो न क्रियते चेत् मनुष्यजन्मेदं व्यर्थमेव स्यात्। अस्य हि जन्मनः एतन्मन्त्रजपेनैव फलवत्ता।

'हे जिह्वे' इति 'जिह्वे कीर्तय केशवं' इत्यत्र पूर्वमुक्तरीत्या सम्बोधनं करोति।

श्रीकृष्णमन्त्रम्। 'हरे कृष्ण, हरे कृष्ण, कृष्ण कृष्ण हरे हरे' इति वा 'श्रीकृष्णाय नमः' इति वा अयं मन्त्रः। जपजपेति त्वरायां आदरातिशये वा द्विरुक्तिः। सततं सर्वकालम्, अविच्छेदेन। सकल-मित्येतत् इहापि अन्वेतुं शक्यम्। सकलं अविकलं जपेति।

---

# राज्यविपर्ययः॥

## (7)

### ( मन्त्रिसभा )

गुरुदत्तः– अत्र भवान् अकम्पनः सचिवैः साकमत्र उपस्थितः, अमात्य-प्रभुणा सम्भाषणकुतूहली। अस्मत्प्रदेशमागतानामेषां कश्चन कालः अत्यगात्। अस्मासु किमपि किमपि एते भाषन्ते। न तत्सर्वं वयं स्फुटं प्रतिपद्यामहे। इमे तु अभङ्गुरेण, प्रत्युत उपर्युपरि वर्धमानेन, उत्साहेन वर्तमानां राज्यशासनश्रेणिं संस्थाप्य अन्यादृश्याः प्रतिष्ठापनं कर्तव्यं पुनः पुनः सानुरोधं सनिर्बन्धं कथयन्ति। अमात्यप्रभुरेव तत्र यथोचितमुत्तरं दातुं प्रगल्भ इति इमं श्रमं अत्रभवते दत्तवन्तः स्मः। तेषां मुखात् तदीयमाशयं विदित्वा कर्तव्यं कर्तुमर्हति अत्रभवान्।

अमात्यः– आर्य गुरुदत्त, अन्ये च पौरा महान्तः, अहं च, मादृशा अन्ये च, यूयं च सर्वे, महाराजस्य स्वजनाः। सोऽस्माकं योगक्षेमनिर्वाहे दत्तदृष्टिः पिता। तस्मात् अस्मिन् महति विषये स्वयं किमपि अकु-

र्वन्तः महाराजसन्निधं यद् भवन्तः आगच्छन्ति स्म । तदत्यन्तं युक्तं अत्यन्तमभिनन्दनीयम् ।

सुभद्रः— अमात्यप्रभो; महाराजः कामं महाभागः । सोऽस्माकं देवः । भवांस्तु पिता योऽस्माकं सुलभः, सूपसर्पणः सर्वार्थसम्पत्तौ सर्वानर्थनिवृत्तौ च दत्तदृष्टिः कर्तव्यकारी च ।

अमात्यः— नैवमेतदार्याः । सर्वोऽयं महाराजस्य प्रभावः यत् पौरजानपदाः सर्वे सुसुखं जीवन्ति । अहं पुनः केवलं तदाज्ञाकारी साधारणो जनः । युष्मास्वन्यतमः । भवन्तो जानन्ति यदाह महाकविः—

सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं वाऽभविष्यदरुणस्तमसां विभेत्ता
तं चेत्सहस्रकिरणो धुरि नाकरिष्यत् ॥

इति । तदद्य श्रीमान् अकम्पनो वाऽन्यो वा सत्सुहृत् यद्विवक्षति तदसङ्कोचं स्फुटं वक्तु । तदहं सादरं श्रोष्यामि । अवधार्य महाराजे विज्ञाप्य निर्णयं पश्चाद् ज्ञापयिष्यामि । (सर्वे अकम्पनं पश्यन्ति)

अकम्पनः—(अपवार्य सुहृदः प्रति) नूनमयं महानुभावो मन्त्री । अस्य पौराणां च मिथः हन्त कियान् अनुरागः महाराजे कियती प्रतिपत्तिः । अस्य सन्निधौ मूढं मे मनः । वक्तव्यं न किञ्चित् स्फुरति । सर्वं विस्मृतवानस्मि । भवतु किमपि वक्तुमारभे । क्रमेण मन्ये विषयाः प्रतिभास्यन्ति । उत्थाय (अमात्यं प्रति) आर्य अमात्य ... ...

अमात्यः— अत्रभवान्नु अकम्पनः ? साधु । अथात्रभवतः सखायः ?

अकम्पनः – (उत्थितान् सुहृदो निर्दिश्य) इमे ।

अमात्यः— कुत्र नु भवन्तः सर्वे इह वसन्ति ? अपि नाम अपेक्षितं सौकर्यं सर्वं सम्पन्नम् ? यदि किमप्यावश्यकं, सर्वं महाराजः प्राप्तं करिष्यति ।

अकम्पनः— आर्य अमात्य, सज्जनैकमये अस्मिन् पुरे अस्माकं न किञ्चिन्न सुलभम् । सुखं वयं सर्वे वसामः ।

अमात्यः— प्रीतोऽस्मि भवतो वाचं श्रुत्वा । आतिथेयत्वं जनानामभ्यर्हितम् । अथात्र भवतो यद् विवक्षितं तच्छ्रवणे कुतूहलवानस्मि ।

(अस्यानुवृत्तिः ३७ पुटे द्रष्टव्यः ।)

# कश्यपोचथ्यागस्त्यवसिष्ठमहिमा ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

——:o❀o:——

अयं श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि द्वयोरध्याययो-र्वर्ण्यते—

वायुः कार्तवीर्यमेवमब्रवीत्— 'राजन्, पुरा अङ्गो नाम नृप इमां भूमिं द्विजातिभ्यो दक्षिणां दातुमैच्छत्। ततो मही 'वरोऽयं नृपस्सर्वभूत-धारिणीं ब्रह्मणस्सुतां मां प्राप्य कथं द्विजेभ्यो वितरितुं वाञ्छति। साऽहं भूमिभावं त्यक्त्वा ब्रह्मणः पदं गमिष्यामि। अयं नृपतिस्सराष्ट्रो माभूत्' इति विचिन्त्य ययौ। तदनु कश्यपो व्रजन्तीं तां पृथिवीमालोक्य सपदि योगप्रवणमनाः पृथ्वीं प्रविवेश। अथ धरणिस्सर्वतस्तृणौषधिसमन्विता नष्टभया समृद्धा च बभौ। विपुलव्रतः कश्यप एवं दिव्यानि त्रिंशद्वर्ष-सहस्राण्यतन्द्रितस्सन् क्षितिरासीत्। ततो भूरागम्य कश्यपं नमस्कृत्य तस्य महात्मनः पुत्रीभूत्वा काश्यपीति व्यपदेशमलभत। एष कश्यपो ब्राह्मण ईदृशः।

राजन्, अधुना अङ्गिरोगोत्रोत्पन्नस्योचथ्यस्य चरितं शृणु। सोमस्य दुहिता भद्रा रूपेण परमाऽमन्यत। सोम उचथ्यं तस्यास्तुल्यं पतिं सम-पश्यत। यशस्विनी महाभागा सा तीव्रं तपस्तेपे। तदा चन्द्रो महाभाग-मुचथ्यं तस्याः कृतेऽवरयत्। ततश्चन्द्रमा उचथ्यमाहूय 'यशस्विनीं भद्रां तुभ्यं दास्यामि' इत्युदित्वा ददौ। स उचथ्यो भूरिदक्षिणां दत्त्वा तां भार्यार्थे विधिवज्जग्राह। श्रीमान् वरुणस्तु पूर्वमेव तामकामयत। स यमुनातीरवर्ति वनमासाद्य तां जहार। जलेश्वरस्स तां हृत्वा परमाद्भुता-वहं षट्सहस्रशतह्रदं स्वं पुरमगमयत्। तस्मात्पुराद्रम्यन् प्रासादैरप्सरोभि-र्दिव्यैः कामैश्च शोभितं रम्यतरं किञ्चित्पुरोत्तमं नास्ति हि। तत्र वरुणो भद्रया सार्धं रेमे। ततो नारद उचथ्याय वरुणेन तत्पत्न्या अवमर्दन-माचष्ट। उचथ्यो नारदात्तत्सर्वमाकर्ण्य तदा नारदं, 'त्वं वरुणं गच्छ। मे भार्यां जहीहि। कस्मात्तामचोरयः। लोकपालस्त्वं लोकानां पालक एव न विलोपकः। मे विधुना सा भार्या दत्ता। सा त्वयाऽद्यापहृता।' इति मदीयं परुषं वचो ब्रूहि।' इति प्रोवाच। एवमभिहितस्य नारदस्य

'उचथ्यस्य जायां त्यज । कस्मात्तां त्वमपाहरः ।' इति वाक्यं निशम्य जलेश्वरः 'ममैषा सुप्रिया भार्या एनामुत्स्रष्टुं नोत्सहे ।' इति नारदमभाषत । वरुणेनैवमुदीरितो नारदो मुनिं तमुचथ्यं प्राप्य, 'महामुने, वरुणेन गळे गृहीत्वा क्षिप्तोऽस्मि । स ते भार्यां न विश्राणयिष्यति । यत्ते कार्यं तत्कुरुष्व ।' इति नातिहृष्टमना इवागदत् । उचथ्यो नारदस्य वचनं श्रुत्वा क्रुद्धः प्राज्वलत् । सुमहातपास्स तेजसा वारि स्तम्भयित्वाऽपिबत् । सर्वस्मिन् तोये पीयमानेऽपि सलिलेश्वरस्सुहृद्भिर्भिक्ष्यमाणोऽपि तां भद्रां तदा नैवामुञ्चत । ततो ब्राह्मणोत्तम उचथ्यः कुपितो वसुधां निरीक्ष्य 'भद्रे, षट्सहस्रशतानि ह्रदान् स्थलं दर्शयस्व ।' इत्यभणत् । सद्यस्समुद्रस्यापसर्पणात् अवनिरूषरप्रदेशतामभजत । असौ द्विजोत्तमो नदीं सरस्वतीं विलोक्य, 'भीरु, सरस्वति, त्वं तस्माद्देशान्मरून् प्रत्यदृश्यायाहि । शुभे, त्वया समुज्झितो देशोऽपुण्यो भवतु ।' इत्यलपत् । अथ देशे चूर्णीकृते वारिप उचथ्यस्य भार्यां भद्रामादाय शरणमासाद्याङ्गिरसाय तस्मै तां व्यतरत् । उचथ्यस्तां भार्यां प्रतिगृह्य सौमनस्यमाससाद । भुवनं दुःखान्मोचयामास च । मरुतो दुःखरहिता आसन् । ततो धर्मवित्सुमहातेजास्स उचथ्यस्तां जायां लब्ध्वा वरुणं प्रति, 'जलाधिप, ते क्रोशतस्सतो मयैषा तपसा प्राप्ता ।' इत्याचख्यौ । एवमुक्त्वा तया साकं स्वमेव भवनमविन्दत । एष ब्राह्मण उचथ्य ईदृशः ।

अथ ब्राह्मणस्यागस्त्यस्य माहात्म्यमाकर्णय । असुरैर्देवा अजीयन्त निरुत्साहा व्यधीयन्त च । सुराणां पितॄणां च योग्यानि यागश्राद्धानि मानवानां सत्कर्माणि च दानवैरह्रियन्त च । ततो दिविषदो भ्रष्टैश्वर्या वसुमत्याञ्चेरुरिति श्रुतिः । अथ कदाचिदमर्त्या दीप्तमादित्यवर्चसं तेजसा युक्तं विपुलव्रतमगस्त्यं ददृशुः । अमरास्तमभिवाद्य कुशलं पृष्ट्वा महात्मानं तं प्रति 'हे मुनिपुङ्गव, वयं दैतेयैर्युधि भग्नाः ऐश्वर्याद्भ्रंशिताश्च । तस्मादस्मात्तीव्राद्भयात्त्वं नस्त्रायस्व ।' इतीदं वाक्यं काले व्याहरन् । त्रिदशैरितिगदितस्स तेजस्व्यगस्त्यः कोपात् प्रळये कालाग्निरिव प्रजज्वाल । तेन दीप्तांशुजालेन प्लुष्टास्ते दनुजा अन्तरिक्षात्सहस्रशो निपेतुः । तस्यागस्त्यस्य तेजसा निर्दग्धास्ते देवलोकं भूलोकं च विहाय दक्षिणां दिशमासादयन् । बलिस्तु महीङ्गतस्सन्नश्वमेधं यज्ञमयजत । मेदिन्यां पाताळे च येऽन्ये महासुरा अवर्तन्त ते नादह्यन्त । शान्तभयैरादितेयैरुत्सृष्टो

लोकः पुनः प्राप्यत । अथ निर्जरैः 'भूमिष्ठानसुरान् जहि ।' इत्युदीरितोऽगस्त्यः 'भूमिगतांस्तान्नधक्ष्यामि यतस्तपो मे क्षीयेत ।' इति तान् प्रत्यवदत् । तपोनिधिना भगवताऽगस्त्येन स्वेन तेजसा तदा दानवा इत्थमदह्यन्त । ईदृशोऽगस्त्यस्ते मया प्रत्यपाद्यत ।

इदानीं यशस्विनो वसिष्ठस्य मुख्यं कर्म निशमय । आदित्या गङ्गातीरं समाश्रिता वैखानससरस्समीपे वसिष्ठस्य गौरवं ज्ञात्वा तं ध्यात्वा वैखानसविधानेन सत्रमासत । यजमानांस्तान् सर्वान् दीक्षानुकर्शितान् दृष्ट्वा शैलाभा वलिनामानो दानवा अजिघांसन् । ब्रह्मदत्तवरं वैखानसं सरो दानवानामदूरादविद्यत । एते हता हतास्तत्राप्लुत्याजीवन् । दशसहस्राणि ते महाघोरान् पर्वतान् परिघान् द्रुमांश्च प्रगृह्य तत्सलिले योजनानां शतानि यथोत्तिष्ठत्तथा विक्षोभयन्तस्त्रिदिवेशानभ्यद्रवन् । ततस्तैरर्दितास्सुपर्वाणो वासवं शरणं जग्मुः । तैर्व्यथितरस्य शक्रो वसिष्ठं शरणमव्रजत् । भगवानृषिर्वसिष्ठस्तेभ्योऽभयमददात् । कृपापरो मुनिस्तदा तान् दुःखितान्विदित्वा ज्वलता स्वेन तेजसा सर्वान् वलिनोऽयत्नेनादहत् । महातपास्स कैलासं प्रति प्रस्थितां नदीं गङ्गां दिव्यं तत्सर आनयत् । तया तत्सरोऽभिद्यत । गङ्गाभिन्नतटाकनिस्सृतजलप्रवाह एव सरयूनद्यभवत् । वलिनो यत्र देशे हतास्स वलिन इति व्यपादिश्यत । एवं सेन्द्रास्त्रिदिवौकसो महात्मना वसिष्ठेनारक्ष्यन्त, ब्रह्मदत्तवरा दैत्या अहन्यन्त च । मया वसिष्ठस्यैतत्कर्मावेद्यत ।

---

# विमर्शगोष्ठी ॥

## (10)

केशवः— शकटस्य फलं एकस्मात् स्थानात् स्थानान्तरप्राप्तिरूपं गमनम् । तेनैव शकटावयवानां फलवत्त्वम् । एवमेव अस्मदधीतानां तर्कव्याकरणादीनां शास्त्राणां वेदाङ्गोपाङ्गभूतानां अङ्गिभूतवेदफलेनैव फलवत्त्वं न तु तेषां पृथक्फलमस्तीति भगवता उपदिष्टं वयं गृहीतवन्तः स्मः । वेदानां किं फलमिति तु सम्प्रति जिज्ञासामहे ।

नारायणः— वेदानामपि निष्फलतैव सम्प्रति लोके दृश्यते। अधीतवेदाः किल घनपाठिनः 'किमिति निष्प्रयोजनं वेदाध्ययनं कृतवन्तः स्मः। कुतो न जीविकाप्रदां नवीनविद्यां शिक्षितवन्तः' इति भृशमनुतप्यन्ते।

महान्— सत्यं तथा, यथा आयुष्मान् नारायण आह। परन्तु वेदानां ईदृशी स्थितिः अस्मदपराधमूला। तेषां यत् फलं तदस्यन्तं वयं विस्मृतवन्तः स्मः। इदमाश्चर्यं यत् तेषां निष्फलत्वनिश्चयः सम्प्रति सर्वत्र जातः।

जानन्ति भवन्तः उपनयनमिति किमुच्यते? किमर्थं तदिति।

केशवः— द्विजबालानां क्रियमाणः कश्चन संस्कारः उपनयनमित्युच्यते। अस्माकं सर्वेषां तद् वृत्तम्। किमर्थं तदिति तु न वयं जानीमः।

महान्— उपनयनशब्दस्य कोऽर्थः ज्ञायते।

केशवः— समीपे प्रापणं तस्यार्थः। कस्य समीपे कस्य प्रापणमिति चेत् गुरोः समीपे बालस्य प्रापणं विवक्षितमिति वदन्ति।

महान्— केशव, सम्यक् श्रुतं भवता। तथा वन। परं तु गुरोः सकाशं प्रापितः बालः किं करोति? किमुद्दिश्य स तत्र नीयते?

केशवः— तद् वयं न जानीमः। भगवन्मुखात् जिज्ञासामहे।

महान्— वदामि, शृणुत। गुरोः सकाशं नीयमानो बालः तस्य शिष्यो भवति। गुरुणा किं कर्तव्यम्? शिष्येण किं कर्तव्यम्?

केशवः— गुरुणा अध्यापनं कर्तव्यम्? शिष्येण अध्ययनम्।

महान्— कस्य?

केशवः— कस्यचित् शास्त्रस्य।

महान्— न 'कस्यचिच्छास्त्रस्य'। अपि तु अङ्गिनो वेदस्य।

नारायणः— अङ्गानि उपाङ्गानि च शास्त्राणि किं नाध्येतव्यानि?

महान्— को ब्रवीति नाध्येतव्यानीति। अवश्यं तान्यपि अध्येतव्यानि। अपि तु मुख्यतया अङ्गी वेदः अध्येयः। तदनध्ययने व्रात्यता स्यात्। तेन सह यथाशक्ति यथावसरं च अङ्गोपाङ्गान्यपि अध्येयानि।

नारायणः— अस्मिन् काले एवं किमपि न क्रियते। पिता वा अन्यो वा कश्चित् बालस्य उपनयनसंस्कारं करोति। दिनैः दिनेन वा अस्मिन्

कर्मणि अथ वा उत्सवे समाप्ते बालः काश्चन कलाशालां गच्छति संस्कृतं वा भाषान्तरं वाऽधीते, न तु वेदम्।

महान्—सत्यम्, अद्यतनी स्थितिरेषैव। अतिमात्रं शोचनीया एषा स्थितिः। वेदविद्याफलं सर्वैर्विस्मृतम्। अतस्तदधिगमे न बालाः प्रवर्तन्ते, नापि वृद्धाः तान् प्रवर्तयन्ति।

नारायणः— उपनयनमात्रं अपरित्यजन्तः कुर्वन्ति।

केशवः— यथा क्षेत्रस्य कर्षणमात्रं कश्चन कुर्यात् न बीजावापं, तादृशमिदं भवति।

महान्— सत्यं। तथाऽपि सन्ध्यावन्दने, श्राद्धे, अन्यस्मिंश्च ईदृशे तदा तदा क्रियमाणे कर्मणि वैदिकमन्त्राणामुच्चारणीयतया तत्र योग्यताजनकं उपनयनं न निष्फलम्।

नारायणः— सन्ध्यावन्दनमपि अद्य उपनीता बाला बहवो न कुर्वन्ति।

महान्— तत्रापि अन्ततः निष्फलत्वबुद्धिरेव कारणम्।

केशवः— उपनयनसंस्कारे कृते वेदाध्ययनयोग्यता भवति। अनुपनीतेन वेदो नाध्येयः। अतो वेदाध्ययनार्थं उपनयनमिति एतावता उक्तं भवति। वेदाध्ययनस्य किं फलमिति तु अद्य अस्माकं जिज्ञासा।

महान्— तदहं वक्ष्यामि। आस्तिकाः प्राज्ञामहान्तः यस्मात् सश्रद्धं उपनयनाख्यं संस्कारं बालानां कुर्वन्ति कारयन्ति च, शास्त्राणि च विदधति, 'अनुपनीतानां वेदाध्ययने अधिकारो नास्ति, उपनीतेनैव सोऽध्येयः' इति बोधयन्ति, तस्मात् वेदविद्याफलेन महता भवितव्यमिति अस्माभिरवगन्तुं शक्यम्। न खलु अफलं अल्पफलं वा कार्यमुद्दिश्य एवं नियमविशेषविशिष्टे क्लेशहेतौ कर्मणि केचन श्रद्दधीरन् प्रवर्तेरन् वा। एवमेव प्रतिवत्सरं श्रावण्यां पौर्णमास्यां उपाकर्मेति यत् कर्म क्रियते तेनापि वेदविद्याफलगौरवं अनुमातुं शक्यम्

नारायणः— उपाकर्मशब्दार्थविवरणेन वयमनुग्राह्याः।

महान्— उपाकर्मशब्दः आरम्भार्थकः। उपाकर्म उपाकरणं आरम्भः। कस्य आरम्भः? वेदस्य। वेदारम्भः प्रतिसंवत्सरं श्रावणपौर्णमासीयुक्ते पुण्यदिने क्रियते। अग्रहारवासिभिः सर्वैः समवेतैः स्नात्वा अभिनवं यज्ञोपवीतं धृत्वा काण्डऋषीन् तर्पयित्वा हुत्वा ततः परं

क्रियते। श्रोत्रियवृद्धः कश्चित् *चतुर्णामपि वेदानां उपक्रमे विद्यमानं मन्त्रमनुवाकं वा उच्चारयति। तमनु अन्ये सर्वे उच्चारयन्ति। अयं वेदारम्भो नाम।

नारायणः— बहव इदानीं तस्मिन् दिने स्नान्ति, उपवीतं धारयन्ति, तर्पणं च कुर्वन्ति। न ततः परं किञ्चित्।

महान्— अयमपरो लोपः। वेदारम्भ एव अङ्गी, स्नानादिसर्वं केवलमङ्गम्। अङ्गित्यागे अङ्गानुष्ठानेन किं भवेदिति विवेको नास्ति। तस्मात् अङ्गमात्रं कृत्वा कृतकृत्यतां मन्यन्ते।

---

# प्रकृतिभेदः॥

रामः— पश्यतु भवान् श्यामार्यस्य पौरुषम्। धनं किञ्चिन्मे अपेक्षितमासीत्। तमुपेत्य प्रार्थनामकरवम्। अस्ति दास्यामीत्युक्त्वा अन्तरगच्छत्। पेटिकोद्घाटनशब्दं श्रुत्वा आगतया गृहिण्या बलवत्तर्जितः पेटीं तथैव पिधाय बहिरागत्य मामवदत्— किं कुर्याम्। व्ययितानि रूप्याणि न सन्तीति। किमहमेवं कुर्याम्। मदीया चेदेवं प्रवर्तेत कपोलयोर्द्वे दत्त्वा ब्रूयां 'याहि त्वदीयं कर्म कुरु। मा कुरु अधिकप्रसङ्गम्। इति।

कृष्णः—द्रष्टव्यं, समये प्राप्ते कथं त्वं वर्तस इति। परन्तु इदं मे भाति। भर्तृभार्ययोर्मध्ये कस्मिंश्चिद् गृहे भर्ता प्रभवति। कस्मिंश्चिद् गृहे भार्या। उभयत्र न काऽपि वाच्यता। दम्पत्योः सामरस्यं हि श्लाघ्यम्। यदि उभौ सर्वदा विप्रतिपन्नौ तुल्यबलक्रोधौ कलहायमानौ वर्तेयातां ततो दुस्सहतरा अन्या दुरवस्था लोके नास्ति। इयं श्यामार्यस्य गृहे नास्तीति सन्तोष्टव्यम्।

---

* प्रयोगचन्द्रिकानुक्रमणिकयोः "इषेत्वा' इत्यादींश्चतुरोऽनुवाकानध्याप्य" इति विद्यते। अत इदं यजुश्शाखिनां नानुगुणं भाति।

## [त्रिंशत् पुटानुवृत्तिः]

अकम्पनः— कालानुरोधेन तावत् सर्वं विपर्येति।

अमात्यः— तच्च वस्त्वस्ति यद् यथापूर्वमेव वर्तते, न तु विपर्येति।

अकम्पनः— मृगाः, पक्षिणः, अन्ये च मनुष्येतरे जन्तवः रूपतो गुणतो वृत्तितश्च यथा पूर्वमासन् तथैव अधुनाऽपि वर्तन्ते। न मात्रयाऽपि विपर्ययोऽस्ति।

अमात्यः— कथं तर्हि सर्वं विपर्येतीत्युच्यते?

अकम्पनः— मनुष्यान् प्रति मयोक्तम्।

अमात्यः— तदस्माभिरप्यभ्युपगम्यते। पूर्वं शते सहस्रे वा एक द्वौ अनृतवादिनः। अद्य प्रायः सर्वे। पूर्वं चौर्यं, हिंसा, अकालमरणं, व्याधिः, क्षामः, कलहः, स्पर्धा, युद्धम् इत्यादि अल्पमासीत। इदानीमत्यन्तमभिवृद्धम्।

अकम्पनः— अन्यन्मे विवक्षितम्।

अमात्यः— स्वच्छन्दमुच्यताम्। कः प्रतिघातः?

अकम्पनः— इदानीं मनुष्याणां बुद्धिशक्तिरधिका।

अमात्यः— अत्राप्यस्माकं न विप्रतिपत्तिः। बुद्धिशक्तेरत्यधिकत्वादेव क्षणेन कृत्स्नभूमण्डलविध्वंसनौपयिकं अस्त्रशस्त्रमुपज्ञाय परस्परभीतानि राष्ट्राणि चिन्तासन्ताननिरन्तरस्वान्तानि कालं नयन्ति।

अकम्पनः— निपुणमतिरत्रभवान् सर्वत्र किञ्चिद्वदति।

अमात्यः— न तथा वक्तव्यम्। अयुक्तं किमपि मया यद्यभिहितं निश्शङ्कं तदुद्घाट्यताम्।

अकम्पनः— मनुष्याः सर्वे समाः।

अमात्यः— कस्तत्र संशयः? क आह नेति?

अकम्पनः— तथा सति कुतः कस्यचित् 'महाराजः' इति विशेषः कल्प्यते?

अमात्यः— केन कल्पितः? महाराजकुलं तत्। तत्र जाताः क्रमेण महाराजा भवन्ति। तत्र का कल्पना नाम।

अकम्पनः— इदमपरमन्याय्यं यत्कुलपरम्परया केचन सुखं जीवन्ति अन्ये कुलपरम्परया दुःखं जीवन्ति।

अमात्यः— अर्थशून्यमिदं वचः।

TIRUPATI



अकम्पनः— कथम् ?

अमात्यः— प्रजानां सर्वानर्थपरिहारे सर्वार्थसाधने च जागरूको महाराजः सर्वदा तदेकचिन्ताक्रान्तमनाः तासां सुखदुःखाभ्यां स्वयं सुखदुःखभाग् भवति। पृथक् तस्य सुखं वा दुःखं वा न किञ्चिदस्ति। जना अपि स्वप्रयत्नानुरूपं सुखमनुभवन्तो जीवन्ति। अपरिहार्यतया आपतितं दुःखं विवेकितया सहमाना नावसीदन्ति। एवं महाराजे जनेषु च परस्परानुरागभूम्ना विवेकसम्पत्त्या च विभाजनानेषु मिथ्याविभागपरिकल्पनतत्परता न शोभते भवादृशानाम्।

अकम्पनः— महाराजपुत्रो महाराज एव कृषीवलपुत्रः कृषीवलपुत्र एवेति कुत एतत् ? महाराजपुत्रः कृषीवलो वा कृषीवलपुत्रो महाराजो वा कुतो भवितुं नार्हति ?

अमात्यः— आम्रबीजादुत्पन्नः आम्र एव, पनसबीजादुत्पन्नः पनस एवेति कुत एतत् ? आम्रादुत्पन्नः पनसो वा पनसादुत्पन्न आम्रो वा कुतो न भवितुमर्हति ? व्याघ्रीपुत्रो व्याघ्र एव, सिंहीपुत्रः सिंह एव भवति। तत्र किमन्याय्यम् ? यदि महाराजपुत्रः कृषीवलो भवितुमिच्छति कृषीवलपुत्रो वा महाराजः तदन्याय्यम्।

अकम्पनः— स्थावराणां मृगाणां च अन्या स्थितिः। ते नियतप्रकृतयः। अतिशयितबुद्धीनां कालदेशानुरोधेन हिताहितविभजनपटूनां मनुष्याणामन्या स्थितिः।

अमात्यः— मनुष्या अपि नियतप्रकृतय एव। मनुष्यस्त्रियो मनुष्यानेव प्रसुवते, न व्याघ्रान् वराहान् वा।

अकम्पनः— सत्यं, अस्ति जन्मनि नियमः। वृत्तिस्तु अस्मदिच्छानुरोधेन या काचिद्भवितुमर्हति। न तु कुलक्रमागतैव एका। महाराजपुत्रो यदि कृषीवलो भवति, कृषीवलपुत्रो वा महाराजः, तत्र कस्य का हानिः ? पितुर्या वृत्तिः सैव पुत्रस्येति को निर्बन्धः ?

अमात्यः— पितुर्या वृत्तिः सा जन्मना स्वकीया भवति। अन्यस्य या वृत्तिः सा परकीया। तत्र स्वकीया वृत्तिः कुतः परित्याज्या। परकीया कुतः परिग्राह्या ?

---

Registered No. M 2300

Book XXXI ॥ श्रीः ॥ No. 5

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ हेविलम्बि - मकर [सं. ५

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

JANUARY, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्देयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पुस्तिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.

TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,

*Proprietor,* The Srinivasa Press,

Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः — श्रीगीतार्थदीपः । २४१—२४८

TIRUPATI

प्रीतिपूर्वकं सदा कुर्वन्त इति यावत् । दृढव्रताः - मत्कर्मस्वर्चनादिकेषु तदुपकारकेषु भवननन्दनवनकरणादिकेषु च दृढसङ्कल्पाः, सततं भक्त्या यतन्तः - भक्त्या सदा यतमानाः, सततं भक्त्या नमस्यन्तश्च - प्रीतिपूर्वकम् असकृत् धरातले दण्डवत्प्रणिपतन्तश्च, भक्त्या सततं नित्ययुक्ताः- निरतिशयप्रीतिपूर्वकं सर्वकालमपि नित्ययोगं काङ्क्षमाणाः, 'नित्ययुक्ताः' इति आशंसायां क्त प्रत्ययः । मां सततं भक्त्या उपासते - हृदयेशयं मां सर्वदा प्रीतिपूर्वकं सेवन्ते ।

*மஹாத்மாக்கள் என்னை எக்காலமும் பக்தியோடு கீர்த்தனம் செய்தும் என் கைங்கர்யங்களில் த்ருட ஸங்கல்பத்துடன் முயற்சித்தும், நமஸ்காரம் செய்தும், என்னுடைய நித்ய ஸம்பந்தத்தை விரும்பியும் என்னையே த்யானம் செய்கின்றார்கள்.* 14

३५२ ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

'भजन्त्यनन्यमनसः' इति अनन्यमनस्त्वेन प्रथममुपासनं विशेषितम् । ततश्च कीर्तनादिभिरन्तरङ्गैः, अथ वेद्याकारविशेषप्रदर्शनेनापि तदेव विशेष्यते 'सदसच्चाहमर्जुन' इत्यन्तेन श्लोकपञ्चकेन — अन्येऽपि पूर्णोपासका महात्मानः अन्यशब्दोऽत्र पूर्णोपासकपरः । ज्ञानयज्ञेन च यजन्तः पूर्वोक्तकीर्तनादिभिस्सह ज्ञानाख्ययज्ञेन च प्रीणयन्तः, बहुधा - पृथक्त्वेन - समष्टिव्यष्टितदवान्तरभेदरूपसमस्तजगदाकारेण, विश्वतोमुखं - विश्वप्रकारमवस्थितं, मां - सर्वशरीरिणम्, एकत्वेन - समस्तचिदचिद्वस्तुशरीरकत्वरूपैकाकारेण, उपासते - भजन्ते, नामरूपाविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरक एक एव परमात्मा देवतिर्यङ्मनुष्यस्थावरात्मकविचित्रजगच्छरीरोऽवतिष्ठत इत्यनुसन्दधानाश्च मामुपासत इति यावत् । 'पृथिव्यादिबहुत्वमात्रस्य प्रत्यक्षादिसिद्धत्वादेकस्यैव सतो बहुत्वं हि शास्त्रवेद्यम् ; ततश्च तथाभूतैकत्व एव वाक्यतात्पर्यम् । तच्चैकस्य सर्वशरीरत्वेन निर्व्यूढम् ।

மஹாத்மாக்கள் செய்யும் பக்தியானது ப்ரயோஜனாந்தரங்கள் கலசாது ஸ்வயம் ப்ரயோஜனமானது என்றும் அந்த பக்திக்கு நாமஸங்கீர்த்தனம் நமஸ்காரம் போன்றவை அங்கங்களென்றும் முன் சொல்லப்பட்டது. அவ்வாறான பக்திக்கிலக்கான பகவதாகாரமென்னவென்றால்- சேதனசேதனப்ரபஞ்சமனைத்தும் எம்பெருமானுக்கு உடலாகும். தேவன் மனுஷ்யன் என்றாப்போல் பலவகையான நாம ரூபங்களைப் பெற்றுள்ள உலகைத் தனதுடலாகக்கொண்ட பகவான் நாமரூபம்பெறாத ஸூக்ஷ்ம சேதனசேதனசரீரகனாய் ஒருவனாய் நிற்கின்றான். இதுவே விசிஷ்டாத்வைதம். இந்த ஓரே ரூபத்தோடு இந்த ஆகாரத்தை தங்கள் ஞானமாகிற யஜ்ஞத்திற்கு இலக்காக்கி உபாஸிக்கின்றார்கள் சில மஹான்கள் என்றவாறு. 15

३५३ अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यं अहमग्निरहं हुतम् ॥ १६ ॥

विश्वशरीरोऽहमेवावस्थित इत्याह– अहम्, क्रतुः - ज्योतिष्टोमादिकः, अहं यज्ञः - ब्रह्मयज्ञादिः पञ्चविधो महायज्ञः, इत्थं विषयविशेषभेदात् 'क्रतु' 'यज्ञ' शब्दयोर्न पौनरुक्त्यम् । अविशेषत एवकारस्सर्वत्रान्वेति- अहमेव, स्वधा - पितृभ्यो दीयमानमन्नम् । अहमेव औषधम् - हविः, अहमेव मन्त्रः, अहमेव आज्यम्, अहमेव अग्निः - आहवनीयादिकः, अहमेव हुतम् - होमश्च । हविषां प्रागुक्तत्वादत्र हुतशब्दो भावार्थः ।

ஜ்யோதிஷ்டோமம் முதலிய யாகமும் ப்ரஹ்மயஜ்ஞம் முதலிய மஹாயஜ்ஞமும் பித்ருக்களுக்கு ஸமர்ப்பணம் செய்யப்படும் 'ஸ்வதா' என்கிற அன்னமும், ஹவிஸ்ஸும், மந்த்ரமும், நெய்யும், ஆஹவனீயம் முதலான அக்னியும், ஹோமமும் ஆகிய எல்லாம் யானே. இவை யாவும் எனது சரீரங்களே என்றவாறு. 16

३५४ पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥ १७ ॥

किञ्च अहम्, अस्य जगतः - स्थावरजङ्गमात्मकप्रपञ्चस्य, पिता, माता, धाता - मातापितृव्यतिरिक्तः उत्पत्तिप्रयोजकः चेतनविशेषः, धात्वर्थभूतधारणादिद्वारोत्पत्तिप्रयोजकत्वम् । पितामहः - पितुः पिता, वेद्यं पवित्रं - वेदवेद्यं पावनम्, ओङ्कारः - वेदकः, वेदबीजभूतः प्रणवः, ऋक्, साम, यजुरेव च - त्रयो वेदाश्चाहमेव । अस्मिन् श्लोके न स्वरूपेण पितृत्वादिकमुच्यते; अपि तु पितृत्वादिरूपेण प्रतिपन्नानां स्वान्तर्यामिकत्वम् । पित्रादिशरीरकोऽहमिति यावत् ।

இவ்வுலகிற்கு பிதா, மாதா, போஷகன், பிதாமஹன் வேதத்திலுல் அறியப்படும் வஸ்து பரிசுத்தமான ப்ரணவம், ருக் யஜுஸ் ஸாமவேதமனைத்தும் என் சரீரமாகும். 17

३५५ गतिर्भर्ता प्रभुस्साक्षी निवासश्शरणं सुहृत् ।
प्रभवप्रलयस्थानं निधानं बीजमव्ययम् ॥ १८ ॥

गम्यत इति गतिः - तत्र तत्र प्राप्यस्थानम्, 'गतिशब्दस्याप्यप्राप्यन्यायेन द्रव्यपरत्वौचित्यात् नात्र भावार्थपरत्वम्' भर्ता - बिभर्तीति भर्ता धारयिता, प्रभुः - शासिता, साक्षी - साक्षाद्द्रष्टा, *'साक्षाद्द्रष्टरि संज्ञायाम्' इति हि साक्षिशब्दोनुशिष्यते । निवासः - वासस्थानं वेश्मादि, शरणं - रक्षिता, सुहृत् - हितैषी शोभनहृदययुक्तो हि सुहृत्, शोभनत्वं च हृदयस्य हितगोचरत्वम् । प्रभवप्रलयस्थानं - उत्पत्तिप्रलययोः स्थानम्, निधानं - निधीयत इति निधानं कर्मार्थोऽयं ल्युट् प्रत्ययः उत्पाद्यमुपसंहार्यं चाहमेवेत्यर्थः । अव्ययं बीजं - न व्येतीत्यव्ययम् व्ययरहितं यत्कारणं, तदहमेव । प्रभवप्रलयस्थानम् इति तूपादानपरम्, बीजशब्दः कारणसामान्यपरः इति न पौनरुक्त्यम् ।

முமுக்ஷுக்களுக்கு அடையவேண்டிய இடமும் யானே. ப்ரபஞ்சத்தை தரிக்கின்றவனும் நியமனம் செய்கின்றவனும் யானே. அவரவர் கர்மாக்களை ஸாக்ஷாத்காரம் செய்கின்ற

---

* अष्टाध्याय्या ५, २, ९२

வனும், அவரவர் இருக்குமிடமும், ரக்ஷகனும், உலகத்திற்கு ஹிதத்தை விரும்புகின்றவனும், உத்பத்தி லய ஸ்தானமும், உத்பத்தி லயம் பெறும் வஸ்துவும், ஸர்வத்துக்கும் அழிவற்ற காரணமும் யானேயாகின்றேன். 18

३५६ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

एवं *'प्राधान्यतः' इति वक्ष्यमाणप्रकारेण लोके तत्तच्छब्दवाच्यतया प्रसिद्धानां अकृष्टपदार्थानां सत्तायाऽस्वाधीनत्वप्रदर्शनम् ; अथ प्रवृत्ति तादधीन्यमनेनोच्यते- हे अर्जुन ! अहं (अग्न्यादित्यरूपेण तदुभयतप्तद्रव्यरूपेण च) तपामि - तापं करोमि, अहं, ग्रीष्मादौ वर्षं - वृष्टिं, निगृह्णामि - (कैश्चिद्रश्मिभिः) प्रतिबध्नामि, उत्सृजामि च, वर्षाकालेषु पर्जन्यरूपेण अहमेव वर्षं निगृहीतं पूर्वं पुनश्च विसृजामि, अहं अमृतं चैव - मृतिप्रतिबन्धकोपि (भवामि) मृत्युश्च मृतिकारणमपि भवामि, किं विशिष्याभिधीयते, अहं, सत् - वर्तमानम्, असच्च - वर्तमानादन्यत् अतीतं अनागतं च वस्तु भवामि ।

ஓ அர்ஜுனா! அக்னி ஸூர்யன் முதலிய ரூபங்களாலே உலகங்களை எரிக்கின்றவன் யானே. கோடைகாலத்தில் மழையைத் தடுப்பவனும் மாரிகாலத்தில் மழையை வர்ஷிக்கின்றவனும் யானே. மரணத்தைத் தடுக்கும் பொருளும் யானே. மரணத்தைக் கொடுக்குமதுவும் யானே. நிகழ்காலம், சென்றகாலம், வருங்காலம் இவற்றிலுள்ள பொருளனைத்தும் யானே. இவை அனைத்தும் எனக்கு விபூதியாயும் என்னால் நியமிக்கப்பெற்றதாயும் எனது சரீரங்களாயும் அவற்றிற்கு நான் ஆத்மாவாகவுமாகின்றேன் என்றவாறு. 19

३५७ त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २० ॥

* गी. २०, २१

३५८ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना: गतागतं कामकामा लभन्ते ॥ २१ ॥

एवं 'अहं क्रतुः' इत्यादिना 'सदसच्चाहमर्जुन' इत्यन्तेन श्लोकचतुष्टयेन भगवतो विश्वशरीरकत्वकथनेन तत्तद्विशिष्टैकत्वेन ज्ञानिनामुपासनमुक्तम ; तेषामेव ज्ञानिनां विशेषं दर्शयिष्यति– 'अनन्याश्चिन्तयन्तो मां' इति, मध्ये तत्प्रतिकोटितया कामकामानामज्ञानां वृत्तमाह्– त्रैविद्याः - तिस्रो विद्यास्समाहृताः त्रिविद्यम् द्विगुसमासत्वात् 'त्रिविद्यम्' इत्येकवद्भावः नपुंसकत्वं च । त्रिविद्यं विदन्तीति त्रैविद्याः ऋग्यजुस्सामरूपत्रिविद्यनिष्ठाः, न तु त्रय्यन्तनिष्ठाः तादृशाधिकारिणस्तु, सोमपाः - सोमं पिबन्तीति सोमपाः, केवलेन्द्रादिविशिष्टसोमरसान् पिबन्तः, पूतपापाः पूतं - निरस्तं पापं येषां ते पूतपापाः, निरस्तस्वर्गादिविरोधिपापास्सन्तः यज्ञैः मां इष्ट्वा - केवलेन्द्रादिदैवत्यतया तदनुसंहितैः यागैः वस्तुवृत्त्या इन्द्रादिशरीरकं मामेवाराध्य, केवलेन्द्रादियागानामपि वस्तुतः परमपुरुषाराधनरूपत्वं, तज्ज्ञानाभावाच्च तेषां वैकल्यमपि 'ये त्वन्यदेवताभक्ता' इत्यादिश्लोकत्रयेण वक्ष्यते, अतः 'यज्ञैर्मामिष्ट्वा' इत्येतत् परमपुरुषस्य स्वानुसन्धानमात्रमूलं वचः ; न पुनर्यजमानानुसन्धानमूलम् । स्वर्गतिं - स्वरेव गतिः स्वर्गतिः स्वर्गरूपं प्राप्यं, प्रार्थयन्ते'अनुष्ठानस्य फलकामनापूर्वकत्वेऽपि यज्ञानन्तरमेव हि फलं देहीति देवतां प्रति प्रार्थनम् ; अत इष्ट्वा प्रार्थयन्ते इति क्रमोपपत्तिः ते - अधिकारिणः पुण्यं - पुण्यफलम्, सुरेन्द्रलोकं - शतक्रतोः स्थानम्, आसाद्य - संप्राप्य, दिवि - विचित्रभोगाश्रयतत्तदवान्तरप्रदेशविशेषे, दिव्यान् - भौमभोगविलक्षणान्, देवभोगान् - देवानां भोग्यान्, अश्नन्ति - अनुभवन्ति, ते - भोक्तारः, विशालं - विस्तीर्णं, तं, स्वर्गलोकं - स्वर्गलोकसम्भवं भोगम्, भुक्त्वा - अनुभूय, पुण्ये - स्वर्गफलानुभवहेतुभूते सुकृते, क्षीणे सति - अनुभवेन नष्टे सति (पुनरपि) मर्त्यलोकं, विशन्ति - प्रविशन्ति । एवं - उक्तरीत्या, कामकामाः - कामान् कामयन्ते इति कामकामाः पूर्वः कामशब्दः कर्मणि व्युत्पन्नः काम्यस्वर्गादिपरः; स्वर्गादीन् काम्यमानान् कामयमानाः, त्रयीधर्मं - त्रय्यन्तसिद्धस्वाङ्गिभूतोपासनरहितं केवलं वैदिकं कर्म, अनुप्रपन्नाः अनुतिष्ठन्तः, ते - पूर्वोक्ताः, गतागतं - गतं च आगतं च गतागतं गमनागमनं, लभन्ते - प्राप्नुवन्ति, अल्पास्थिरस्वर्गादीननुभूय पुनर्निवर्तन्त इति यावत् ।

ஞானிகளைப்போல் வேதாந்தஸித்தமான அறிவு இல்லாதவர்கள் ருக் யஜுஸ் ஸாமவேதங்களில் சொல்லிய கர்மாக்களில் ஊற்றமுள்ளவர்களாய் ஸோமபானம் செய்து பாவம் கழிந்தவர்களாய் யாகங்களால் என்னை ஆராதனம் செய்கின்றார்கள். அவர்கள் நினைவில் இந்த்ராதிகளே ஆராத்யர்களானாலும் உண்மையில் அந்தர்யாமியான யானே ஆராத்யனாகின்றேன். அவ்வதிகாரிகள் ஸ்வர்க்கத்தைப் ப்ரார்த்தித்து புண்யபலமான தேவலோகத்தையடைந்து விலக்ஷணமாயுள்ள தேவபோகங்களை அனுபவிக்கின்றார்கள் விசாலமான ஸ்வர்க்கலோகத்தை அவர்கள் அனுபவித்தபிறகு புண்யகர்மாவானது தீர்ந்ததும் மனிதலோகத்தை அடைகின்றார்கள். இவ்வாறு பலத்தில் அபேக்ஷையோடு கர்மாவை அனுஷ்டிப்பவர்கள் மேலுங்கீழுமான உலகங்களில் போக்குவரத்துடன் துக்கத்தை அனுபவிக்கின்றார்கள். 20, 21

३५९ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

उपायस्यापि सुखरूपतया फलस्य च नित्यनिर्दोषनिरतिशयानन्दतया महात्मनां विशेषोऽभिधीयते– ये जनाः - जन्मसाफल्यवन्तो ये महात्मानः, अनन्याः - न विद्यते अन्यत् प्रयोजनं येषां ते अनन्याः, मच्चिन्तनमेव स्वयंप्रयोजनं मन्यमानाः प्रयोजनान्तरनिरपेक्षास्सन्तः, मां चिन्तयन्तः, ध्यायन्तस्सन्तः, पर्युपासते - परितः उपासते अन्यूनं अखण्डितगुणविभूतिकमुपासते, नित्याभियुक्तानां - मयि सततयोगं काङ्क्षमाणानां, आशंसायां क्त प्रत्ययः, उपायोपेयदशयोः मया नित्यसम्बन्धमपेक्षमाणानामिति यावत् । तेषां - पूर्वोक्तानां महात्मनां, अहं - परमौदार्यसौशील्यादिपूर्णोऽहम्, योगक्षेमं, - योगश्च क्षेमश्च तयोस्समाहारः योगक्षेमं, अलब्धलाभो योगः ; लब्धरक्षणं क्षेमः, मत्प्राप्तिलक्षणं योगम् अपुनरावृत्तिलक्षणं क्षेमं च, वहामि - ददामि ।

ப்ரயோஜனாந்தரங்களை விரும்பாது என்னுடைய த்யானத்தையே ப்ரயோஜனமாகச் செய்யும் மஹாத்மாக்களோவெனில்,

என்னோடு நித்யஸம்பந்தத்தையே விரும்புகின்றனர். அவர்களுக்கு என்னை அடைவதாகிய யோகத்தையும், அதற்கு அழிவில்லாமையாகிய க்ஷேமத்தையும் நானே கொடுக்கின்றேன். 22

३६० ये त्वन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥

सर्वासामपि देवतानां भगवच्छरीरत्वात् वस्तुतः सर्वेषां कर्मणां स्वसमाराधनरूपत्वे सत्यपि केवलकर्मिणां कुतो मोक्षरूपं योगक्षेमं न प्रयच्छति भगवान् इत्यत्रोत्तरमुच्यते 'ये तु' इत्यादिना श्लोकद्वयेन । 'तु' शब्दश्शङ्कानिवर्तकः, हे कौन्तेय, अन्यदेवताभक्ताः - मदितरदेवतासु विधिशिवेन्द्रादिषु भक्तिमन्तः, ये तु - केवलत्रयीनिष्ठाः, श्रद्धया कर्तव्यविषयिण्या त्वरया, अन्विताः - अनुगतास्सन्तः, यजन्ते - देवतान्तराणि प्रीणयन्ति, तेऽपि, अविधिपूर्वकं - विधिः स्वज्ञानद्वारा यस्य पूर्वं कारणं, तत् विधिपूर्वकं ; तदन्यत् अविधिपूर्वकं. विध्यनुसन्धानं विहायेति यावत् । मामेव यजन्ति - वस्तुतो मामेवाराधयन्ति, इन्द्रादीनामाराध्यत्वं विदधद्वेदान्तवाक्यजातं हि सर्वात्मभूतस्य परमपुरुषस्यैव निरुपाधिकमाराध्यत्वं विदधाति- यथा 'चतुर्होतारो यत्र सम्पदं गच्छन्ति देवैः' इति अग्निहोत्रदर्शपूर्णमासादीनि कर्माणि यस्मिन् परमात्मनि अन्तरात्मतयाऽवस्थिते सति तच्छरीरभूतैः इन्द्रादिदेवैः तदाराधनत्वरूपां सम्पदं गच्छन्ति इति तदर्थः । अतस्सर्वं कर्म मदाराधनरूपमेव । तदजानन्तोऽन्येत्यविधिपूर्वकं यजन्ते ।

அர்ஜுனா! இந்த்ரன் முதலிய தேவதாந்தரங்கள் பக்கல் பக்தியோடும் ஆஸ்திக்ய புத்தியோடும் எந்த சிலர் யாகம் செய்கின்றார்களோ அவர்களும் முறையில்லாதவழியில் என்னையே ஆராதிக்கின்றார்கள். இந்த்ராதிதேவர்களுக்கும் நானே அந்தராத்மாவாய் நிற்கின்றமையால் யானே யாகங்கள் எல்லாவற்றிற்கும் ஆராத்யனாகின்றேன். இதை அறியாமல் இந்த்ராதிகளையே ஸ்வதந்த்ரராக நினைத்து ஆராதிப்பது சாஸ்த்ரவிதிக்கு முரண்பட்டது என்றவாறு. 23

TIRUPATI LIBRARY

३६१ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

अविधिपूर्वकत्वविवरणपूर्वकं तथाविधस्यात्यन्तनैष्फल्यशङ्कां परिहरति– सर्वयज्ञानां - श्रौतानां स्मार्तानां च सर्वेषां यज्ञानां, भोक्ता च - देवतात्वेनाराध्यश्च, प्रभुरेव च - फलप्रदाता च, अहं हि - अहमेव किल, ते तु - केवलकर्मनिष्ठाः पुनः, मां - भोक्तारं प्रभुं च, तत्त्वेन - यथावत् न अभिजानन्ति - नावगच्छन्ति, अतः, च्यवन्ति - अनवधिकातिशयानन्दपरमपुरुषप्राप्तिरूपफलात्प्रच्युता भवन्ति।

[illegible] 24

३६२ यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनोऽपि माम् ॥ २५ ॥

[illegible] फलसाधनत्वं प्रदर्श्यते—

व्रतशब्दस्सङ्कल्पवाची। देवेषु व्रतं येषां ते देवव्रताः दर्शपूर्णमासादिकर्मभिः 'इन्द्रादीन् यजामहे' इति इन्द्रादियजनसङ्कल्पाः, देवान् - इन्द्रादीन्, यान्ति - प्राप्नुवन्ति, पितृषु अग्निष्वात्तादिषु व्रतं आराध्यतया सङ्कल्पः येषां ते पितृव्रताः, ते पितॄन् यान्ति श्राद्धादिक्रिया पराः पितृलोकं प्राप्नुवन्ति, भूतान्युद्दिश्य इज्या येषां ते भूतेज्याः - यक्षरक्षःपिशाचादीनि भूतानि यजामहे इति भूतयजनसङ्कल्पाः, भूतानि - यक्षरक्षःप्रभृतिकानि यान्ति, मद्याजिनोऽपि - मद्यजनशीलास्तु, मां, यान्ति, 'देवव्रताः, 'पितृव्रताः' इत्यनयोः यजनं, 'भूतेज्याः', 'मद्याजिनः' इत्यनयोः व्रतं चापेक्षया योजनीयम्। देवयजनसङ्कल्पाः, पितृयजनसङ्कल्पाः, भूतयजनसङ्कल्पाः, मद्यजनसङ्कल्पा, इति विभागो विवक्षितः। तत्तत्प्राप्य भेदवचनं तत्तत्समानदेशकालसमानभोगत्वार्थम्। ततश्च देवपितृभूतव्रताः देवादीन् प्राप्य

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ हेविळम्बि - कुम्भ [सं ६

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

FEBRUARY, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription      Rs. Two only.
Do.   With Sastraic Supplement      Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromni, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥


1 उद्भ्रान्तदशाननम् ।
2 मुकुन्दमाला ।
3 सद्विप्रमहिमा ।
4 राज्यविपर्ययः ।
5 विसर्गगोष्ठी ।
6 प्रकृतिभेदः ।
7 श्रीभागवतश्लोकाः ।

TIRUPATI
LIBRARY

विशीर्णमुकुटावलिर्विगलितालकस्साश्रुभि-
र्मुखैर्दशभिरुद्वमन् श्वसितमुग्रमायासभाक् ।
भुजैः प्रणिहितैरधो गिरिवरस्य घिक्सङ्कटे
तटे लुठति केवले महिमशालिनामग्रणीः ॥ १०८ ॥

कम्पते मे हृदयम् । ध्वंसते धृतिः । भ्रमति दृष्टिः । मुह्यति चेतना । अवसीदन्ति गात्राणि । जिह्वा च परिशुष्यति । कथमीदृशं वत्सं प्रेक्षे । हा वत्स, ...

इति रुदन् सत्वरं परिक्रम्य सर्वैः सह निष्क्रान्तः ।

इति षष्ठोऽङ्कः ।

---

## अथ सप्तमोऽङ्कः ।

---

ततः प्रविशति नारदः

नारदः — (कैलासं, दूरादवलोक्य सप्रणामम्)

नमस्ते कैलास, क्षितिधरशिरोरत्न, तुहिन-
प्रभालेपैः सत्वोन्नतिमतितरां यो दधदिव ।
अधस्तान्मुक्तानां घनगहनधाम्नामुपरि यं
स्फुरन्तं प्रस्थानामधिवसति साक्षात्पशुपतिः ॥ १०९ ॥

(विचिन्त्य सानन्दम्) अहो लीलामात्रं भगवतः परिपन्थिनिग्रहोद्योगः । तदेतत् पारमैश्वर्यं नाम ।

दृशैवाराद्दीपद्विवृतपुटया काममदह-
त्पुराकारान् घोरान् हसितसितभासेव दनुजान् ।
विषं कण्ठे धृत्वा मणिमिव ररक्ष त्रिभुवनं
नतेनाङ्गुष्ठेन ग्लपयति च लङ्केशमधुना ॥ ११० ॥

(विमृश्य) परं तु पुनरुन्मीलन्तीमिव पश्यामि भाग्यपङ्क्तिं पङ्क्तिवद-नस्य । यत्र केवलं प्रशान्तकोपः परमेश्वरः मनाक् प्रसादाभिमुखोऽपि वर्तत इति प्रत्येमि ।

तथा हि—

कैलासाद्रेस्तोलनं तावदास्तां
तेनैवास्मिन् दृष्टवीर्ये प्रतुष्येत् ।
त्रस्ता देवी मानमुत्सृज्य कण्ठं
जग्राहेति स्थाणुरन्तः समोदः ॥ १११ ॥

दृष्टो ह्येष मया नभस्स्थेन व्यतिकरः—

शैले डोलायमाने सपदि शरवणे सञ्चरन्ती सखीभिः
सातङ्का हा किमेतच्चलति गिरिरसावित्युदीर्योत्पतन्ती ।
नाथ, त्रायस्व वत्सौ न किमिह भगवन् चक्षुरुन्मील्य पश्ये-
त्याराादाश्लिष्य कण्ठं सरभसमविशत्पार्वती पत्युरङ्कम् ॥ ११२ ॥

प्रभुरपि परिहृत्य योगनिष्ठा-
मलमतिभीरुतयेति तां प्रतीष्य ।
गिरिवरमदवारणस्य सद्यः
पदनलिनाञ्चलमङ्कुशीचकार ॥ ११३ ॥

एवं च,

देव्या मानविधूननं पशुपतेर्निध्यानविक्षेपणं
देवीदेवविभेदकातरगणप्रह्लादसन्धुक्षणम् ।
सद्यो निर्जितगुह्यकेश्वरपुरीदौर्गत्यविद्रावणं
जातं भूरिगुणं किलाद्रिचलनं लङ्केश्वरप्रेरितम् ॥ ११४ ॥

स च, भुजबलवैयर्थ्येन व्यपनीतदर्पः सद्यः सुमालिप्रतोदेन चात्मोन्मोचनविधिमनुचिन्तयन् स्वस्य च शाम्भववंशाभिजनतया झटिति कन्दलितभक्तिपरिस्पन्दः नचिरात् परितोषयिष्यत्याशुतोषमिति तर्कयामि । तथा च, साम्प्रतं प्रतिबद्धाः स्यास्यन्ति सुरमुख्यानां रक्षःपतिसमूलक्षयप्रत्याशाः । (श्रुतिमभिनीय) उपक्रान्तं खलु शिवाराधनं स्तुतिगीतामृतवर्षेण । अहो राक्षसराजस्यागाधमाधुर्यह्रदायमानं कण्ठगाम्भीर्यम् । येन निर्ह्रादिन्यो वाद्यदशामापद्यन्ते दशापि दिशः । आपूर्यते च शैलव्योमान्तरं सिद्धचारणयक्षकिन्नरशिवपार्षदाद्यैः विमानविलम्बिभिरमरगणैरपि । यतः,

विस्मारयति विरोधं व्यपनयति शुचं विनोदयत्यार्तिम् ।
रहयत्यवलेपभरं सङ्गीतकमनुष्ठितं कुशलैः ॥ ११५ ॥

फुरफुरायन्ते मेऽङ्गुलयः गीतानुसारेण वल्लकीं वादयितुम् ॥
(इति वीणया अनुगायति)

नेपथ्ये रावणगीतम्

हर शम्भो, हर शम्भो,
शिव, शिव, करुणावारिनिधे ...

1 पौलस्त्यं मां पालय दुष्टं
कैलासाचलमूलनिघृष्टम् ।
हर शम्भो, हर शम्भो,
शिव, शिव, करुणावारिनिधे ॥ हर ...

2 त्रिपुरविजयिनं दारदपायिनं
दग्धमनोभवं दान्तकृतान्तम् ।
दर्पवशादहो त्वामवमतवतो
मर्षय मर्षय कृतमपराधम् ॥ हर ....

3 मातृसनाथं वत्सलहृदयं
जन्तुषु सदयं जन्तुयुतेष्वपि।
द्रोहपरायणो दुर्हृदयोऽहं
प्राणपरीप्सया त्राणमुपार्थये॥ हर ...

4 प्रणतसुरगणदानवमानव-
खगनगमृगकुलराक्षसपालन।
पाहि मां शम्भो, पापकृदुत्तमे
शरणं तव चरणम्॥ हर ...

5 वेदगुहाशयध्वनितगभीर-
व्याहृतिभावितनिर्भरमहिमन्।
विश्वविपिनपुराणपञ्चानन,
त्वय्यपि विकसदम्भमतानिषम्॥ हर ...

6 विष्णुविधातृमहेन्द्रमुखसुर-
प्रार्थितनेत्रत्रिभागनिरीक्षण।
त्वं जगत्त्रयगुरुः सर्वमिदं तव
प्राणिकुलं विभो जातमपत्यम्॥ हर ...

7 त्वदभयमव्ययं मार्गति दासोऽयं
साधु बुभूषतो दर्शय मार्गम्।
मदनान्तक, सुमालिबन्धोर्मे
श्रीशङ्कर॥ हर शम्भो ...

नारदः— अहो श्रोत्रपेयता रागामृतपरीवाहस्य। अहो मनःसंवननं साहित्यसौष्ठवम्। एवं प्रीणितपरमेश्वरो नूनं क्षेममवाप्स्यति पापिष्ठोऽपि। भवतु पश्यामीति।

(अन्तर्धाय स्थितः)

उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २१] कलि ५०५८ हेविलम्बि - मकर [सं ६

# मुकुन्दमाला ॥

व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्येन्द्रार्तिकरौषध त्रिभुवनीसञ्जीवनैकौषधम् ।
भक्तात्यन्तहितौषधं भवभयप्रध्वंसनैकौषधं
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥ २४ ॥

जप्तव्यतया उपदिष्टस्य श्रीकृष्णमन्त्रस्य यः प्रतिपाद्यः भगवान् श्रीकृष्णः तस्य तदीयनिस्सीमवैभवविज्ञानपूर्वकं सम्यगनुसन्धानं कर्तव्यमित्यभिप्रायेण आह– व्यामोहेति ।

इह जातानां मनुष्याणां दुःखानि बहुविधानि स्वयं उपनिपतन्ति । तेषां परिहारस्य क उपायः ? अन्ततः साक्षात् श्रीकृष्ण एव। पीडाकराणां रोगाणां निवृत्तये यद्द्रव्यं सेवामहे तदौषधमित्युच्यते । अनिष्टनिवारकत्वसाम्यात् श्रीकृष्ण एव औषधं भवति। प्रसिद्धमौषधं मनुष्यैः कृतं अल्पवीर्यं अवीर्यं च। श्रीकृष्णौषधं तु दिव्यम् । अनन्यकृतं अप्राकृतं वीर्यवत् । विरुद्धनानाकार्यशक्तं च। तथा हि ।

व्यामोहप्रशमौषधम् । अनात्मनि शरीरादौ यः आत्मतया व्यामोहः, शब्दादिषु अभोग्येषु यः भोग्यतया व्यामोहः, एतदादेः सर्वस्य व्यामोहस्य अन्यथा ज्ञातस्य प्रशमे निवृत्तौ हेतुभूतमौषधम् ।

मुनिमनः। मुनीनां योगिनां मनसो या वृत्तिः अभिमतभगवत्स्वरूप-गुणचिन्तनं तस्याः प्रवृत्तेः अप्रतिहतप्रसरस्य अनुरूपं औषधम्। एवं कस्यचित् प्रशमकारि इदमौषधम्, कस्यचित्प्रवृत्तिकारि चेति अद्भुतशक्तिकम्। यथावदाराधितो हि भगवान् मिथ्याज्ञानं निरस्य तत्त्वज्ञानमुत्पादयति, मनश्च मालिन्यमपोह्य ध्यानयोग्यं करोति।

एवं आन्तरं यदनिष्टं तन्निवर्तकत्वं यदिष्टं तदुत्पादकत्वं च उक्तम्।

अथ बाह्यविषये आह– दैत्येन्द्राः मधुकैटभहिरण्याक्षहिरण्यकशिपुप्रभृतयः। तेषां आर्तिं पीडां नाशं कुर्वत् औषधम्। त्रयाणां भुवनानां लोकानां सञ्जीवनस्य सुखजीवनस्य प्रधानहेतुभूतमौषधम्। भगवदनुग्रहेण हि अस्मज्जीवनसाधनं वृष्ट्यन्नादिकं उत्पद्यते। देवादीनाममृतादिकमपि स एव उत्पाद्य ददाति।

मनुष्येषु भूयिष्ठाः धर्मार्थकामरूपत्रिवर्गप्रवणा भवन्ति। तेषामपि इष्टानिष्टप्राप्तिपरिहारौ भगवतैव भवत इत्यभिप्रायेण एतावदाह। अथ ये भगवत्प्राप्तिरूपपरमपुरुषार्थकामाः श्रेष्ठा भक्ताः तान् प्रत्याह। भक्तानां अत्यन्तं हितं अनुकूलं औषधम्। कथम्? अनिष्टनिवर्तकत्वात् इष्टप्रापकत्वाच्च। तत्र आद्यमाह– भवभयेति। भवः संसारः जननमरणपरम्परा। तस्माद् भयं भवति विवेकिनाम्। किं नाम कदाचित् अस्य अवसानं भवेत्? किं नाम कदाचित् अस्मान्मुक्ता भवेम? इति ते चिन्तयन्ति। तत्प्रध्वंसनकरं एकमौषधं श्रीकृष्णः। स हि 'अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः' इति प्रतिज्ञातवान्। द्वितीयमाह–श्रेय इति। निरतिशयानन्दस्वप्राप्तिरेव श्रेयः।

एवं केषाञ्चन निवृत्तिः अन्येषां सम्पत्तिरिति विविधफलसाधनमेकमिदं दिव्यौषधम्। तत् हे मनः पिब। अमृतमयं हि तत्। तस्मात् तस्य पानमिष्यते, न खादनम्।

इत्थं अस्मदभिलषितेष्टानिष्टप्राप्तिपरिहाररूपसकलपुरुषार्थसाधनतया अपारमहिमा श्रीकृष्ण इत्यनुसन्धाय स ध्येय इति भावः।

---

# सद्विप्रमहिमा ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

——:o❀o:——

अयं श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकस्मिन्नध्याये वर्ण्यते—

भीष्मो युधिष्ठिरमेवमभ्यभाषत— कार्तवीर्यार्जुनः पवनेन निगदितं च्यवनस्य माहात्म्यमाकर्ण्य तूष्णीमासीत्। पवमानः कार्तवीर्यमर्जुनं प्रति पुनरेवमब्रवीत्— जनाधिप, ब्राह्मणानामेव मुख्यं कर्म मत्तः शृणु। यदा सेन्द्रा दिवौकसो मदनाम्नश्शत्रोरास्यमभजन् तदैव च्यवनेन तेषां वसुन्धरा द्यौश्चाह्रियत। ते देवा उभौ लोकौ तेन हृतौ मत्वा शुशुचुः। शोकार्तास्ते महात्मानं ब्रह्माणं शरणं गत्वा, 'जगत्पूजित, प्रभो, अस्माकं मदमुखं प्रविष्टानां सतां च्यवनः कपैर्भूमिं स्वर्गं चापाहारयत्।' इत्यगदन्। ब्रह्मा, 'हे सुराः, यूयं विप्रानाशु शरणं व्रजत। तान्प्रसाद्योभौ लोकौ यथापुरमवाप्स्यथ।' इत्यलपत। ते विप्रान् शरणमविन्दन्। ते ब्राह्मणाः 'वयं कान् जयाम' इत्यमरानपृच्छन्। एवं पृष्टास्ते 'कपानद्य जयत' इति द्विजान् प्रत्युत्तरं ददुः। द्विजाः, 'वयं भूगतांस्तान् विजेतारः।' इत्याचक्षत। ततो ब्राह्मणैः कपनाशनं कर्म समारभ्यत। तन्निशम्य कपैर्ब्राह्मणेभ्यो धनिनामादूतः प्रैष्यत। स धनी ब्राह्मणान्प्रति कपवच इत्थमन्ववदत। सर्वे कपा भवद्भिस्सदृशाः। इह किं कर्म प्रवर्तते। अशेषाः कपा वेदविदः प्राज्ञाः क्रतुयाजिनः सत्यव्रताः महर्षिभिस्तुल्याश्च। श्रीस्तेषु रमते। ते श्रियं रक्षन्ति। वृथा दारान्न गच्छन्ति। मुधा मांसं न भक्षयन्ति। दीप्तमग्निं जुह्वति। गुरूणां वचने तिष्ठन्ति। सर्वे स्वमनः स्वाधीनमकलयन्। भोक्तव्यं वस्तु बालेभ्यो विभज्य दत्त्वा भुञ्जते। शनकैरुपेत्य शनकैर्यान्ति। रजस्वलां न सेवन्ते, स्वर्गमासीदन्ति, शुभं कर्माचरन्ति, गर्भिणीवृद्धादिष्वभुक्तवत्सु नाश्नन्ति, पूर्वाह्णेष्वक्षैर्न दीव्यन्ति, दिवा न शेरते। एतैरन्यैश्च बहुभिर्गुणैर्युक्तान् कपान् कथं जेष्यथ। विरमत निवृत्तानां वः सुखं हि। ब्राह्मणाः, 'कपान् वयं विजेष्यामहे। ये देवास्ते वयमेव। तस्मात्कपा अस्माकं वध्याः। धनिन्, यथागतं याहि' इत्युदैरयन्। धनी कपानासाद्य 'विप्रा वः प्रियकरा न।' इत्याहस। अतो निखिलाः कपा

अस्त्राणि गृहीत्वा विप्रानभ्यद्रवन्। ऊर्ध्वांप्रध्वजान् कपान्वीक्ष्य समस्ता द्विजातयः कपानां प्राणनाशकान् ज्वलितान् दक्षिणाग्निगार्हपत्याहवनीयानग्नीन् व्यसृजन्। नराधिप, ब्राह्मणप्रहितास्सनातना हव्यभुजः कपान् हत्वा नभस्यभ्राणीव व्यराजन्त। निश्शेषा दिविषदस्सम्भूय संयुगे दानवानघ्नन्। ते निर्जरास्तदा कपान् ब्राह्मणैर्मारितान्न प्राजानन्, प्रभो, अथ महातेजा नारद आगम्य तेषु, 'महाभागैर्ब्राह्मणैस्तेजसा कपा हिंसिताः।' इत्यकथयत्। ते सकला अपि नारदस्य वचनमाकर्ण्य प्रीता वेदविदो यशस्विनो ब्राह्मणान् प्रशशंसुः। ततस्तेषामादितेयानां तेजो वीर्यञ्च ववृधे। ते त्रिषु भुवनेषु महितममरत्वमजुषन्त। महाबाहो, मानवाधिप, युधिष्ठिर, इत्युक्तवचनं वायुं कार्तवीर्यार्जुनः प्रतिपूज्य यत्प्रत्युवाच तन्निशमय, सोऽर्जुनः, 'प्रभो, अहं सर्वथा सततं ब्राह्मणेभ्यो जीवामि। ब्राह्मणेषु प्रीतिमांस्तेभ्यो नित्यं प्रणमामि। दत्तात्रेयप्रसादादेवेदं बलं लोके परमा कीर्तिर्महतो धर्मस्याचरणञ्च समभवत्। हे मारुत, मयि त्वया ब्राह्मणकर्माणि तत्त्वतस्सम्यगाख्यायन्त। तानि सर्वाणि प्रयतेन मयाऽश्रूयन्त च, अहो।' इत्यभणत्। वातः, 'इन्द्रियाणि संयम्य ब्राह्मणान् क्षात्रधर्मेण पालयस्व। ते ब्राह्मणेभ्यो घोरं भयमस्ति। तत्तु कालाद्भविष्यति।' इत्यभ्यधत्त।

---

# राज्यविपर्ययः॥

(8)

## मन्त्रिसभा (अनुवृत्ता)

अकम्पनः— मान्य, अमात्यवर्य, सर्वत्र किञ्चित् प्रतिवक्तव्यमिति नियमो नावलम्बनीयः। प्राज्ञेनात्रभवता तत्त्वोपलम्भः कार्यः।

अमात्यः— सम्यगनुशिष्टोऽस्मि। किन्तु नाहं किमपि केवलं प्रतिवचनसंरम्भाद् ब्रवीमि। अतात्त्विके क्वापि नाहमभिनिविष्टो भवामि। भवामि चेत् तत् प्रदर्श्यताम्।

अकम्पनः— अत्रभवानाह— पितुर्या वृत्तिः सा परकीयेति। न खलवयं

परमार्थः । यस्य या वृत्तिरिष्टा स तामाश्रयति । पितृवृत्तिरेव पुत्रेण आश्रयणीयेति निर्बन्धो निर्निबन्धनः । तत्र का स्वकीयता वा परकीयता वा ?

अमात्यः—साधु पृच्छ्यते । किन्तु समाधानमुच्यमानं यथावदवगन्तुमपि अत्रभवता यतितव्यम् । न तु, स्वाभिप्रायविरुद्धं सर्वं परैः आग्रहादुच्यते, अतात्त्विकमिति सहसा प्रतिपत्तव्यम् । इदं भवान् ब्रवीतु—पितुर्यत् स्वं, धनं वा क्षेत्रं वा, अन्यद्वा, तत् पितुरनन्तरं को गृह्णाति ?

अकम्पनः— पुत्र एव ।

अमात्यः— तत् किं भवान् न्याय्यं मन्यते । अथवा तत्रापि विप्रतिपत्तिरस्ति ?

अकम्पनः— तदहं अद्यावधि न चिन्तितवानस्मि ।

अमात्यः— न खलु तच्चिन्तनाय अन्यः कोऽपि समयोऽन्वेषणीयः । इदानीमेव चिन्त्यताम् । न चायं न मुख्यो विषयः । तत्त्वोपलम्भे च भवान् श्रद्धालुः ।

अकम्पनः— न्याय्यमेवेदं भाति यत् पितुः स्वं पुत्रो गृह्णाति । परन्तु यदि प्रश्नः क्रियते पुत्र एव ग्रहीतुमर्हतीति को निर्बन्ध इति, तत्र उचितमुत्तरं दातुं नाहं शक्नोमि ।

अमात्यः— श्लाघ्यं भवतः आर्जवम् । किन्तु सर्वत्र भवदुक्तरीत्या तत्त्वोपलम्भे यत्नः कार्यः । तत्र प्रथमकर्तव्यं स्वगृहीतेऽर्थे अभिनिवेशवर्जनम् । द्वितीयं, अद्य अत्यन्तं नवीनया पाश्चात्यजनानुसृतया प्रक्रियया शिक्षितकतिपयाक्षराणां, अनादिकालप्रवृत्ते अस्मदीयसकलपूर्वपुरुषादृते निर्दोषशास्त्रोपदिष्टे धर्ममार्गे जात्यन्धानां अस्माकं स्वबुद्धिमात्रावष्टम्भेन किं लोके उत्तमजीवनपद्धतितत्त्वावधारणं सुकरमिति पर्यालोचयम् ।

अकम्पनः— किं नाम वयं तथा जडाः ?

अमात्यः— नाहं तथा ब्रवीमि । विषयस्तु तथा गहनः, तथा गम्भीर इति ब्रवीमि ।

अकम्पनः— किञ्चिद् विवरणमत्रभवता क्रियमाणं ममोपकाराय कल्पेत ।

अमात्यः— सज्जोऽस्मि । ससन्तोषं करोमि । सावधानं श्रोतव्यम् । श्रुत्वा सम्यक् मन्तव्यम् । ततः तत्त्वमवधारणीयम् । पितुरेव रूपान्तरं पुत्रः । पिता पुनरपि जायायां जायते । स जातः पुत्रो भवति । आत्मा

पुत्रनामा भवतीति आमनन्ति। लोके पुत्राः पितरं 'अप्पा' इत्याह्वयन्ति। जानासि भवान् तस्य तत्त्वम्? 'आत्मा' इत्ययं संस्कृतशब्दः प्राकृत-व्यवहारे एवं परिणमति। तस्मात् पितुरनन्यः पुत्रः। अतः तस्य यत् स्वं तत् स्वत एवास्य स्वं भवति। तथा वृत्तिरपि।

अकम्पनः— तेन किं धूमपायिनः पुत्रः अवश्यं धूमं पातुमर्हति?

अमात्यः— न। नैव। अस्मद्वचनात् एतन्न निर्गलति। दुराचारोऽयं धूमपानं नाम। तस्मात् तत् परिवर्जयितुमर्हति विवेकी श्रेयस्कामश्च पुत्रः, न तु स्वयमप्याचरितुम्।

अकम्पनः— एवमेव कृषीवलपुत्रस्य कृषिकर्मापि। चिन्वणपुत्रस्य पाद-रक्षानिर्माणमपि। रजकपुत्रस्य परवस्त्रधावनमपि।

अमात्यः— (सस्मितम्) किं धूमपानवत् दुराचारः कृषिकर्मादिः?

अकम्पनः— (किञ्चित्स्वस्थरीभूय) न दुराचारः। तथापि निहीनं कर्मैव।

अमात्यः— नैव नैव, आर्य अकम्पन, नैव इतःपरमेवं मन्तव्यम्। नैव च पुनः क्वचिदपि एवं वक्तव्यम्। स्फुटमहं पश्यामि भवदन्तरात्माऽपि अत्र विसंवदति।

अकम्पनः— भवत्वेवम्। तत् सर्वं बहुप्रयाससाध्यं कर्म।

अमात्यः— सत्यं तथा। प्रयासं विना कोऽस्मिन् लोके जीवितुमर्हति। अलसो हि लोकस्य भारः। जीवता सर्वेण यत् किमपि स्वशक्त्यनुगुणं सफलं कर्म कर्तव्यम्। प्रयाससाध्यमिति कृत्वा नियतं कर्म किमपि न परित्यक्तव्यम्। लोके किं कर्म प्रयासं विना सुकरम्? किं राज्यपरि-पालने मन्त्रिपदवहनं इत्यादि भवान् अप्रयाससाध्यं केवलमानन्दानु-भवरूपं मन्यते?

गुरुदत्तः— (अकम्पनं प्रतिपत्तिशून्यं पश्यन्) अमात्य प्रभो, कालोऽति-क्रान्तः। स्वसुहृद्भिः संमन्त्र्य अत्रभवान् अकम्पनः पुनरागत्य सम्भा-षिष्यते। अद्य वयं सर्वे अनुमन्तव्याः।

अमात्यः— तथा भवतु। आर्य अकम्पन, पुनः सङ्गच्छेमहि। अद्य गत्वा मित्रैः साकं सुखं वर्ततां भवान्। प्रागेव ज्ञापितवानस्मि अपेक्षितं सर्वं सद्यः सम्पन्नं भविष्यतीति। प्रियातिथयो भवन्तो महाराजस्य। (सर्वे-स्मितं कृत्वा उत्थिताः)।

# विमर्शगोष्ठी ॥

(11)

केशवः — उपनयनसंस्कारनैयत्यं उपाकर्मविधानं च पर्यालोचयतां वेदाध्ययनफलस्य महत्ता सुग्रहा, इति प्रत्यपादि भगवता। तदयं गृहीतवन्तः स्मः। किं तत् फलमिति तु नः सम्प्रति शुश्रूषा।

महान्— जानन्ति भवन्तः वेदप्रतिपाद्योऽर्थः क इति।

नारायणः— स्थूलं जानीमः कर्मेति।

महान्— साधु। कर्म वेदप्रतिपाद्योऽर्थः। अथ कर्मेति किमुच्यते? यज्ञः। विविधा यज्ञा यजुर्वेदे विधीयन्ते। तेषु उपयुज्यमानानि प्रगीताप्रगीतमन्त्रसाध्यदेवतागुणाभिधानरूपाणि स्तोत्रं शस्त्राणि सामवेदऋग्वेदयोर्दृश्यन्ते। तेन इमे त्रयोऽपि वेदाः यज्ञकर्मप्रधानाः। यज्ञकर्मणि लोकः कृत्स्नः प्रतिष्ठितः।

सह यज्ञैः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

देवान् भावयताऽनेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।
ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात् ॥

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञःकर्मसमुद्भवः ॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥

इति गीतासु यज्ञप्राधान्यं सम्यगुपदिष्टम्। इदमस्माभिरन्यत्र विस्तरेणोपपादितम्। लोकस्थितिहेतुर्यज्ञः वेदप्रतिपाद्योऽर्थ इति तु सम्प्रति सर्वैर्युष्माभिः दृढं बुद्धौ धार्यम्। उपनीतेन बालेन उत्तरीत्या श्रावण्यां

पौर्णमास्यां उपाकर्म कृत्वा गुरोः सकाशात् स्ववेदशाखामधीत्य तदर्थ-मपि ज्ञात्वा युक्ते वयसि गृहस्थाश्रमे प्रविश्य यथाविधि यज्ञानुष्ठानेन भगवन्तमाराधयता, लोकस्योपकुर्वता, आत्मनश्च श्रेयः सम्पादयता भवितव्यम् । इदं वेदानां प्रयोजनम् । वेदान् विना लोकयात्रा न सम्यक् प्रचलेत् । तस्मात् ते सर्वप्रधानभूताः । तदुपकारकतया अन्यानि शास्त्राणि अर्थवन्ति ।

नारायणः—इदानीं वेदाध्ययनं बहवो न कुर्वन्ति । यष्टारः प्रायो न सन्ती-त्येव वक्तव्यम् ।

महान्— अत एवेदानीं लोके अनर्था बहुलीभवन्ति । जना विविधानि कष्टानि अनुभवन्ति । शान्तिरत्यन्तं लुप्ता ।

नारायणः— कोऽत्र श्रद्धां करिष्यति – अद्यतनी लोकस्य दुरवस्था वेदो-पदेशतिरस्काराधीनेति ।

महान्— सत्यं, न कोऽपि श्रद्धास्यति । तत्त्वं पुनस्तदेव । जनानां अन्नस-मृद्धिः यज्ञैकमूला । कालक्रमेण यज्ञानुष्ठानं बहुक्लेशसाध्यमभूत् । कति-पय एवान्वतिष्ठन् । तथापि वेदाध्ययनपारायणादिषु सर्वेषां श्रद्धा बभूव । केवलवेदाध्ययनेनापि तदर्थयज्ञानुष्ठानफलं भवतीति शास्त्राण्युपदि-शन्ति । तस्मात् तदपि वा सम्यक् निर्वर्तनीयमिति मन्वानाः सर्वे तत्र अभ्यधिकमादरं कुर्वन्ति स्म । आचारसम्पन्नाः द्विजा एव वेदाध्ययने तदर्थानुष्ठाने च अधिकारिणः । तैरेव यथाविधि प्रयुक्ता मन्त्रा यज्ञाश्च फलदायिनः स्युः । इदं तत्त्वं पूर्वं सर्वैर्जनैर्विदितमासीत् । कृषीवलाः कर्षणेन यद् धान्यमुत्पादयन्ति, तत् सर्वं तैरेव न भुज्यते । यावदपेक्षं ते भुञ्जते । अधिकं सर्वं अन्यैरुपयुज्यते । तेन कृषिकर्म कृषीवलैः क्रियमाणं न परं तेषामेवोपकारकं, अपि तु सर्वेषां जनानाम् । तथैव श्रोत्रियैः स्वाधिकारानुरूपं क्रियमाणं वेदाध्ययनयज्ञकर्मादि । एवमेतत् तत्त्वं विदन्तः आपण्डितपामरं सर्वे जनाः बहुधा जातिभेदेऽपि कर्म-भेदेऽपि सति परस्परकलहासूयापरिवादादिकं विना, प्रत्युत मिथः प्रीतिबहुमानशालिनः सुसुखमजीवन् । स्वस्वधर्मपरिपालनादेव जनानां सुखजीवनं सम्पद्यते । स्वधर्मपरित्यागे वा, परधर्मसङ्गे वा, सत्यवदनं अहिंसा अस्तेयं इत्येवमादीनां सामान्यधर्माणां अपरिपालने वा जनानां दुःसहा विविधाः पीडा भवेयुः इत्यस्मिन् धर्मपरिपालनसुखजीवनयोः

कार्यकारणभावरूपे सम्बन्धे यः दृढो विश्वासः तदेव अस्मन्मतम्, यत् 'हिन्दुमतम्' इति अद्यतना व्यवहरन्ति।

नारायणः— प्राचीने धर्ममार्गे दूरमवगाहनं कृतवतो भगवत उपदेशेन इदमिदानीं वयं जानीमः, नास्ति कश्चिदन्यः य इदं जानाति।

महान्— सौम्याः, अस्मद्धर्मतत्त्वमिदं चिराद् विस्मृतमभूत्। तथा विस्मृतं यथा अद्य बोध्यमाना अपि न बोद्धुं क्षमन्ते। तेन हेतुना कालक्रमेण धर्मानुष्ठाने, वेदाध्ययने, शास्त्राधिगमे, आचारानुवर्तने च सर्वत्र अश्रद्धाऽवर्धत। एतेषु केवलसाङ्केतिकत्वमतिः वैफल्य-बुद्धिश्च बहूनाम्। अन्ततः वर्णाश्रमव्यवस्थैव अनपेक्षिता संवृत्ता। प्रत्युत नानाविप्रतिपत्तिकरीति कृत्वा एनां विध्वंसयितुं बद्धकच्छा बहवो दृश्यन्ते। इत्थं धर्ममार्गस्य अत्यन्तं लोपे प्रसक्ते नेदं चित्रं यत् तदुपदेशपरा संस्कृतविद्या अनादृता क्षीयमाणा वर्तते॥

# प्रकृतिभेदः॥

अग्रजा— मा भूदम्ब इतःपरं वत्सो वासुः मा स्म मातुलानीगृहं गच्छत्। अलं इयन्तं कालमधीतया विद्यया। अत्र गच्छ, तत्र गच्छ; इदं कुरु तत् कुरु, इत्यविरतं भृत्यमिव कर्म कारयति सा एनम्। न तस्याः करुणाऽस्ति, न दाक्षिण्यम्।

माता— वत्से, यत्त्वं ब्रवीषि तत् सत्यम्। अथापि किं क्रियताम्। अस्मिन् वयसि नाधीते चेत् उत्तरत्र वत्सः किं कुर्यात्? कथं जीवेत्? मातुलानीं विना कोऽन्यो बन्धुरस्ति य एनं नीत्वा पोषयेत्? कञ्चन कालं सर्वः क्लेशो वत्सेन सह्य एव। अस्माभिश्च।

पिता— किमयि युवां ब्रूथः? मा स्म धूपं दत्तं वत्सस्य। गृहे चेत् कश्चिदस्ति तदा तदा किमपि कर्म कर्तव्यमेव भवति। अत्र स्थितं किं वयं न चोदयामः आपणं गच्छ, लवणमाहर, अम्लमाहर, शाकापणं गच्छ, शाकमाहर; धेनुं कालय, वत्सं बधानेति। एवं मातुलान्याऽपि चोदितः किमपि करोति चेत् किं तत्र आपतति। प्रत्युत नानाव्यवहारेषु व्युत्पत्तिर्भवति। आयत्यां कुटुम्बकार्याणि सम्यक् निर्वक्ष्यति।

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 7

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ हेविळम्बि - मीन [सं ७

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

MARCH, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीसम्पत्तावपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन् । पद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraj* D.T. Tatacharya Siromni, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः— श्रीगीतार्थदीपः । २४९—२५६

TIRUPATI

तैस्सह परिमितं भोगं भुक्त्वा तेषां विनाशकाले तैस्सह विनष्टा भवन्ति; मद्यजनशीला वैष्णवास्तु मां प्राप्य न पुनर्निवर्तन्ते । समानेऽप्यायासे एकस्यैव कर्मणस्सङ्कल्पाख्यसहकारिभेदात् भोगमोक्षरूपफलभेदसाधनत्वमुक्तं भवति ।

தர்ச பூர்ணமாஸம் முதலிய கர்மாக்களால் இந்திராதி தேவர்களை ஆராதனம் செய்ய ஸங்கல்பம் கொண்டவர்கள் அந்த தேவர்களை அடைகின்றார்கள். அக்நிஷ்வாத்தர் முதலிய பித்ருக்களை ஆராதிக்கும் வ்ரதம் பூண்டவர்கள் அந்த பித்ருக்களை அடைகின்றார்கள். யக்ஷராக்ஷஸர் முதலிய பூதங்களை பூஜிக்கும் வ்ரதமுடையவர் அந்த யக்ஷராக்ஷஸர்களையடைகின்றார்கள். அவரவர் லோகங்களில் அவரவர்களுக்கு ஸமாநமான போகங்களைத் தாங்கள் பெற்று அந்த லோகம் அழிந்தவாறே அவர்களோடு தாங்களும் அழிவையடைகின்றார்கள். பகவானாகிய என்னை அதே கர்மாக்களைக் கொண்டு ஆராதனம் செய்ய ஸங்கல்பம் கொண்டவர்களோவெனில் நிரதிசயானந்தத்தை சாச்வதமாகப் பெறுகின்றார்கள். இவ்வாறு அவரவர் ஸங்கல்பத்தினால் பலன்களில் வேற்றுமை ஏற்படுகின்றது. 25

३६३ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥

समानेऽप्यायासे सङ्कल्पभेदात् प्राप्यवैषम्यमुक्तम्; अथोपायवैषम्यमुच्यते– पत्रपुष्पफलानां प्रायशो हेतुकार्यभावात्क्रमविन्यासः । तत्तत्कालानुरूपं यथासम्भवं लभ्यं पत्रं वा पुष्पं वा फलं वा सर्वाभावेऽपि तोयम् - उदकं वा, यः - सापराधो वा निरपराधो वा जडो वा अजडो वा भक्त्या - दृष्टादृष्टप्रत्यवायपरिहारफलान्तरहेतुत्वाभिसन्धिरहितया प्रीत्या, मे - मह्यम्, प्रयच्छति - समर्पयति, प्रयतात्मनः - प्रयतः - प्रयोजनान्तररागरूपाशुद्धिविरहितः, आत्मा - मनः, यस्य सः प्रयतात्मा तस्य प्रयतात्मनः - तत्प्रदानैकप्रयोजनत्वरूपशुद्धियुक्तमनसः, तस्य - पुरुषस्य, भक्त्युपहृतं - भक्त्या समर्पितम्, 'पुनः कीर्तनं भगवदादरणीयत्वे हेतुरय-

मेवेति ज्ञापनीयम्। तत् - तथाविधभक्त्युपहृतं वस्तु, अहं - अवाप्तसमस्तकामः, अश्नामि - प्रतिगृह्णामि, 'अश्नामि' इत्युपभोगमात्रलक्षणा, तेन निवेद्याभावे पत्रादिकमपि निवेद्यं स्यादिति व्यज्यते।

யாவனொருவன் உபஹாரத்தை எனக்கு ஸமர்ப்பணம் செய்தலையே பரமப்ரயோஜனமாகக் கொண்டு காலோசிதமாய்க் கிடைக்கப்பெற்ற பத்ரபுஷ்ப பலங்களில் ஏதேனுமொன்றையோ, ஒன்றும் கிடைக்காவிடில் ஜலத்தையோ, ஸமர்ப்பிக்கின்றானோ அவன் பக்தியோடு ஸமர்ப்பணம் செய்யும் அந்த உபஹாரத்தை, யான் நித்யானந்த பூர்ணனாயிருக்கச் செய்தேயும் கிடைக்காதது கிடைத்ததாக எண்ணி அனுபவிக்கின்றேன். 26

२६४ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ २७॥

महात्मानां विशेष उक्तः; अथ तत्परिगृहीतं भक्तियोगं वक्तुं तदङ्गभूतं बुद्धिविशेषमनुशास्ति - इममेव च श्लोकं 'यत्करोमि यदश्नामि यज्जुहोमि ददामि यत्, यत्तपस्यामि भगवन् तत्करोमि त्वदर्पणम्' इत्युक्तं मन्त्रमेव केचिदनुसन्दधते। यत्तच्छब्दाः क्रियाविशेषपराः। हे कौन्तेय, यत् - स्वभावप्राप्तं स्थितिगमनादिकं, करोषि, यत् - अर्थप्राप्तं आहारादिकं, अश्नासि - देहधारणाय करोषि, यत् - शास्त्रप्राप्तं होमादि जुहोषि - करोषि, यत् - दानादिकं, ददासि - करोषि, यत् - तपः, तपस्यसि - करोषि, तत् - पूर्वोक्तं सर्वं कर्म, मदर्पणम् - अर्प्यत इत्यर्पणम्, मयि अर्पणं मदर्पणं, मयि समर्पितं, कुरुष्व, स्वभावप्राप्तं अर्थप्राप्तं च लौकिकं यत्कर्म, यच्च शास्त्रप्राप्तं वैदिकं कर्म तस्य सर्वस्य कर्मणः तत्कर्तुः तत्फलस्य तदाराध्यदेवादेश्च मच्छेषतैकरसतामनुसन्धत्स्व।

ஓ அர்ஜுனா! நீ செய்யும் தூக்கம் நடை ஆஹாரம் முதலிய லௌகிக கர்மாக்களையும் ஹோமம் தானம் தபஸ்ஸு முதலிய வைதிக கர்மாக்களையும் என்னிடத்திலே ஸமர்ப்பணம் செய்யக் கடவாய். கர்மா, அதை செய்பவன், கர்மபலன், கர்மாராத்ய தேவதை, இவை முதலியனவெல்லாம் பகவானுக்குச் சேஷபூதங்கள் என்று அநுஸந்தாநம் செய்வாயாக. 27

३६५ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

पूर्वश्लोकोक्तरीत्या कुर्वतः तव यत् भवति तत् शृणु– एवं - पूर्वोक्तरीत्या, सन्न्यासयोगयुक्तात्मा - सन्न्यासश्चासौ योगश्च सन्न्यासयोगः, तेन युक्तः आत्मा मनः यस्य सः सन्न्यासयोगयुक्तात्मा योगशब्दोऽत्रानुसन्धानपरः, सन्न्यासः - पूर्वोक्तं समर्पणम्, समर्पणरूपानुसन्धानयुक्तमनास्सन्, शुभाशुभफलैः - शुभाशुभे इष्टानिष्टे, फले येषां तानि शुभाशुभफलानि तैः कर्मबन्धनैः कर्माख्यबन्धनैः, मोक्ष्यसे - विमुक्तो भविष्यसि, विमुक्तस्सन् मां उपैष्यसि पतिते शरीरे मामेव आगमिष्यसि ।

*முன் சொல்லியபடி பகவானுக்கு அனைத்தையும் ஸமர்ப்பணம் செய்யும் மனநிலையோடு அனுஷ்டிக்கும் கர்மாக்களினால் சுபாசுபங்களான ஸம்ஸாரபந்தங்கள் ஏற்படமாட்டா. கர்மாவினால் விடுபட்டு என்னையே அடைவாய்.* 28

३६६ समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥

द्रव्यतारतम्यानादरेण स्वीकारकथनात् 'पत्रं पुष्पं' इति श्लोकेन सौलभ्यमुक्तं भवति, यत्करोषि इत्यादिश्लोकद्वयेन क्रियमाणस्य सर्वस्य बुद्धिविशेषमात्रेण तदाराधनत्वसम्पत्त्या तदेव सौलभ्यं दृढीकृतम् । अत्र श्लोके तु जात्याकारादितारतम्यानादरेण भक्तैस्स्वस्यैकरस्यरूपं सौशील्यमुच्यते– भक्तानुग्रहेण तदितरनिग्रहेण च जाता रागद्वेषशङ्का प्रतिक्षिप्यते– सर्वभूतेषु - देवतिर्यङ्मानुष्यस्थावरात्मनाऽवस्थितेषु सर्वेषु भूतेषु अहम्, समः - समाश्रयणीयत्वे तुल्यः, मे द्वेष्यः नास्ति - उद्वेजनीयतया त्याज्यो न ममास्ति, प्रियः न - न संग्राह्योऽस्ति, दूरस्थानां अग्निः शीतं यथा नापनयति, समीपं उपसर्पताम् अपनयति तथाऽहं भक्तान् अनुगृह्णामि, नेतरान् । ये तु - जात्यादिभिः उत्कृष्टा वा अपकृष्टा वा, मां, भक्त्या भजन्ति - मद्भजनैकप्रयोजनाः मां भजन्ते, 'भक्त्या' इति प्रयोजनस्य हेतु-

त्वविवक्षया तृतीया अध्ययनेन वसतीतिवत् ते - भक्ताः उत्कृष्टा अपकृष्टाश्च मयि (वर्तन्ते) तेषु चापि, अहं (वर्ते) तुल्यानामिवान्योन्यमैकरस्यमिह 'मयि ते तेषु चाप्यहम्' इत्यनेन विवक्षितम् । अहं च ते चान्योन्यं पित्रादिष्विव न्यस्तभराः ते मां सम्भावयन्ति, अहं तान् सम्भावयामि इति संपिण्डितार्थः । स्वजातिप्रतिनियतधर्मैर्भजनान्नापकृष्टजातिनिर्देशविरोधः ।

ஜாதி முதலியவற்றால் உயர்ந்தோர் தாழ்ந்தோர் என்கின்ற வேற்றுமை எனக்கு கிடையாது. எல்லோரிடத்திலும் நான் ஸமமாயிருப்பவன், எனக்கு விரோதி மித்ரன் என்பவன் கிடையாது. எவர்கள் என்னை ஸ்வயம் ப்ரயோஜனமாக பஜநம் பண்ணுகின்றார்களோ அவர்களெல்லோரையும் என்னோடும் அவர்கள் பரஸ்பரமும் துல்யமானவர்கள், பக்தர்கள் என்கிற நிலையைத் தவிர்த்து மற்ற உயர்வு தாழ்வுகளை நான் எண்ணுவதில்லை. 29

३६७ अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यस्सम्यग्व्यवसितो हि सः ॥ ३० ॥

समाश्रितस्वीकारे जात्याद्यपकर्षोऽकिञ्चित्कर इत्युक्तम्, वृत्तापकर्षोऽप्यकिञ्चित्कर इत्युच्यते — सुदुराचारोपि - अतीव कुत्सिताचारोपि, अनन्यभाक् - नान्यभक्तिस्सन्, मां, भजते चेत्, सः, साधुरेव - वैष्णवाग्रेसर इव, 'विष्णुरेव - भूत्वा' इतिवत् साम्यार्थ एवकारः, मन्तव्यः - बहुमन्तव्यः, संपूर्वकस्य मनि धातोः बहुमतिरर्थः ; उपसर्गार्थाश्च धातुलीनाः, अतो बहुमन्तव्य इत्यर्थलाभः, हि - यस्मात् कारणात्, सः - उक्तस्सुदुराचारो भक्तः, सम्यक् - यथावत्, व्यवसितः - अध्यवसायवान्, नारायण एव मम सर्वमिति सर्वैर्दुष्प्रापोऽयं व्यवसायस्तेन कृतः, अतो बहुमन्तव्यस्सः ।

தன்னுடைய ஜாதி தர்மம் குலதர்மம் முதலியவற்றிற்கு விபரீத நடையுடையனேயாகிலும் என்னை ஸ்வயம் ப்ரயோஜநமாக பஜநம் செய்வானாகில் அவன் சிறந்த வைஷ்ணவர்களோடு

ஸமாசமாக வெகுமதிக்கத்தக்கவன், ஏனெனில் ஸ்ரீமந்நாராயணனே உபாயமும் பலமும் என்று த்ருடமான அத்யவஸாயம் அவனுக்கு இருக்கிறதன்றோ. அதனால் அவன் பூஜிக்கத் தகுந்தவனாகிறான். 30

२६८ क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

अस्त्वन्येषां बहुमन्तव्यः; अथापि आचारव्यतिक्रमः उत्तरोत्तरभजनप्रवाहं निरुणद्धीत्यत्राह - क्षिप्रं - शीघ्रम्, धर्मात्मा - धर्मे - भजनरूपे, आत्मा - मनः, यस्य स धर्मात्मा मद्भजनैकमना, भवति, शश्वच्छान्तिम् – शाश्वतीमपुनरावर्तिनीं, शान्तिं – मत्प्राप्तिविरोध्याचारनिवृत्तिलक्षणां, निगच्छति - नितरां प्राप्नोति, हे कौन्तेय, मे, भक्तः, न प्रणश्यति - मत्प्राप्तिविरोध्याचारेण न नाशं प्राप्नोति, अपि तु मद्भक्तिमाहात्म्येन सर्वं विरोधिजातं नाशयित्वा क्षिप्रं भक्तिपरिपूर्तिं भजते [इति] प्रतिजानीहि - त्वमेवास्मिन्नर्थे प्रतिज्ञां कुरु। मत्प्रतिज्ञानादपि त्वत्प्रतिज्ञानं अत्यन्तस्थिरम्। मत्प्रतिज्ञां विहायापि भक्तप्रतिज्ञां निर्वर्तयामीति हि सुप्रसिद्धम्।

அர்ஜுனா! என் பக்கம் பக்தி செய்வதின் ப்ரபாவத்தினால் துராசாரனும் சீக்கிரத்தில் துராசாரத்தைத் துறந்து என் பஜனத்திலே ஈடுபட்டவனாகிறான். என் பக்தன் ஒரு பொழுதும் அழியமாட்டான் என்பதை நீயே ப்ரதிக்ஞை செய். 31

२६९ मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२ ॥

२७० किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

अपि चेत्सुदुराचार इत्यागन्तुकपापोक्तिः; अथ जन्मत एव पापिष्ठानां जात्याद्यपकर्षेऽपि स्वसमाश्रयणमात्रेण फलसिद्धिं प्राक्प्रस्तुतां

अपकृष्य तत एव जात्याद्युत्कर्षं भक्तिपौष्कल्ये च कैमुतिकन्यायमुक्त्वा जात्यादिभिरुत्कृष्टत्वं फले निस्संदेह उपायमाहात्म्यमित्युच्यते "मां हि" इति श्लोकद्वयेन - हे पार्थ ! ये पापयोनयोऽपि स्युः, पापं योनिः कारणं येषां ते पापयोनयः पापजन्मानः [ते] स्त्रियः वैश्याः तथा शूद्रा अपि, मां, व्यपाश्रित्य, परां गतिं, यान्ति हि, वैश्यस्य त्रैवर्णिकत्वेऽपि सत्त्वानधिकारात् पापयोनित्वम्, पुण्याः - पुण्ययोनयः - भक्ताः, ब्राह्मणाः तथा राजर्षयश्च राजानश्च ते ऋषयश्च राजर्षयः परां गतिं यान्तीति किंपुनः - अतः अनित्यं क्षणभङ्गुरम्, असुखं सुखवर्जितं च इमं लोकं - अतिक्षुद्रं भूलोकम्, प्राप्य, [वर्तमानः] त्वम् मां, भजस्व, एवमनित्यत्वासुखत्वातिक्षुद्रत्वदर्शनाद्भजनवैमुख्यनिवृत्तिर्भवतीति भावः ।

அர்ஜுனா! பாப ஜன்மத்தில் பிறந்தவர்களான ஸ்த்ரீகள் வைச்யர் சூத்ரர் இவர்களும் என்னை பக்தி பண்ணி உத்தம கதியை யடைகின்றார்கள். புண்ய ஜன்மம் பெற்று பக்தி பண்ணும் ப்ராம்மணர்களும், ஞானிகளான க்ஷத்ரியர்களும் பரவ கதியடைவதில் ஸந்தேஹமேயில்லை. இவ்வுலகம் அநித்ய மும் ஸுகமில்லாததும் மிக அல்பமுமானது. இதில் பிறந்திருக்கின்ற நீ இதன் தன்மையை அறிந்து என்னை பஜனம் செய், சாச்வதமான கதியைப் பெறுவாய். 32, 33

३७१ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम
नवमोऽध्यायः

---

'भजस्व' इत्युक्तभक्तिस्वरूपनिष्कर्षः क्रियते - मयि वासुदेवे मनो यस्य सः मन्मनाः, मनश्शब्दोऽत्र ध्यानाख्यमनोवृत्तिविषयः, ध्यानं विशिनष्टि - 'मद्भक्त' इति अत्यर्थप्रियत्वेन युक्तो मन्मनाः भव, पुनरपि भक्त्यसाधारणशास्त्रीयपूजाविशेषैः भक्तिं विशिनष्टि - 'मद्याजी'

इति भजनं नाम - परिपूर्णशेषवृत्तिः, पुनरपि तदेव विशिनष्टि - 'मां, नमस्कुरु' इति मयि प्रह्वीभावव्यवसायं कुरु, एवं, आत्मानं - मनः युक्त्वा - प्राप्य, युजिरत्र योगार्थकः, मत्परायणस्सन् - अहमेव परं अयनं - आश्रयः यस्यासौ मत्परायणः - एवं भूतस्सन् मामेव, एष्यसि - प्राप्स्यसि, मां ध्यात्वा मामनुभूय मामिष्ट्वा मां नमस्कृत्य मत्परायणो मामेव प्राप्स्यसि।

என்னையே பரமப்ரீதியுடன் த்யாநம் செய்து என்னை ஆராதநம் செய்து நமஸ்காரம் செய்து இப்படியே உன் மனதை என்பக்கலிலேயே செலுத்தி என்னையே ஆச்ரயமாகக் கொண்டு என்னையே அடைவாய். 34

इति श्रीगीतार्थदीपे नवमोऽध्यायः।

---

## अथ दशमोऽध्यायः॥

---

श्रीभगवानुवाच —

२७२ भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १॥

भक्तियोगस्सपरिकर उक्तः। इदानीं भक्त्युत्पत्तये तद्विवृद्धये च भगवतो निरङ्कुशैश्वर्यादिकल्याणगुणानन्त्यं कृत्स्नस्य जगतस्तच्छरीरतया तदात्मकत्वेन तत्प्रवर्त्यत्वं च प्रपञ्च्यते दशमाध्याये। अर्जुनस्य वक्ष्यमाणार्थश्रवणयोग्यत्वं तस्यार्थस्य परमहितसाधनत्वादिकं च वदन् सोपच्छन्दनं सावधानयति - महाबाहो! - बाहुशालिन्, प्रीयमाणाय मद्वचनं श्रुत्वा सन्तोषं प्राप्नुवते, बाहुबलात् यथा ते बाह्यशत्रुविजयः, तथा मद्विषय-

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ विलम्बि - मेष [सं ८

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

APRIL, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription  **Rs. Two only.**
Do. With Sastraic Supplement  Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्देयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादित एव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः।
(संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 उद्भ्रान्तदशाननम्।
2 रामराज्यम्।
3 मुकुन्दमाला।
4 सुमनाशाण्डिलीसंवादः।
5 राज्यविपर्ययः।
6 विमर्शगोष्ठी।
7 प्रकृतिभेदः।
8 पुस्तकपरामर्शः।

ततः प्रविशन्ति कैलासनाथसन्निभौ ध्यानेन परमेश्वरं साक्षात्कुर्वन्तः पुष्पदन्तोपमन्युमार्कण्डेयदुर्वासश्चण्डिकेशप्रभृतयः शिवपार्षदाः।

पुष्पदन्तः—

प्रभो पादाङ्गुष्ठ द्रढयति निवासाचलमधो
निरुद्धः पापात्मा दशमुखमहाखुः क्षममिदम्।
परं गौरीनाथ त्रिनयन महेश क्षितिरियं
निमग्ना शेषाहे रवरुजति कण्ठं कुरु दयाम्॥ ११६॥

उपमन्युः— भगवन्, भवानीपते,

निविष्टः कैलासः प्रतिहतभुजाविंशतिरसौ
दशास्यो दीनास्यः शरणमिति सास्रः प्रलपति।
धनाध्यक्षा यक्षा निजनगरभाजः प्रमुदिताः
किमङ्गुष्ठस्यैवं चिरविनमनक्लेशमयसे॥ ११७॥

मार्कण्डेयः— स्वामिन्नन्तकान्तक,

नता यस्मै देवा मधुरिपुमहेन्द्रप्रभृतयो
यमुद्राष्ट्याशास्ते श्रुतिरपि नृणां मुक्तिपदवीम्।
व्युदास्यन् मह्यं यो यममभयदः सर्वजगतां
कुतः कस्मै सोऽयं नमयति शिरस्तेऽपि चरणः॥ ११८॥

दुर्वासाः— अहो नु खलु भोः, कैलासपते,

कचित्ते पादाब्जं शमनदमनायोद्धतमभू-
न्मुहुर्जानीमोऽदस्त्वयि नटति निर्धूतमुपरि।
न लेभे भूदारः स च मृगयमाणः क्वचिदिदं
धृतं तत्पश्यामो दशमुखमदेभाङ्कुशतया॥ ११९॥

चण्डीशः—

जगद्भर्तुर्भिन्नं रिपुरिति मृषा जन्तुमबुधं
द्विषन्तं शिक्षित्वा स्वहितममुमीशो गमयति।
तथा चासौ नम्रः प्रणतिमुपदेष्टुं करुणया
पटिष्ठो ह्यङ्गुष्ठः कुटिलमतिशिक्षावनविधेः॥ १२०॥

इतरे—

एवं द्रुतमना गायन् सापराधोऽपि शङ्करम्।
अङ्गुष्ठयन्त्रणान्मुक्तिं लभतां राक्षसेश्वरः ॥ १२१ ॥

आकाशे

'अयि भोः पार्षदपुरोगाः, अद्य विरतव्यापारो भवत्यङ्गुष्ठः। स च सुकेशवंश्यः प्रणयार्हो मम यथावदक्षतवर्ष्मा निघृष्ट इव मणिरधिकोज्ज्वलो भुजबलेन मयाऽनुगृहीतो निवर्तिष्यते।'

सर्वे— सर्वेश्वरस्य स्थाने खलु प्राणिसामान्ये वात्सल्यम्।

( इति निष्क्रान्ताः )

नारदः— (आविर्भूय) यथोत्प्रेक्षितमापतितम्। न केवलं मोचयिष्यते, अनुग्रहीष्यतेऽपि नाम। भवतु मघवन्तं बोधयामि क्षिप्रं प्रतीतः स खलु मुग्धो निश्शङ्कमास्ते।

( इति निष्क्रान्तः )

शुद्धविष्कम्भः।

ततः प्रविशन्ति साङ्कुतहर्षाः लङ्केश्वरप्रभृतयो राक्षसाः।

सुमालिप्रभृतयः—

जय पशुपते जीयासुस्ते शिवाङ्घ्रिनिषेविण-
स्त्रिपुरविजयिन् स्फायन्तां ते चरित्रविभूतयः।
भव मृड महादेवेशान प्रभो हर धूर्जटे
प्रथय करुणां प्राणिष्वागस्करेषु वृषध्वज ॥ १२२ ॥

राक्षसमन्त्रिणः —

जय विजयीभव लङ्केश्वरपौलस्त्यान्ववायविधो।
विधुशेखरशिखरिशिरःकम्पश्लाघासमेतशौर्यनिधे ॥ १२३ ॥

दशाननः—

भुजाटव्यामस्यां शिखरिमथितायां पशुपते
दया ते जीवातुस्सकृदमृतवृष्टिः परिणता।

यथा मन्ये त्युत्त्यत्तिरमपहृतास्थि क्षरदसृक्-
प्रवाहं तन्निष्पीडनमपि मृदूद्वर्तनमिव ॥ १२४ ॥

समरजयिनां संख्ये गात्रेष्वनीषदिषुव्रण-
प्रसृतरुधिरालिप्तिः सौभाग्यचन्दनचर्चिका ।
परमिह स च क्लेशः स्वप्नावभासवदत्यगा-
द्गिरिविचलने शौर्यं शिष्टं तवापि विभो कृपा ॥ १२५ ॥

मौर्ख्यादेवेदृशमकरवं देव सेवामिवैतं
मन्तुं मन्तुं तथ समुचितं वत्सलत्वात्प्रपन्ने ।
नैतत्पीठीविघटनमरेरस्तु डोलोत्सवस्ते
भक्त्याऽऽरब्धः किल गिरिजया दीव्यतो मत्कराग्रैः ॥ १२६ ॥

मन्नाथ नित्यमिदमस्तु तव स्तुतीना-
मध्येतृ वक्त्रदशकं दशकन्धरस्य ।
स्याल्लक्ष्म लोकविदितं भवदङ्घ्रिपीठ-
साधैक्षणावधिसमुद्वहनं च दोष्णाम् ॥ १२७ ॥

सन्त्यद्रिशृङ्गसमतुङ्गदशा दशैते
मन्मस्तका मणिकिरीटरुचा मनोज्ञाः ।
प्रालेयकूटमपहाय सहाम्बयैव
क्षिप्रं प्रभो त्वमभिरोचय वासमेषु ॥ १२८ ॥

अर्धेन्दुनाऽङ्कितशिखामणिरभ्रधुन्या
या स्रग्विणी फणिगणेन च भूषणाढ्या ।
अक्ष्णोपलक्ष्यतिलका भसिताङ्गरागा
मूर्तिर्मुदे मम पुरो द्रुतमाविरस्तु ॥ १२९ ॥

कैलासशिखरे सनन्दिकेश्वरस्य परमेश्वरस्य आविर्भावः ।

सर्वे – (साश्चर्यहर्षाः) जय जय महादेव ।

(इति प्रणमन्ति)

दशाननः—

नमस्ते रुद्रायाश्रितविहितभद्राय च नमो
नमस्ते शर्वाय क्षपितरिपुगर्वाय च नमः।
नमस्ते सोमाय ज्वलनहुतकामाय च नमो
नमस्ते भर्गाय प्रणतसुरवर्गाय च नमः॥ १२०॥

कपाले खं वह्निं दृशि सुरतटिन्यां च सलिलं
भुवं भस्मन्यङ्गेष्वहिषु पवनं चन्द्रमलके।
निजालोके भानुं निजमहसि कल्पक्रतुकृतं
त्वमष्टौ मूर्तीर्मे शिवविवृणुषे स्वात्मनि पुरः॥ १२१॥

यदेवाप्तश्रुत्या तदनु यदधीतेन बहुना
यदन्तः संरुद्धे मनसि सकृदारादधिगतम्।
ज्वलत्फालं नीलद्युतिगळमरालेन्दुमुकुटं
शिरोत्तंसं भ्रश्यफणि मम पुरः प्रेङ्खति महः॥ १२२॥

गिरिशमजकपालग्राहिणं व्यालचर्मा-
म्बरपरिहितमेणं पाणिना संदधानम्।
प्रतिभयनिजकण्ठक्ष्वेडमङ्गारनेत्रं
वृषपतिकृतझम्पं पञ्चवक्त्रं नमामि॥ १२३॥

परमेश्वरः—

प्रीतोऽस्मि तव शौण्डीर्याद्भक्त्या च दशकन्धर।
शैलाक्रान्तेन यन्मुक्तस्त्वया रावः सुदारुणः॥ १२४॥

तस्मात्त्वं रावणो नाम्ना लोके ख्यातो भविष्यसि।
गच्छ पौलस्त्य विस्रब्धं पथा येन त्वमिच्छसि॥ १२५।

रावणः—

प्रीतो यदि महादेव देहि मे शस्त्रमुत्तमम्।
येन स्यां सर्वविजयी त्वत्प्रसादस्य लक्ष्मणा॥ १२६॥

परमेश्वरः—

अयं खड्गो महादीप्तश्चन्द्रहास इति श्रुतः।
पूजयैतमवज्ञातो ह्यसौ मां पुनरेष्यति॥ १२७॥

(इति प्रतिपादयति)

रावण:— (गृहीत्वा)

अन्यच्च भगवन् यक्षरक्षःसमरनिर्जितम् ।
भवत्प्रभावादिष्टध्वं वाह्यं स्यान्मम पुष्पकम् ॥ १३८ ॥

परमेश्वर:— भवतु ।

आकाशे

मा भूत् ।

सर्वे— ( विस्मयन्ते )

नन्दी— हा कः प्रतिषेधति महेश्वरम् ।

परमेश्वर:— (सस्मितं) विजये त्वमत्र व्यापृता ननु ? मुञ्चतद्विमानम् ।

आकाशे

भगवन्, शरवणगतां देवीं स्मृत्वा राक्षसाभिभवशङ्कया कैलासपथे निरुद्धं मया पुष्पकम् ।

नन्दी— एवं न्वेतत् ?

परमेश्वर:—सेविता देवी तुभ्यं प्रतुष्यति । त्वं च मच्छापान्मोचयिष्यसे यदा त्वद्दयिताय मत्तः उपश्रुताः कथाः वर्णयिष्यसि । मुञ्चेदानीं पुष्पकम् ।

अकाशे

अनुगृहीतास्मि । एषा विमोचितवती विमानम् ।

परमेश्वर:— रावण, किं ते भूयः प्रियमुपहरामि ।

रावण:— किमन्यन्मे प्रियमस्ति ।

यत्कैलासमतोलयं यदरुदं सर्वा दिशो नादयन्
यद्भग्नैरपि च व्यथीदसगतिः शौर्याकरैर्बाहुभिः ।
सर्वं नाथ ममास्त सार्थकमिदं यस्मात्प्रसन्नो भवान्
दुर्वृत्तेऽपि मयि प्रकाश्य करुणामव्याजसान्द्रोदयाम् ॥ १३९ ॥

तवास्मि भगवन् भक्तो लोकानामस्मि रावणः ।
सचन्द्रहासः शत्रूणां राजा पुष्पकवाहनः ॥ १४० ॥

तथापीदमस्तु भरतवाक्यम् ।

धर्मव्याजमपोह्य शम्भुशरणाः श्रद्धाविनीत्यन्विताः
श्रेयोवर्त्मनि सङ्गता बहुविधं प्रेयोऽर्जयन्तु प्रजाः ।
अप्युग्रैरभियोगडम्बरभरैः प्रेयांसि ये प्रेप्सवो
व्याघातं समवाप्य ते शरणयन्त्वार्ताः शरण्यं शिवम् ॥ १४१ ॥

इति निष्क्रान्ताः सर्वे ।

सप्तमोऽङ्कः ।

---

इति श्रीमद्भरद्वाजकुलतिलक श्रीमदप्पय्यदीक्षितेन्द्रवंशमुक्ताफलानां
महामहोपाध्याय - राजुशास्त्र्याख्याविख्यात - श्रीत्यागराज-
मखिराजानां प्रपौत्रेण, महामहोपाध्यायशास्त्ररत्नाकरादि-
विरुदाञ्चित श्री यज्ञस्वामिशास्त्रिवर्याणामात्मजेन

श्रीमहालिङ्गकविना

विरचितमिदम्

उद्भ्रान्तदशाननाख्यं नाटकं सम्पूर्णम् ।

श्री साम्बपरमेश्वरप्रीतिरस्तु ।

मङ्गलानि भवन्तु ।

---

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २१] कलि ५०५८ विलम्बि - मेष [सं ८

## रामराज्यम् ॥

रामराज्यमिति बहवो भाषन्ते । असकृद्भाषन्ते । परन्तु तदीदृशमिति किं यः कोऽपि जानातीति संशयोऽस्माकं चिराद्वर्तते । वाल्मीकिमहर्षिस्तावद् विस्तद्वर्णयति । तत्रादौ संक्षेपरामायणस्यान्ते —

नन्दिग्रामे जटां हित्वा भ्रातृभिस्सहितोऽनघः ।
रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ८९ ॥

प्रहृष्टो मुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः ।
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ९० ॥

न पुत्रमरणं किञ्चिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥ ९१ ॥

न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः ।
न वातजं भयं किञ्चिन्नापि ज्वरकृतं तथा ॥ ९२ ॥

न चापि क्षुद्भयं तत्र न तस्करभयं तथा ।
नगराणि च सर्वाणि धनधान्ययुतानि च ॥ ९३ ॥

नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ९४ ॥

गवां कोट्ययुतं दत्त्वा ब्रह्मलोकं प्रयास्यति।

इति। अथोपरि पट्टाभिषेकसर्गे—

राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम्।
ईजे बहुविधैर्यज्ञैः ससुहृज्ज्ञातिबान्धवः॥ ९२॥

न पर्यदेवन्विधवा न च व्यालकृतं भयम्।
न व्याधिजं भयं वापि रामे राज्यं प्रशासति॥ ९३॥

निर्दस्युरभवल्लोको नानर्थः कश्चिदस्पृशत्।
न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते॥ ९४॥

सर्वं मुदितमेवासीत् सर्वो धर्मपरोऽभवत्।
राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परम्॥ ९५॥

आसन् वर्षसहस्राणि तथा पुत्रसहस्रिणः।
निरामया विशोकाश्च रामे राज्यं प्रशासति॥ ९६॥

रामो रामो राम इति प्रजानामभवन् कथाः।
रामभूतं जगदभूद्रामे राज्यं प्रशासति॥ ९७॥

नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः।
कालेवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः॥ ९८॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः।
स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः॥ ९९॥

आसन् प्रजा धर्मरता रामे शासति नानृताः।
सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः॥ १००॥

इति। नेमे केवलं प्रशंसाश्लोकाः। धर्मेण परिपाल्यमानस्य राज्यस्य तात्त्विकानि इमानि लक्षणानि। अधर्ममभिभूय यत्र धर्मो विजृम्भते तत्र राज्ये इमानि फलानि सम्पन्नानि भवन्ति। अत्र पूर्णं विश्वासमकुर्वन् अस्मदीयाः प्राञ्चः सर्वे जनाः। धर्मस्य एषां फलानां च शास्त्रबोधितं कार्यकारणभावं

अन्वयव्यतिरेकाभ्यां स्वानुभवगोचराभ्यां निश्चित्य तत्र दृढप्रत्ययाः श्रद्धालवश्चाभवन्। इदमद्य सर्वैः अत्यन्तं विस्मृतम्। तेन धर्मो विनष्टः। अधर्मः अतीव प्रवृद्धः। तस्येदं फलं यद् दिने दिने अनर्था बहुलीभवन्ति। सर्वाणि भयानि उत्पन्नानि। आस्तिका विवेकिनः एषां श्लोकानां तात्त्विकं भावं पुनःपुनर्मननेन सम्यगवधारयितुं, अवधारितं परान् ग्राहयितुं, अनेन प्रकारेण पुनर्धर्मसार्गं प्रतिष्ठापयितुं चार्हन्ति। अन्यथा 'श्वः श्वः पापीयदिवसा' पृथिवी भविष्यति।

"लोकाः समस्ताः सुखिनो भवन्तु"

---

# मुकुन्दमाला ॥

——:०:——

आम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं
मेदश्छेदफलानि पूर्तविधयः सर्वे हुतं भस्मनि।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद-
द्वन्द्वाम्भोरुहसंस्मृतिं विजयते देवः स नारायणः ॥ २५ ॥

जपकाले जप्यमानमन्त्रप्रतिपाद्यो भगवान् स्मर्तव्य इत्युक्तम्। तत्प्रसङ्गादिदानीं शास्त्रविहिततत्तत्कर्मानुष्ठानकाले सर्वदा स स्मर्तव्यः, न तु तत्प्रतिपादकमन्त्रजपकाल एव। अन्यथा अनुष्ठीयमानं कर्म सर्वं निष्फलं स्यादित्याह। प्रत्यहं द्विजानां कर्तव्यतया विहितानि बहूनि कर्माणि। तेषु वेदाभ्यसनमेकम्। तद् बह्वपि क्रियमाणं अरण्यरुदितमेव। यदि आर्तः कश्चित् ग्रामे पत्तने वा रोदनं कुर्यात्, तर्हि अनुकम्पावन्तः केचन जनाः तच्छ्रुत्वा तदार्तिपरिहारे यतेरन्। अरण्ये तु श्रोतुर्विरहात् बलवदपि चिरकृतमपि रोदनं न फलाय कल्पेत। तथैव भगवच्चरणारविन्दस्मरणं विना कृतं वेदाभ्यसनम्। वेदव्रतानि। वेदविहितानि उपवासादीनि। उपवासादिनियमपूर्वकमनुष्ठेयानि कर्माणि वा। तानि भगवत्स्मरणं विना अन्वहं अनुष्ठीयमानानि मेदश्छेदफलानि। शरीरपुष्टिहेतुः धातुविशेषः मेद इत्युच्यते। तस्य छेदः क्षयः फलं येषां तानि। केवलः शरीरकार्श्यमात्रफलानि। शास्त्रसिद्धं आमुष्मिकं किमपि फलं नास्तीत्यर्थः।

पूर्तविधयः । देवालयतटाकादिनिर्माणं पूर्तशब्दाभिधेयम् । तस्य विधयः विधानानि करणानि सर्वाणि भगवत्स्मरणं विना भस्मनि हुतं भस्माहुतिवन्निष्फलानि । ज्वलति अग्नौ क्रियमाणो हि होमः सफलो भवति । न तु भस्मनि क्रियमाणः ।

तीर्थानामवगाहनानि । गङ्गाप्रभृतिपुण्यतीर्थस्नानानि च गजस्नानम् । तद्वन्निष्फलानि भगवत्स्मरणं विना क्रियमाणानि । स्नातो हि गजः सद्य एव स्वकरेण धूलिपटलमादाय प्रक्षिप्य स्वात्मानं मलीमसं करोति । न तु स्नानजनितं नैर्मल्यं तस्य भवति । तथा भगवत्स्मरणं विना तीर्थस्नानं कुर्वतः पुरुषस्य शुद्धिर्न भवतीति ।

यस्य देवस्य नारायणस्य पदद्वन्द्वाम्भोरुहविषयसमीचीनस्मरणविरहे आम्नायाभ्यसनादीनि निष्फलानि स देवो नारायणो विजयते देवेषु उत्तमो विराजते । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इत्युक्तप्रभावातिशयविशिष्टतया स्मरणं समीचीनस्मरणम् । नारायणः सर्वान्तरात्मा । तेन सर्वं कर्म तस्यैव आराधनम् ।

अरण्यरुदितं, भस्मनि हुतं, गजस्नानं, इति त्रीणीमानि स्वप्रधानानि नामानि । मुखं चन्द्र इत्यत्र चन्द्रपदवत् । तेन एकवचनम् । भेदश्छेदफलानि, इति तु विशेषणम् । मुखं सुन्दरमितिवत् । तेन बहुवचनम् ।

---

# सुमनाशाण्डिलीसंलापः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

:o:

अयं श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि कस्मिंश्चिदध्याये निबध्यते ।

युधिष्ठिरः— 'सर्वधर्मविदां वर, पितामह, अहं स्त्रीणां समुदाचारं त्वत्तः श्रोतुमिच्छामि, तं मे ब्रूहि ।' इत्युवाच ।

भीष्म एवं वदति स्म —'देवलोके कैकेयी सुमना नाम सर्वज्ञां सर्वतत्त्वज्ञां मनस्विनीं शाण्डिलीं, 'कल्याणि, त्वं केन वृत्तेन केन समाचरणेन वा सर्वपापानि विधूय सुरलोकमागच्छः । त्वं स्वतेजसा हुताशनशिखेव ज्वलन्ती प्रभया ताराधिपस्य सुतेव भासमाना दिवमायाः । अरजांसि

वस्त्राणि धारयन्ती गतक्लमा विमानस्था सहस्रगुणमोजसा शुभा भासि त्वमल्पेन तपसा दानेन नियमेन वेदं विष्टपं नाविन्दः। त्वं मे तत्त्वं वद।' इति पर्यपृच्छत्।

सुमनया पृष्टा शाण्डिली चारुहासिनी सती सुमनां प्रति मधुरं साधु चेदं वाक्यमकथयत्— 'अहं काषायवसना वल्कलधारिणी मुण्डा जटिला वा भूत्वा देवत्वं नाभजम्। अहमप्रमत्ता सती परुषाण्यहितानि च वाक्यानि भर्तारं प्रति कदाचिदपि नागदम्। देवतानां पितॄणां ब्राह्मणानां च पूजने प्रमादेन रहिता कार्येष्वजस्रमासक्ता श्वश्रूश्वशुराधीना चाभवम्। अहं पैशुन्ये न प्रावर्ते। तच्चिन्तापि मम मनस्यपि न स्यात्। अवस्थानानर्हे स्थले नातिष्ठम्। चिरं नाभाषे। असत्किञ्चिद्धसितं वा पत्युरहितं कर्म वा रहस्यमरहस्यं वा सर्वथा नाकलयम्। कार्यार्थे निर्गतं गृहमागतञ्च प्रियमासने समुपवेश्यानाकुलमना अपूजयम्। धवो यदन्नं नाभिजानीयात् यद्भोज्यं भक्ष्यं लेह्यं वा नाभिनन्देत्तत्सर्वमहमवर्जयम्। कुटुम्बार्थे पत्या समानीतं यत्किञ्चिद्वस्तूपादेयमेव वर्तेत, तत्सर्वमहं यथोचितमकारयमकरवञ्च। अग्निसंरक्षणपरा गेहं शोधयन्ती कुमाराञ्जितं परिपालयन्ती कुमारीस्सुचरितं बोधयन्ती स्वप्रियाणि हित्वाऽपि गर्भसंरक्षणे रता चासम्। बालानां शापं कोपं प्रतापनं च नित्यमत्यजम्। भवने धान्यान्यन्नञ्च विक्षिप्तानि न स्युः। निकेतने यवसोदकोपेताभ्यो गोभ्यस्स्वदेहरक्तवदस्पृहयम्। अहमुत्थाय शुद्धा सती द्विजातिभ्यो भिक्षामददाम्। मम पतिः केनचित्कार्येण प्रवासं यदासादयति तदा बहुभिर्मङ्गलाचारैर्युता मङ्गलसूत्रमात्रं बिभ्रती च व्यधेय। भर्तरि निष्क्रान्तेऽञ्जनं, गोरोचनां, स्नानं, माल्यं, गन्धं, प्रसाधनं च न काङ्क्षेयम्। अहं सुखसुप्तं भर्तारमतिमात्रकुतूहले सत्यपि तत्तत्कार्येषु कदापि नोत्थापयेयम्। तेन मे मानसं तुष्यति। आतुरं प्रियं रक्षेयम्। कुटुम्बार्थेऽपि पतिं सर्वदा नायासयेयम्। गोपनीयमनिशं न प्रकाशयेयम्। निवेशं सुसंमृज्याञ्च। इमं धर्मपथमैकाग्र्येण पालयन्ती नारी योषितामरुन्धतीव स्वर्गे महीयते।'

तपस्विनी महाभागा देवी सा शाण्डिली सुमनायै पतिधर्ममेतदाख्याय तदानीमन्तरधत्त।

पाण्डव, य इदमाख्यानं पर्वणि पर्वणि पठेत् स नाकमेत्य नन्दनवने सुखी वसेत्।

# राज्यविपर्ययः ॥*

## (9)

### मन्त्रिसभा (अनुवृत्ता)

---

अमात्यः— आर्य, अकम्पन, कच्चित् भवदर्थे सर्वं साधु संविहितं नियुक्तैः ? कच्चित् सुखं शयितं रात्रौ ?

अकम्पनः— आर्य, अमात्य, सर्वं साधु संविहितं भवदीयैः। रात्रौ सुखं सुप्ताश्च वयम् । अत्रभवान् यत्र आदेष्टा तत्र कस्य का अपेक्षा अपूरिता भवेत् ? किं वस्तु अलब्धमपेक्षणीयं स्यात् ?

अमात्यः— सन्तुष्टोऽस्मि भवतोऽनेन प्रशंसावचनेन। किन्तु अतिथीनां यथातृप्ति आराधनं अस्माकं धर्मः । तत्र न किञ्चित् प्रशंसापदमस्ति।

अकम्पनः— युक्तमिदं यत् धीमतामग्रणीः निपुणोऽमात्य एवं भाषते। महद्देषां एतद्देशवासिनां जनानां भाग्यं, बहु च सुकृतं, येषां योगक्षेमनिर्वाहभरं अत्रभवान् बिभर्ति। (जना अनुमोदमानाः प्रहसन्ति)

अमात्यः— (स्वगतम्) कथमयमकाण्डे मां स्तोतुमुपक्रमते । नूनं कुटिलं किञ्चिदस्य हृदये स्थितम्। (प्रकाशम्) महाराजो बिभर्ति एषां योगक्षेमनिर्वाहभरम् । स हि तेजसां निधिः सर्वस्य प्रभवति । तस्य प्रेष्याः केवलं वयम् । स्वयं किमपि कर्तुमक्षमाः । (जनाः सबहुमानमन्योन्यं पश्यन्ति ।)

अकम्पनः— विनयानुवृत्त्या काममेवं भवान् भाषितुमर्हति । तत्त्वं पुनरहमवोचम्।

अमात्यः— आर्य, अकम्पन, अस्मन्महाराजो भवता न दृष्टपूर्वः । तस्य गुणा अविदिताः। तथा सति तत्त्वदर्शित्वमात्मनि कथं भवान् प्रत्येतुमर्हति ?

अकम्पनः— अमात्यवर्य, यदत्रभवन्तं दृष्टवन्तः स्मः, सम्भाषणं च कृतवन्तः स्मः तदस्माकं पर्याप्तं वस्तुस्थितेर्यथावदवगमाय । महाराजस्य

---

* पूर्वं (कुम्भ) सञ्चिकायां ४६ पुटे अन्तिमपङ्क्तौ 'पितुर्या वृत्तिः सा परकीयेति' इत्यत्र ''पितुर्या वृत्तिः सा पुत्रस्य स्वकीया भवति। अन्यस्य या वृत्तिः सा परकीयेति'' इति पठनीयम्।

अन्यस्य वा दर्शनं सर्वथाऽनपेक्षितम्। अत्रभवन्तमपेक्ष्य बुद्ध्या सामर्थ्येन वाऽतिशयितः लोके यः कोऽपि नास्तीति निश्चितमेतत्।

अमात्यः— (स्वगतम्) मामेव महाराजाद्भेत्तुमयमुद्युङ्क्त इति भाति। भवतु। (प्रकाशम्) आर्य, किमप्रस्तुतेन बहुना भाषितेन। यद्भवत उद्दिष्टं कार्यं तदधिकृत्य विवक्षितं वक्तु भवान्।

अकम्पनः— प्रस्तुतानुबन्ध्येवाहं वदन्नस्मि।

अमात्यः— मां भवान् प्रशंसति। किन्नाम तदेव प्रस्तुतं कार्यम्।

अकम्पनः— न। लोकोत्तरप्रज्ञासामर्थ्यातिशयशालिनि अत्रभवति राज्य-भारं सर्वं अतिनिपुणं वहति सति किमन्येनेति विज्ञापनं मे चिकीर्षितम्।

अमात्यः— अन्येन केन?

अकम्पनः— किं स्फुटनिर्देशेन। अमात्यवर्यः सुवेदैव।

अमात्यः— महाराजेन?

अकम्पनः— (स्मितं करोति)

अमात्यः— (उद्भूतं क्रोधं नियन्त्रयन्) प्रियाः पौरा महाजनाः, महाराज-द्रोहे अयमवतीर्णः। एवंविधापराधकारिणां विषये राजधर्मानुसारेण यत् कर्तव्यं, तत्करणं इमं प्रति मम सम्प्रति प्राप्तम्। परन्तु भवता-मभिप्रायमविज्ञाय किमपि कर्तुं अहं नेच्छामीति भवन्तो जानन्त्येव। तस्मादस्मिन् विषये यद्भवन्तो मन्यन्ते तदावेदयन्तु भवन्तः।

अकम्पनः— प्रायः सर्वत्र साम्प्रतं प्रजाराज्यं प्रवर्तते। यत्र क्वापि सन्नपि महाराजः राज्यकार्याणि सर्वाणि सचिवसात् कृत्वा असत्कल्पो वर्तते। तदिहापि युक्तं स्थापयितुमिति प्रबोधने मम प्रवृत्तिः। नाहं अत्रत्यं महाराजं द्वेष्मि। नापि तस्मै कमपि द्रोहमाचरितुमिच्छामि।

अमात्यः— राज्यापहारसंरम्भः किं न द्रोहः?

अकम्पनः— नान्तरीयकं तत्। प्रजाराज्यस्थापनं तु अस्माकमुद्दिष्टम्।

गुरुदत्तः— अस्मद्धितं यथा अमात्यप्रभुर्वेद तथा न वयमपि। अतो यदत्र-भवान् चिकीर्षति तत्र कदाऽपि न वयं विप्रतिपद्यामहे। अथापि इद-मिदानीं विज्ञापयितुमिच्छामः। प्रजाराज्यं राजराज्यादार्योऽकम्पनः श्रेयो मन्यते। यथाऽयं प्रत्ययं लभेत तथाऽमात्यप्रभुणा राजराज्य-प्रजाराज्ययोर्गुणदोषविमर्शः कार्यः। वयमपि तेन व्युत्पन्ना भविष्यामः। अनन्तरसम्मेलने तद्भवतु। अद्य कालोऽतिक्रान्तः।

---

# विमर्शगोष्ठी ॥

(12)

केशवः— भगवता अस्मदनुग्रहार्थं कृतेन अद्भुतेन ललितेन च उपदेशेन वयं सर्वे नष्टमोहाः, जातसमग्रप्रबोधाः। चिरन्तनानां अस्मदीयानां शास्त्राणां प्रयोजनं प्रति यः संशयः चिरमस्मान् क्लेशयन्नासीत् सः अपुनरुदयं ध्वस्तः। अत्र वयं भगवति अत्यन्तं कृतज्ञाः। इममनुग्रहं कदाचिदपि न विस्मरिष्यामः। अपरमिदानीं भगवतो मुखात् श्रोतव्यमस्ति।

यथाकथञ्चित् संस्कृताध्ययने प्रवृत्ता वयं तस्मिन् तस्मिन् शास्त्रे एकदेशमधीतवन्तः स्मः। न तस्य जीवनमार्गे उपयोगोऽस्ति। तेन लोके न कश्चिदस्मान् आद्रियते। न वयमन्यैः सङ्गन्तुं क्षमामहे। इदं सङ्कटं यावज्जीवमनुवर्तिष्यत इति भाति। किमस्य कश्चन परिहारमार्गो वर्तत इति।

नारायणः— अधीतया विद्यया जीविका न लभ्यते। तेन तां विस्मृत्य पौरोहित्यं वा पाचकत्वं वा परिचारकत्वं वा भारवाहित्वं वा, किमपि वृत्त्यन्तरमवलम्बनीयमित्यस्यां स्थितौ वयं वर्तामहे। अत्र भगवान् किं मन्यते, किं कर्तुमस्मान् आदिशतीति ज्ञातुं नः परमं कुतूहलम्।

महान्— सौम्याः, साधु पृष्टं भवद्भिः। अत्र यन्मे भाति तद्ब्रवीमि, शृणुत। तर्को वा व्याकरणं वा अन्यद्वा किमपि शास्त्रं सम्यगधीतं बुद्धेः कञ्चन संस्कारं जनयति, यः व्युत्पत्तिरित्युच्यते। तेन सम्पन्नः विषयविशेषमादाय सम्यग् विमृष्टुं उपन्यसितुं च शक्नोति। ततःपरं सर्वैः वेदान्तशास्त्रमध्येतव्यम्। इदं विना पाण्डित्यमसम्पूर्णम्; तत्त्वज्ञानं दुर्लभम्। तदनन्तरं धर्मशास्त्रपरिचयः कार्यः। ऐहिकस्य आमुष्मिकस्य च सर्वस्य सुखस्य साधनं धर्मः। 'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।' 'धर्मसंस्थापनार्थाय सम्भवामि युगे युगे' इत्यादिषु प्रसिद्धं धर्मप्राधान्यं प्रति न विस्तरेण किमप्यत्र वक्तव्यम्। स धर्म इदानीं विनश्यदवस्थो वर्तते। तेन च लोकस्य दुरवस्था महती। अतः तस्य तत्त्वं भवद्भिः प्रथमं धर्मशास्त्रपरिचयेन विज्ञातव्यम्। यथाविज्ञातं च अन्येभ्य उपदेष्टव्यम्। जनाः सम्प्रति धर्मं प्रति अत्यन्तं विवेकविधुराः। जनाधिपतयश्च प्रायः विपरीतमतयः धर्मद्रोहपर्यवसाय्येव

सर्वं कार्यं कुर्वन्ति। तेषां समुचितेन मार्गेण प्रतिबोधनकर्तारो न सन्ति। तां धुरं भवन्तो वोढुमर्हन्ति। क्रोधं द्वेषं च विना सर्वसौहार्दं प्रकाश्य इतिहासपुराणोपाख्यानानां नीतिकथानां च उपन्यासपुरस्सरं धर्ममार्गस्य गौरवं, अवश्यानुष्ठेयत्वं सर्वश्रेयस्करत्वं च सर्वजनविदितं भवन्तः कुर्वन्ति चेत् आत्मनः लोकस्य च शोभनं भवेत्। अस्मद्विद्या च सफला सती सर्वैरादृता स्यात्, वर्धेत च। आरम्भे किञ्चित्कालावधि जनानामादरः नूनं मन्द एव भवेत्। क्रमेण तु सर्वश्लाघ्या, सर्वाभिनन्द्या इयं प्रवृत्तिर्भवेत्। अद्यतनं जीवनक्लेशं सहमानाः असहमानाश्च भवन्तः एवं कुर्वन्तु। तथा सति भवन्तोऽपि सफलशास्त्राध्ययनाः लोकसेवाकारिणश्च भविष्यन्ति, जनाश्च बहूपकृताः।

माधवः — प्रागेव बहवः पुराणप्रवचनं कुर्वन्तो वर्तन्ते।

महान् — सत्यं वर्तन्ते। तावत्साधु। परन्तु कालक्षेपप्रधानं तद्भवति। भगवत्कथाश्रवणप्रधानं च। अनुष्ठानपर्यवसायि धर्मव्युत्पादनं तु तन्नोद्देश्यं न भवति। तदुद्देशेन महान् आरम्भस्तु सम्प्रति अवश्यापेक्षितः। प्रदेशे प्रदेशे धर्मपरिषत् स्थापनीया। यथा चौर्यं क्वापि न भवति, न बधः, न असत्यरतिः, नाप्यन्ये अधर्माः, तथा तीव्रः प्रयत्नः कार्यः। अस्योद्देश्यस्य सिद्धये अपेक्षिताः सर्वाः प्रवृत्तयः कार्याः। भगवान् एतदुचितां बुद्धिं शक्तिं च भवद्भ्यः प्रयच्छतु। धर्मो जयतु। योगक्षेमो जगतः कल्पताम्।

---

# प्रकृतिभेदः॥

— अरे बाल, शकटं कञ्चिदानय। स्थानकं गन्तव्यम्।

— त्वं गच्छ, अथवा अहं गच्छामि। किमिति वृथा बालं क्लेशयसि?

— अरे, ललाटन्तपः सूर्यः। कथं त्वया मया वा गन्तुं शक्यम्?

— किन्तु बालस्य स चन्द्रमा भविष्यति?

— पादरक्षां धृत्वा गमिष्यति। आतपत्रं च।

— तथा कृत्वा आवाभ्यां कुतो न गन्तव्यम्?

— (हसति)

KENDRIYA SANSKRIT VIDYA PEETHA TIRUPATI



# पुस्तकपरामर्शः ॥

**जितन्तेस्तोत्रम्** — श्री पेरियवाच्चान् पिळ्ळै, श्री पुत्तङ्कोट्टकं वाधूल-श्रीनिवासाचार्यस्वामिनः, श्री मधुरान्तकं वीरराघवाचार्याः, इत्येतैः कृतद्राविडव्याख्यानसहितम् । Sri N. V. Vasudevan, 'Paduka Asrama', 33, Kodanda Ramaswami Koil Street, West Mambalam, Madras-17, अतो लभ्यम् । रूप्यद्वयमूल्यकम् ।

अत्र अनुष्टुप्श्लोकमयानि षट् स्तोत्राणि सन्ति । तेषां सर्वेषां 'जितं ते' इत्युपक्रमात् 'जितन्ते' स्तोत्रमित्याख्या भवति । संज्ञायां उच्चारणसौकर्याद्यनुरोधेन बहुधा वर्णविपर्ययेण क्रियमाणत्वात् अत्रापि बहुभिः जितन्तास्तोत्रमित्येव व्यवहारः क्रियते । अहिर्बुध्न्यपाद्मश्लोकं च व्याख्यातार उदाहरन्ति यत्र 'जितन्ताख्यस्तवैः' इति दृश्यते ।

'पेरियवाच्चान् पिळ्ळै' इति द्राविडभाषा प्रसिद्धानां श्रीकृष्णपादसूरीणां, कीर्तिशेषाणां श्रीपुत्तङ्कोट्टकं श्रीनिवासाचार्यस्वामिनां च व्याख्यानं प्रथमस्तोत्रस्य एकस्यैव । अन्येषां सर्वेषां श्री मधुरान्तकं वीरराघवाचार्यैः कृतमेव । श्रीकृष्णपादसूरयः दिव्यप्रबन्धव्याख्यातारः, नवरसश्लोकोत्तररसानुभवस्य च मार्गदर्शिनः । इतरे द्वौ तदनुसारिणः । दिव्यप्रबन्धव्याख्यानेषु यथा, तथैव अस्मिन्नपि व्याख्याने भाववर्णनभङ्गिया गम्भीरा दृश्यते । जितन्तास्तोत्रसम्बन्धिनो बहवो विषया इह कथिताः ।

ललिततरं अत एव सर्वसुग्रहं च श्री श्रीनिवासाचार्यस्वामिपादानां व्याख्यानम् । पूर्वव्याख्याने चतुर्दशश्लोकपर्यन्तमेव दृश्यते । तत्र हेतुं एते स्वामिनः विमृशन्ति (38 पुटे) । अवशिष्टानां च श्लोकानां व्याख्यानं कुर्वन्ति ।

श्रीवीरराघवाचार्याणां व्याख्याने पदार्थकथनं ततःपरं भाववर्णनमिति भागद्वयं प्रतिश्लोकं दृश्यते । शैली ललिता सर्वसुगमा । बहुविषयज्ञापिका स्तोत्रषट्कप्रतिपाद्यसारसङ्ग्राहिका च भूमिकाऽपि काचिदेतैर्लिखिताऽत्र योजिता ।

जितन्ते पुण्डरीकाक्षेति प्रथमश्लोकस्य स्थूलसूक्ष्मपरत्वपदार्थत्रय-प्रतिपादकस्य अहिर्बुध्न्यसंहितायाः त्रिपञ्चाशाध्यायस्यात्र योजनं कृतमभिनन्दनीयम् । भगवदाराधनकालेऽनुसन्धानोपयोगितया भागवतोत्तमैरादृतानां एषां स्तोत्राणां सव्याख्यानं प्रकाशनेन बहूपकृतवान् श्री वासुदेवः नूनं तेषां विशेषानुग्रहपात्रं भवति ।

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 9

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

:o:

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ विळम्बि - वृषभ [सं ९

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

MAY, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

---

Annual Subscription **Rs. Two only.**
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।
२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

---

# विषयः ॥

---

शास्त्रानुबन्धः— श्रीगीतार्थदीपः। २५७—२६४

---

TIRUPATI

२७४ यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढस्स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥

तदेतद्देवाद्यचिन्त्यस्वयाथात्म्यविषयज्ञानं भक्त्युत्पत्तिविरोधिपापविमोचनोपायमाह— माम्, न जायत इत्यजः तम् अजम् - विकारिद्रव्यादचेतनात् तत्संसृष्टाचेतनाच्च विसजातीयम् । संसारिचेतनस्य हि कर्मकृताचित्संसर्गो जन्म । अनादिं - आदिमतोऽजान्मुक्तात्मनो विसजातीयम्, मुक्तात्मनो ह्यजत्वमादिमत्, तस्य हेयसम्बन्धस्य पूर्ववृत्तत्वात्तदर्हताऽस्ति, तदनर्हतया तत्प्रत्यनीकत्वं अनादिमित्यनेनोच्यते. लोकमहेश्वरं च - लोकेश्वराणामपीश्वरं, मर्त्येषु,असम्मूढः - इतरसजातीयतयैकीकृत्य मोहस्सम्मोहः, तद्रहितः असम्मूढः, यः वेत्ति, सः, सर्वपापैः - मद्भक्त्युत्पत्तिविरोधिभिस्सर्वैः पापैः, प्रमुच्यते - प्रकर्षेण मुक्तो भवति ।

மனிதர்களுக்குள் யாவனொருவன் என்னை அசேதனவஸ்துக்களோடும் பத்த முக்த நித்யர்களாகிய ஜீவாத்மாக்களோடும் ஸஜாதீயனாய் எண்ணாமல் ஸகல சேதநாசேதநவிலக்ஷணனாகவெண்ணுகின்றானோ அவன் என்பக்கல் பக்தியுண்டாவதற்கு விரோதிகளான பாபங்களனைத்தாலும் விடுபட்டவனாகின்றான். 3

२७५ बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमश्शमः ।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४ ॥

२७६ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

एवं स्वस्वभावानुसन्धानेन भक्त्युत्पत्तिविरोधिपापनिरसनं तन्निरसनादेवार्थतो भक्त्युत्पत्तिं च प्रतिपाद्य स्वैश्वर्यकल्याणगुणगणप्रपञ्चानुसन्धानेन भक्तिविवृद्धिप्रकारमाह— बुध्यतेऽनयेति बुद्धिः - मनसा निरूपणसामर्थ्यं, ज्ञानं - उक्तसामर्थ्यजन्यो वक्ष्यमाणासम्मोहहेतुभूतश्च चिदचिद्वस्तुविशेषनिश्चयः, असंमोहः - विजातीये सजातीयताबुद्धिस्सम्मोहः

तदभावो सम्मोहः, क्षमा - विकारहेतौ सत्यप्यविकृतमनस्त्वम्, सत्यं - यथादृष्टविषयं भूतहितरूपं वचनम्, मनोवृत्तिप्रकरणात् तदनुगुणा मनोवृत्तिरिह विवक्षिता । दमः - बाह्यकरणानामनर्थेभ्यो विषयेभ्यो नियमनम्, शमः - अन्तःकरणस्य तथा नियमनम्, सुखं - आत्मानुकूलानुभवः, भवः - भवनम्, मनस उद्धर्षोऽत्र विवक्षितः, अभावः - प्रतिकूलानुभवहेतुको मनसोऽवसादः, भयम् - आगामिनो दुःखस्य हेतुदर्शनजं दुःखम् - अभयम् - उक्तभयस्य निवृत्तिः, अहिंसा - परदुःखाहेतुत्वम्, समता - आत्मनि सुहृत्सु विपक्षेषु च समचित्तत्वम्, तुष्टिः - सर्वेष्वात्मसु दृष्टेषु तोषस्वभावत्वम्, तपः - शास्त्रीयो भोगसङ्कोचरूपः कायक्लेशः, दानं - स्वकीयभोग्यानां परस्मै प्रतिपादनम्, यशः, गुणवत्ताप्रथा, अयशः - निर्गुणत्वप्रथा' एतच्चोभयं तदनुगुणमनोवृत्तिद्वयं मन्तव्यम् तत्प्रकरणात्, तपोदाने च तथा, एवमाद्याः पृथग्विधाः - नानाविधाः, भूतानां - प्राणिनां, भावाः - मनोवृत्तयः मत्त एव - मत्सङ्कल्पादेव, मत्त एवेति पञ्चम्यवगतं हेतुत्वं सङ्कल्परूपव्यापारमुखेन । भवन्ति ।

மனதில் நிரூபண ஸாமர்த்தியமும் அதனாலுண்டாகும் சேதநாசேதநவஸ்துக்களைப் பற்றிய தெளிவும் இதனாலுண்டாகும் மோஹநிவ்ருத்தியும் மனதில் விகாரமில்லாமையும், ஸத்யத்தில் மனநிலையும், புறவிந்திரியங்களையும் அகவிந்திரியத்தையும் அடக்குதலும், தனக்கு அநுகூலமும் ப்ரதிகூலமுமான அநுபவங்களாகிற ஸுகதுக்கங்களும் அவ்வநுபவத்தினாலுண்டாகும் அதிஸந்தோஷமும் அதிக சோர்வும், பின் வரப்போகும் துக்கத்தின் காரணத்தைக் கண்டு துக்கமும் அந்த துக்கம் விலகுவதும், எல்லாவாத்மாக்களையும் கண்டு ஸந்தோஷமும் சாஸ்திரமிசைந்து தாம் வாட வாடச் செய்யும் தவமும், தனக்கு போக்ய வஸ்துவைப் பிறருக்குக் கொடுப்பதாகிய தானமும், குணவான் என்று புகழும், குணமில்லாதவன் என்று இகழும், இவை முதலான ப்ராணிகளின் மனநிலைகள் யாவும் என்னுடைய ஸங்கல்பத்தாலேயே உண்டாகின்றன. 4, 5

३७७ महर्षयस्सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६॥

सर्वस्य भूतजातस्य सृष्टिस्थित्योः प्रवर्तयितारश्च मत्सङ्कल्पायत्तप्रवृत्तय इत्याह— इमाः प्रजाः, येषां लोके - सन्ताने, जाताः - उत्पन्नाः, यत्पुत्रपौत्रादिभ्यो जाता इति यावत्। मानसाः - ब्रह्मणो मनस उत्पन्नाः (ते) पूर्वे सप्त महर्षयः - अतीतमन्वन्तरसम्बन्धिनो भृग्वादयस्सप्त महर्षयः, तथा चत्वारः मनवः - ब्रह्मसावर्ण्यः, रुद्रसावर्ण्यः, धर्मसावर्ण्यः, दक्षसावर्ण्यः इति प्रसिद्धाः। मद्भावाः - मम भाव एव भावो येषां ते मद्भावाः, भावः - सङ्कल्पः मत्सङ्कल्पानुवर्तिनः, राज्ञो भाव एव किङ्करस्य भाव इतिवदभिप्रायसाम्यापेक्षयाऽयं व्यपदेशः।

உலகிலுள்ள ப்ரஜா ஸந்தானத்திற்கு மூலபுருஷர்களாய் ப்ரஹ்மாவின் மனஸ்ஸிலிருந்து உண்டானவர்களுமான ப்ருகு முதலிய ஸப்தரிஷிகளும் ப்ரஹ்மஸாவர்ண்யர் முதலிய நான்கு மனுக்களும் என்னுடைய ஸங்கல்பத்தைப் பின்பற்றி நடப்பவர்கள். 6

३७८ एतां विभूतिं योगञ्च मम यो वेत्ति तत्त्वतः।
सोऽविकम्प्येन योगेन युज्यते नात्र संशयः ॥ ७ ॥

मम, एतां - यथोक्तां, विभूतिं - सर्वस्य मदायत्तोत्पत्तिस्थितिप्रवृत्तिरूपं नियमनं, योगं च - युज्यत इति योगः हेयप्रत्यनीककल्याणगुणरूपं योगं च, तत्त्वतः - यथावत्, ईश्वरेऽनीश्वरस्वभावभूतपारतन्त्र्यदुःखाज्ञानाद्यारोपं अनीश्वरे चेश्वराधीनस्वातन्त्र्यादेरन्यनिरसिद्धत्वाद्यारोपं च परित्यज्येति यावत्। यः, वेत्ति सः, अविकम्प्येन - बाधकशतैरप्यविचाल्येन योगेन - भक्तियोगेन, युज्यते - संबध्यते, अत्र - अस्मिन्नर्थे, संशयः न।

யாவனொருவன், முன்கூறிய எனது ஐச்வர்யத்தையும் தோஷக்கலப்பில்லாத கல்யாணகுணஸம்பத்தையும் உண்மையாக அறிகின்றானோ, அவன் அசைக்கவொண்ணாத பக்தியோகத்தைப் பெறுகின்றான். இதில் ஸந்தேஹமில்லை. 7

३७९ अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८ ॥

उक्तार्थस्यानन्तरमुदाहरणप्रदर्शनमुखेन प्रपञ्चनं क्रियते— बुधाः - प्रकृतज्ञानविशेषवन्तो महात्मानः, अहं - परं ब्रह्म वासुदेवाख्यं, सर्वस्य - विचित्रचिदचित्प्रपञ्चस्य, प्रभवः - उत्पत्तिकारणम्, मत्तः - वासुदेवादेव सर्वं प्रवर्तते - प्रवृत्तिमद्भवति इति मत्वा - एवं ज्ञात्वा, भावसमन्विताः - भावः मनोवृत्तिविशेषः तेन समन्विताः संयुक्ताः, मयि स्पृहयालवः इति यावत् । मां - सर्वकल्याणगुणान्वितं, भजन्ते - सेवन्ते ।

நானே ப்ரபஞ்சமனைத்துக்கும் காரணம். அவற்றின் வ்யாபாரமனைத்தும் என்னாலேயே ஏற்படுகின்றன. இதைத்தெளிந்து என்பக்கல் விசேஷ அபிநிவேசத்துடன் ஞானிகள் என்னை த்யானம் செய்கின்றார்கள். 8

३८०　मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९ ॥

भावसमन्वितत्वप्रपञ्चनमेवानन्तरं क्रियते— मयि चित्तं येषां ते मच्चित्ताः मयि निविष्टमनसः, मद्गतप्राणाः - मयि गतः प्राणः, प्राणः जीवितं येषां ते मद्गतजीविताः - मया विनाऽऽत्मधारणमलभमानाः, मां नित्यं, परस्परं - अन्योन्यम्, बोधयन्तः - अवगमयन्तः, कथयन्तश्च - मदीयानि दिव्यानि कर्माणि वर्णयन्तश्च, बोधयन्त इत्यनेनाज्ञातार्थज्ञापनं कथयन्त इत्यनेन च इति वृत्तवर्णनं विवक्षितम् । भक्तिपरिपाकक्रमविशेषसिद्धाकारप्रदर्शनं 'मच्चित्ताः' इत्यादिभिश्चतुर्भिर्विशेषणैः कृतम् । तुष्यन्ति च - वक्तारः परितोषमुपयान्ति च । रमन्ति च - श्रोतारो रतिं प्राप्नुवन्ति च । 'तुष्यन्ति च रमन्ति च' इत्यनयोः 'मच्चित्ताः' इत्याद्युक्तैककर्तृकत्वं कथनश्रवणयोः कालभेदेनैकस्मिन्नेव सम्भवादुपपद्यते ।

என்பக்கல் பக்திசெய்யும் ஞானிகள், முதலில் என் பக்கலிலேயே ஊன்றிய மனதுடன் என்னிடத்திலேயே உயிராய் அவரவர் அநுபவிக்கும் குணங்களை ஒருவருக்கொருவர் தெரிவித்துக்கொண்டும், என்னுடைய திவ்ய சரித்ரங்களைச் சொல்வதும் கேட்பதும் அப்படிச் சொல்பவர்கள் சொல்வதினாலுண்டாகும் ஸந்தோஷத்தையும், கேட்பவர்கள் கேட்பதினாலுண்டாகும் ஆனந்தத்தையும் பெற்றிருப்பார்கள். 9

३८१ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
दददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

'भगवद्गुणविभूतिज्ञानस्य भक्त्युत्पत्तिविवृद्धिहेतुत्वमुक्तम ; तथाविधविवृद्धभक्तेर्भगवत्प्राप्तिपूर्वभाविविशदतम साक्षात्काररूपावस्थाविशेषहेतुत्वं भगवत्प्रसादावान्तरव्यापारकमुच्यते — सततयुक्तानां - मयि सततयोगं प्राप्तिरूपमाशंसमानानां, आशंसायां क्तप्रत्ययः । भजतां - मां भजमानानां, तेषां - ज्ञानिनां, ते - ज्ञानिनः, येन - विपाकदशापन्नभक्तिविशेषेण, मां, उपयान्ति - प्रतिपद्यन्ते, तं, बुद्धियोगं - बुद्ध्या - विपाकदशापन्नया, योगं - संबन्धं, प्रीतिपूर्वकंप्रीतिः - स्नेहः तत्पूर्वकं यथातथा, ददामि - प्रयच्छामि ।

சாச்வதமான என்னுடைய மோக்ஷானுபவத்தை உத்தேசித்து என்னை பஜனம் பண்ணும் அந்த ஞானிகளுக்கு மேன் மேலும் பக்தியின் அபிவ்ருத்தியை ப்ரீதியோடு நான் செய்விக்கிறேன். அவர்கள் அந்தப் பரம பக்தியினால் என்னை அடைகின்றார்கள். 10

३८२ तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

उक्तभक्तियोगोत्पत्तिप्रतिबन्धनिरसनमुच्यते—तेषामेव - उक्तज्ञानिनामेव, अनुकम्पार्थं - अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिहेतुप्रसादविशेषसिद्ध्ये अहं, आत्मभावस्थः - तेषां मनोवृत्तौ विषयतया स्थितस्सन्, भास्वता - परितः प्रकाशमानेन, ऐश्वर्यगुणविशेषादिप्रकारविशेषवैशद्यकरेणेति यावत् ; ज्ञानदीपेन, मद्विषयज्ञानाख्यदीपेन, अज्ञानजं - अज्ञानं - ज्ञानविरोधिकर्म तेन जायमानं, तमः - विषयान्तरप्रावण्यरूपं मोहान्धकारं नाशयामि ।

அந்த ஞானிகளை அனுக்ரஹம் செய்வதற்காக அவர்கள் மனதில் நான் எப்பொழுதும் இருந்துகொண்டு என்னுடைய குண விபூதி முதலியவற்றைத் தெளிவாக்கும் ஞானவிளக்கைக் கொடுத்து அவர்களின் பாபகர்மபலமாய் சிற்றின்பங்களில் வரும் மோஹமாகிய இருளை நாசம் செய்விக்கின்றேன். 11

३८३ अर्जुन उवाच—

परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥ १२॥

३८४ आहुस्त्वामृषयस्सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासस्स्वयं चैव ब्रवीषि मे॥ १३॥

एवं भगवदसाधारणं कल्याणगुणयोगं तदैश्वर्यवितर्तिं च श्रुत्वा तद्विस्तारं श्रोतुकामोऽर्जुन उवाच— 'ब्रह्मविदाप्नोति परम्' इति श्रुतिसिद्धं परं ब्रह्म, भवान्, परं धाम - 'परं ज्योतिरुपसम्पद्य... ' इत्यादिषु प्रतिपन्नं परं ज्योतिः, भवान्, परमं पवित्रं - उत्कृष्टं पावनं, भवान्, देवर्षिः, नारदः, तथा असितः, तत्पिता देवलः व्यासः इत्येते सर्वे, ऋषयः, त्वां - अवतीर्णं त्वामेव, शाश्वतं - नित्यं, दिव्यं - दिवि भवं, परमव्योमनिलयं, पुरुषं - 'परात्परं पुरिशयं पुरुषमीक्षते' इत्यादिप्रतिपादितम्. 'शाश्वतं दिव्यं पुरुषम्' इति व्युत्क्रमोपादानेन दिवि वर्तमानस्य पुरुषस्य पुरुषसूक्तोदितामृतत्वत्रिपाद्विभूतिविशिष्टवेषेण शाश्वतत्वं विवक्षितमिति मन्तव्यम्। आदिश्चासौ देवश्चेत्यादिदेवः तम् जगत्कारणभूतं क्रीडारूपजगद्व्यापारञ्च, अजम् - कर्मकृतजन्मादिरहितम्, विभुं - नियन्तारं च, आहुः, न केवलं श्रुतयो महर्षयश्च स्वयं चैव, मे - मह्यं ब्रवीषि - अहमेव परं तत्त्वमित्यादिकं वदसि।

*அர்ஜுனன் சொன்னதாவது—*

பரப்ரஹ்மஸ்வரூபியாய் பரஞ்சோதியாய், பரமபாவநமாயிருப்பவர் தேவரீர். தேவரிஷியான நாரதரும் அஸிதரும் அவர் பிதாவான தேவலரும் வ்யாஸருமாகிய மஹரிஷிகள் எல்லோரும் தேவரீரையே நித்யனும் வைகுண்டநிலயனுமான பரமபுருஷனென்றும் உலகத்திற்கு மூலகாரணபூதனை தேவனென்றும், விகாரமற்று விபுவாய் விளங்குபவனென்றும் சொல்லுகிறார்கள். இவ்வாறு வேதங்களும் வேதவித்துக்களான மஹரிஷிகளுமன்றிக்கே தேவரீர் ஸாக்ஷாத்தாகவே அடியேனுக்கு இவ் வர்த்தத்தை உபதேசிக்கின்றீர். 12, 13

३८५ एवमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

हे केशव, ब्रह्मरुद्रोत्पादक भगवन् मां प्रति यत् तवैश्वर्यादिकं, वदसि अनुशास्सि, वदिरिह शास्त्यर्थे वर्तमानो द्विकर्मकः । एतत्सर्वं - यथोक्तमखिलम्, ऋतं - सत्यम्, मन्ये, एवं शिष्टस्यानुभाषणं शासनविशेषप्रार्थनार्थम् । हे भगवन्, अखिलहेयप्रत्यनीकज्ञानादिगुणनिधे, ते, व्यक्तिं व्यञ्जनप्रकारं, प्रत्यक्षादिवत्प्रकाशनमिति यावत् । देवाः न विदुः दानवाश्च, न विदुः ।

கேசவனே, தேவரீரும் மஹர்ஷிகளும் வேதங்களுமாக உம்முடைய வைபவங்களைச் சொல்லுமவையெல்லாம் உண்மையே என்று நிச்சயமுடையேனடியேன், தேவரீருடைய விபூதிகளைத் தெளிவுபடுத்தும் முறையை ஞானிகளான தேவர்களுமறியார். அசுரர்களுமறியார். 14

३८६ स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

देवादीनां भगवद्वैभवे वक्तृत्वयोग्यता प्रतिक्षिप्ता ; अथ भगवत एव तां योग्यतामाह — भूतानि भावयसीति भूतभावन - भूतानामुत्पादयितः, भूतेश - भूतानां नियन्तः, देवदेव - दैवतानामपि परमदैवत, जगत्पते - जगत्स्वामिन्, पतिशब्दश्शेषिणि रूढः । स कारणं करणाधिपाधिपः' तमीश्वराणां परमं महेश्वरं, तं दैवतानां परमं च दैवतम्, 'पतिं पतीनां' इति श्रुतिसिद्धाश्चत्वारोऽर्थाः 'भूतभावन' इत्यादिभिश्चतुर्भिः पदैः प्रतिपाद्यन्ते। हे पुरुषोत्तम, त्वं आत्मानं, आत्मना - ज्ञानेन, स्वयमेव वेत्थ - जानासि, न त्वन्ये त्वदधीनज्ञाना महर्षिप्रभृतयः ।

ஜகத்காரணபூதனாய் ஸர்வநியந்தாவாய் தேவர்களுக்கும் தேவனாய், ஜகத்பதியாயிருக்கிற புருஷோத்தமனே, தேவரீரைப் பற்றி ஸர்வஜ்ஞனான தேவரீரே நன்றாக அறிவீர். மற்றவர்களுக்கு அறியவியலாது. 15

३८७ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

याभिः विभूतिभिः - विपूर्वो भवतिः भावप्रत्ययान्तो नियमनवाची इत्थंभूतलक्षणे तृतीया यैर्नियमनविशेषैर्विशिष्टः त्वम्, इमान् लोकान् चिदचिदात्मकप्रपञ्चानि, व्याप्य - अन्तःप्रविश्य, तिष्ठसि - 'अन्तःप्रविष्टश्शास्ता जनानाम्' 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः' इत्युक्तरीत्या नियन्तृत्वेनानुप्रविश्य धारकोऽसि, ताः आत्मविभूतयः त्वदसाधारणनियमनविशेषाः, आत्मशब्दोऽन्यविभूतित्वव्यवच्छेदार्थः । हि - यस्मात्कारणात्, दिव्याः - विलक्षणाः, अतः ताः - विभूतीः वक्तुं अर्हसि त्वमेव वक्तुं योग्योऽसि नान्यः [अतः] वक्तुं अर्हसि - त्वमेव व्रूञ्चय, 'अतस्त्वं वक्तुमर्हसि' इति वाक्यस्यावृत्तिः कर्तव्या पुनः अर्हसि इति योग्यत्वनिर्देशेन तत्प्रार्थनं विवक्षितम् ।

இந்த சராசர ப்ரபஞ்சமனைத்தையும் உட்புகுந்து நியமித்துத் தரிக்கின்றவர் தேவரீர். தேவரீருக்கே உரித்தான அப்படிப்பட்ட ஸர்வநியந்த்ருத்வமானது விலக்ஷணமாகையால் இதரர்கள் அதைச் சொல்வதற்கு இயலாது. தேவரீரே அடியேனுக்கு அருளிச்செய்யவேண்டும். 16

३८८ कथं विद्यामहं योगी त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १७ ॥

हे भगवन्, अहं योगी - भक्तियोगनिष्ठस्सन्, सदा, परिचिन्तयन् चिन्तयितुं प्रवृत्तः, 'लक्षणहेत्वोः क्रियायाः' इति हेतौ शतृप्रत्ययः । त्वां परिपूर्णैश्वर्यादिकल्याणगुणगणं भवन्तं, कथं विद्यां - जानीयाम्, केषु केषु च - पूर्वोक्तबुद्धिज्ञानादिव्यतिरिक्तेषु केषु केषु च भावेषु - वस्तुषु मया चिन्त्यः - नियन्तृत्वेन ध्येयः असि ।

அனந்த கல்யாணகுணபரிபூர்ணரான தேவரீரை அடியேன் எக்காலமும் த்யானம் செய்யத்தொடங்கியவன். அந்த குணவிசேஷங்களனைத்தையும் எவ்வாறு தெரிந்துகொள்வேன்? எந்தெந்த வஸ்துக்களில் எந்தவிதமாக தேவரீருடைய நியமனம் நடைபெறுகின்றது? 17

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ विळम्बि - मिथुन [सं १०

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

JUNE, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 उभयरूपकम् ।
2 राजकर्तारः ।
3 मुकुन्दमाला ।
4 सप्तर्षिवृत्तान्तः ।
5 राज्यविपर्ययः ।
6 प्रकृतिभेदः ।
7 पुस्तकपरामर्शः ।

TIRUPATI

॥ श्रीः ॥

# ॥ उभयरूपकम् ॥

## ॥ प्रहसनम् ॥

श्रीमहालिङ्गकवितिरचितम् ।

---

प्रत्यूहाद्रितटीं विभेत्तुमनिशं भङ्क्तुं च दुःखाटवी-
माहर्तुं फलमीप्सितेन विधिनाऽभ्यायासितो मानुषैः ।
श्रान्तोऽसाविति वासवा मदजलव्यालुम्पनोद्योगिनी-
मम्बां स्नेहकृपाकुलामुपहसन्नागाननः पातु नः ॥ १ ॥

नान्द्यन्ते

सूत्रधारः— (नेपथ्याभिमुखमवलोक्य) सखे, इतस्तावत् ।

प्रविश्य

विदूषकः— भाव, अयमस्मि ।

सूत्रधारः—सखे, अद्य खलु सामाजिकाराधनाय कीदृग्रूपकं प्रयोजयिष्य इति सवितर्कस्य मे मार्गदर्शी भवितुमर्हसि ।

विदूषकः— सर्वथा देशकालानुरोधः कर्तव्यः ।

सूत्रधारः— कथमिव ।

विदूषकः— पश्यतु भावः,

हसन्ति मिलिता दिशः प्रकटचन्द्रिकाडम्बरे
हसन्ति कुमुदोत्पलान्यपि सरोवरे निर्मले ।
हसन्ति शरकाननान्यभिनवैः स्वपुष्पोद्गमै-
रनेहसि मुदान्विते प्रहसनं प्रयोक्ष्यावहे ॥ २ ॥

तच्चिन्तयतु भवान् किमप्यस्मत्प्रयोगार्हमभिनवं प्रहसनम् ।

सूत्रधारः— साधु सखे साधु । सम्यक् प्रतिबोधितोऽस्मि । अस्ति किल त्वद्गोत्रनामधेयाङ्कितं सहृदयहृदयङ्गमं किञ्चिन्नूतनं प्रहसनम् ।

विदूषकः— किं मद्गोत्रनामाङ्कितं प्रहसनमप्यस्ति । कीदृशं तत् ?

सूत्रधारः— किं तावत्ते गोत्रनाम ?

विदूषकः— तत्खल्वभिवादनवाक्ये पठ्यते ।

सूत्रधारः— तदेव पृच्छामि ।

विदूषकः— (सरोषम्) कथमज्ञान् पृष्टः कलिङ्गानुपलिप्ससि । अतःपरं सन्ध्यावन्दनमपि प्रक्ष्यसीति मन्ये । (पुनः सानुनयम्) भाव, यतस्त्वं चिराय वृद्धाभिवादनविच्छेदादभिवादनक्रम एव मया विस्मृतः ।

सूत्रधारः— सन्ध्यावन्दने का कथा ?

विदूषकः— सम्यग्दृष्टं भावेन । अनभ्यासात् सर्वं जन्मान्तरवासनाप्रायं प्रयत्नोद्बोधनसापेक्षं वर्तते । अथ महत्यस्मिन् शाखानुप्रधावने प्रस्तुतं खलु निर्गलितम् ।

सूत्रधारः— सखे, कौण्डिन्यान्वयमण्डन, मण्डूकमिश्र, शृणु तावत्,

अप्पय्याख्याप्रथितयशसां यज्वनामन्ववाये
जातः पूते विबुधतिलकस्यात्मजो यज्ञसूरेः ।
कौण्डिन्याख्यं प्रहसनमसौ श्रीमहालिङ्गनामा
हास्योत्साही व्यतनुत मुदे दृष्टसारस्वभूम्नाम् ॥ ३ ॥

तदत्र निरूपयाव इति मे मनीषा । तत्र च कौण्डिन्यब्रह्मचारिणो भूमिकामर्हति भवान् ।

विदूषकः— कुतः ?

सूत्रधारः— सामान्यलक्षणतया ।

विदूषकः— अत एव नार्हामीति मे प्रतिपत्तिः ।

यतः,

स्वयं कौण्डिन्य एवास्मि किञ्च पैचण्डिकप्रथः ।
यथार्थप्रायता हन्ति रूपारोपस्य रस्यताम् ॥ ४ ॥

तेन ह्यन्वेषयतु भावः किमप्यन्यत प्रहसनम्। अथवा तेनैव कविना प्रत्यग्रनिर्मितमिति अस्माकमचिरादुपहृतम् उभयरूपकम् नाम प्रहसनमेव किं नाधुना प्रयुज्यते ?

नेपथ्ये

महत्कौतूहलं मे।

सूत्रधारः— किमभ्युपपन्नमशरीरिण्या ? (दृष्ट्वा) अहो, निपुणाः खलु मे सुहृदः।

> अन्तःकरणमात्रेण निश्चयं मम गच्छतः।
> वाचोपन्यासमाक्षिप्य कर्मण्येवाधिकुर्वते ॥ ५ ॥

तदावामप्यनन्तरकरणीयाय सज्जीभवावः।

इति निष्क्रान्तौ।

प्रस्तावना।

---

ततः प्रविशतः कुक्कुटस्वामिवज्रघोषौ।

वज्रघोषः— महत्कौतूहलं मे भवदात्मजमद्य छागलं द्रष्टुम्। किमिदानीं सांवत्सरिको विरामः कलाशालानाम्।

कुक्कुटस्वामी— धिगव्युत्पत्तिं ते लोकवार्तासु। कथमिदानीं सांवत्सरिकविरामस्य प्रसक्तिः ; यश्चैत्रमारभ्य आषाढपर्यन्तमनेहसं परामृशति।

वज्रघोषः— तेन ह्यभ्यनुज्ञया कतिपयदिवसविश्रमार्थी प्राप्त इति मन्ये।

कुक्कुटस्वामी— अहो ते प्रज्ञातिशयः। किमकाण्ड एव पाठशालाप्रचलनावसरे विश्रमार्थी गृहीताभ्यनुज्ञः स्वग्रामैकान्त्यमाद्रियमाणः कोऽप्युपावर्तेत।

वज्रघोषः— तत्र कारणेन विशिष्टेन भवितव्यमिति न दुष्करं प्रतिपत्तुम्। कीदृशं तदित्येव प्रस्तुतः प्रश्नः।

कुक्कुटस्वामी — अस्त्येष प्रश्नः केषाञ्चिदिति न मे विवादः । किं त्वभिज्ञं मन्यैरुपक्षिप्यमाणो न सामर्थ्यमधिरोहति ।

वज्रघोषः — अनभिज्ञो नामाहम् । भवत्वेवमेव । यद्यभिज्ञो न त्वां प्रक्ष्यति । अनभिज्ञेन पृष्टो न कथयिष्यसि । अहो ते दौर्जन्यम् । अहो स्वस्मिन्नेव विस्मयाविष्टता । न कथयसि चेन् गोवत्सोऽस्माकं गृहे तृणानि न चरिष्यति किल । अपेहि रे जाल्म, अपेहि । किमकारणागतेन सकारणागतेन वा ज्ञातेन ते सुतेन । ग्रामीणजनसुलभां वाचालतां ते कालयापनार्थं किमपि वर्धयितुमभून्मे कुतककौतुकमाविष्कृतं त्वत्पुत्रमन्तरेण । त्वं तावन्मर्कट इव स्वपृष्ठभागं तुच्छमपि प्रश्नोत्तरं प्रार्थनामात्रेण जातविकारो निगूहसे । नित्यमेवातिदुर्जनस्त्वमेवमभिभाषणसारल्यमपदे विलोटयन् असेव्योऽसि गोष्ठीरसिकानाम् । धिक् त्वां श्वपुच्छवदप्रतिविधेयकौटिल्यम् । (इत्युत्तिष्ठति)

कुक्कुटस्वामी — सखे, मा कुप्य, । सर्वदा त्वमस्थाने प्रश्नकण्डूदुर्ललितः स्वयमात्मानमन्यांश्च कदर्थयसि । किमत्र प्रष्टव्यम् । इदानीं खलु शैशिरो विरामः कलाशालानाम् । ढक्कारण्डाभिरप्यवगतमेतत्र ते विदितं चेत् कस्मै कुप्यसि ।

वज्रघोषः — न तु न जानामि । किं तु असाध्यमाशयोऽस्मिन् प्रश्ने । यः किल ग्रीष्मविराममासेष्वपि स्वग्रामं नोपावर्तितुं चिन्तयति ; परं तु पिङ्गलपुरे मातुलगृहमेव गच्छति स कथमिदानीम् अल्पीयांसं विराम-समयं प्राप्येहागत इति ।

कुक्कुटस्वामी — उपपन्नः प्रश्नः । शृणु तावत्— शैशिरेऽस्मिन् समये पिङ्गल-पुरवासं न प्रशंसन्ति प्रभवः । अन्यच्च, चिरादात्मजो द्रष्टव्य इति कृतादरेण मया स लेखमुखेन शश्वन्निर्बन्धयानुनीत इहागन्तुम् ।

वज्रघोषः — (स्वगतम्) जानामि जानामि खलु यतः पुत्रभाण्डमानीतं विक्रेतुं त्वया । (प्रकाशम्) हुम्, कुतश्चिदनुनीयन्ते सुतव इदानीं स्वपित्रोरन्तिकमुपावर्तितुम् । धिक्कालवैषम्यम् ।

> विदेशवेषभाषाढ्याः प्रभिन्नगतयो नराः ।
> विप्रकर्षं शनैर्यान्ति स्वजनेभ्योऽपि नूतनाः ॥ ६ ॥

अहो स्नेहशोषणः कालमहस ऊष्मा ।

कुक्कुटस्वामी— वज्रघोष, अलमनया अप्रसक्तया कालनिन्दया । प्रकृते खलु मदात्मजः निरन्तरपुरवासहेवाकितया मद्रपत्तनात् पिङ्गलपुरं गच्छत्यनध्ययनमासेष्वपि । न तु पितृस्नेहवैधुर्यात् ।

वज्रघोषः— उदारः समाश्वासः । तेन हि मन्ये नगरवासलम्पटानां ग्रामवासे काममस्वरसता सम्भवतीति ।

कुक्कुटस्वामी— बाढम् । न केवलं ग्रामवासस्तेषामसुभगः, किञ्च ग्रामीणजनसंस्तवं ते न रोचयन्ते ।

वज्रघोषः— (स्वगतम्) अहो अस्यापूर्वोऽहंप्रत्ययः । आजन्मग्रामीण एष स्वपुत्रसम्बन्धेन स्वं नागरिकमवैति । (प्रकाशम्) ग्रामीणनागरिकयोर्मध्ये आद्य एव श्लाघनीय इति मे प्रतीतिः । यतः,

वेषभाषाव्रताचारप्रत्ययप्रणयाः पुरे ।
कृत्रिमा विकृता वापि न स्वभावानुरोधिनः ॥ ७ ॥

कुक्कुटस्वामी— तेन हि ग्रामवासादरण्यवासः श्लाघनीयतरः । यत्र वृक्षकोटरेषु गुहागर्भेषु च खगमृगनिर्विशेषमुष्यते ।

वज्रघोषः— बाढम् । कः सन्देहः ? रघवः किल राजानः गलिते वयसि सुतं राज्येऽभिषिच्य वनमेव प्रातिष्ठन्त । उक्तं च रघुकारेण, 'वार्धके मुनिवृत्तीनाम्' इति । तस्मादेव मे समासः—

मा स्म भूत् कृत्रिमा शोभा परस्यार्थे परिष्कृता ।
क्षुद्रः कदर्यो भूयासं स्यान्मे ग्रामीणताऽनघा ॥ ८ ॥

कुक्कुटस्वामी— अस्त्येव स्वतस्सिद्धा अप्रतीकारा च जन्मन्यस्मिन् ।

वज्रघोषः— आजन्मसिद्धग्रामीणत्वे आवयोरद्वैतमेव । प्रतीकारघटना नाम यदि पुत्रसम्बन्धेन भवितुमर्हति, सापि मम प्रागेव सिद्धा । अहो बत, ग्रामीणतादौर्गत्यप्रतीकारमूलकन्दस्य भवत्पुत्रभाण्डस्याभिनन्दनीयता । यतः,

पौर्वं त्यक्तं नैव पाश्चात्यमस्ति
भ्रष्टं स्थानात् प्रापि नाङ्घ्रेर्निवेशः ।

केशाः कृत्ताः विस्मृतो विप्रभावः
किञ्चिज्ज्ञातं भूर्यवज्ञातमद्धा ॥ ९ ॥

कुक्कुटस्वामी – अरे रे, वृथावाचाट, सर्वज्ञंमन्य, कूपमण्डूक, पल्वलमहिष, दिवाखद्योत, अवकरकीट, नगरवार्तानभिज्ञ, किमिति बहु प्रगल्भसे । किं त्वं जानासि कुतो नगरवासिनां विविधकर्तव्यनिरतानां कृत्तशिखत्वं सुतरामवर्जनीयमिति—

स्नात्वा सद्यः परिहितशिरःशाटकेनादिनान्ता-
च्छैत्याद्दोषः प्रभवति मुहुस्तेन केशा निकृत्ताः ।
एतन्मात्रेऽपि च कलकलस्तन्यते चेद्भवद्भि-
र्धिग्ब्राह्मण्यं धिगपि भवतां मन्दधीयां मनीषाम् ॥ १० ॥

अपि च, ज्ञास्यसि मत्पुत्रभाण्डस्य, तत्सम्बन्धेन मम च अभिनन्दनीयतां यदा किलायम्—

उत्तीर्य सिन्धुमुपगम्य सितावनिं तां
तीरे विधाय वसतिं तमसापगायाः ।
ऊनद्विवर्षसमयेन गृहीतमुद्रो
राज्यश्रिया समुपयास्यति दीप्यमानः ॥ ११ ॥

वज्रघोषः— अहो विभीषिका । अहो सङ्कल्पामृतम् । अहो दिवा स्वप्नः । सङ्गता खल्वियं लोकोक्तिः — 'भाविराज्यसम्भावनया श्वेतच्छत्रधारणम्' इति । उत्तरतु तावदयमासन्नं प्रौढव्युत्पत्तिपरीक्षासिन्धुम् । ततः प्रतरिष्यति किंपुरुषवर्षोपजिगमिषया महासमुद्रम् । यद्येवं जम्बूफलवत् शाखावधूननमात्रेण हस्ते प्रच्यवति राज्यश्रीः । तदा–(स्वगतम्) नेयं दुर्लभा भविष्यति अस्मद्ग्रामपालकुमारस्योरभ्रकस्य ।

नेपथ्ये

आर्य, वज्रघोषमिश्र, तदा खल्वस्मद्ग्रामपालकुमारस्योरभ्रकस्य न सा दुरासदा भविष्यति ।

वज्रघोषः— ह ह ह ! महात्मसंवरणमिदं बत छन्दोधृतिनोद्घाटितम् । साधु, छन्दोवृते, साधु । सुधीरमुपन्यस्तम् । इत एहि । तिष्ठतु तावन्नालिकेरत्वगुत्पाटनम् । ह ह ह ।

प्रविश्य अर्धोत्पाटितत्वचा नालिकेरेण हस्तस्थितेन,

छन्दोवृतिः— एवं ननु पुनरेव प्रत्यावर्तते पारेसमुद्रं कल्पलतामिव याचन-मुग्धस्वप्नः ।

मार्गापदः प्रतिभयाः परदेशवासा-
त्पातित्यमर्थपरिहानिरचिन्त्यरूपा ।
भुक्त्वा विमर्शसमयमाद्रियतेऽलिलोभा-
त्सार्पः शिरोमणिरिवाङ्गलमहीप्रवासः ॥ १२ ॥

वज्रघोषः— महान् खल्वयमनर्थः । क सन्देहः ।

कुक्कुटस्वामी— (छन्दोवृतिमुद्दिश्य) मूर्ख, धिक् त्वाम् गच्छान्तर्गृहम् । ।

छन्दोवृतिः— इदानीं किल पाश्चात्यशास्त्राण्यादतिलङ्घितं दृश्यते वैदिक-कुलानामनाविलमिदं पारिशुद्ध्यम् । यदमीभिराङ्गलच्छायानुपातमुग्ध-साहसिकैरनपाया भारतीयधर्मस्थितिरकाण्ड एवाकुलीक्रियते । इद-मेतेषामनर्थमधीतम् । पश्यत तावदस्मात्पू एव नूतनावतारमाङ्गल-सायुज्यस्य—

सकञ्चुकमुरस्सदा सदनचङ्क्रमेष्वप्यहो
पदत्रपिहितं युगं चरणयोर्वपुर्मानिनः ।
उपोढमुपलोचनं वदति सार्धकाकुस्वरं
प्रनर्तितशिरोधरं चटिति कूणितं पश्यति ॥ १३ ॥

वज्रघोषः— ह ह ह ! सम्यगुपन्यस्तम् । साधु भोः छन्दोवृते, साधु । ह ह ह ।

कुक्कुटस्वामी— अरे जाल्म, अविनीत, ननु भणामि गच्छान्तर्गृहमिति ।

छन्दोवृतिः— ईदृशः खलु नव्यो नागरः,

फाले विशोधयति पुण्ड्रमपोह्य तूर्णं

कुक्कुटस्वामी— अरे दुराचार, दुर्वृत्त—

छन्दोवृत्तिः— सन्ध्यादिकं नियतकर्म निराकरोति।

कुक्कुटस्वामी— ध्वंसिष्यमाण—

छन्दोवृत्तिः— उच्छिष्टदोषमविमृश्य चरत्यभोज्यम्

कुक्कुटस्वामी—आः पितृद्रोहिन्, पापिष्ठ—

छन्दोवृत्तिः— अभ्यस्यति स्वयमहो क्षुरकर्मदाक्ष्यम् ॥

कुक्कुटस्वामी— कुण्डक, जारिणीप्रसूत, अयं न भवसि। (इति सक्रोधाटोपं निष्क्रान्तः)

वज्रघोषः— आः निर्जितः पुत्रेण पिता। धन्योऽसि भोः कुक्कुटस्वामिन् धन्योऽसि। इदमभिरूपवचनम्- 'पुत्रादिच्छेत् पराभवम्' इति। (इति हसति)

छन्दोवृत्तिः— (सखेदम्) अहो धिग्व्यामोहं अरित्रोः।

आवर्ज्य स्वेदमलिकाक्ष्वेलारामेषु जीर्यतः।
सतो वैदेशिकप्रायः कुलघाती सुतः प्रियः ॥ १४ ॥

वज्रघोषः— अनवद्यमेतन्मुग्धलोके।
यतः,

वाराङ्गनासु रतिरभ्यधिका विटानां
दुर्गेषु विक्रमरसः प्रबलो भटानाम्।
आर्येष्वनार्यमतिता सुदृढा शठाना-
मुद्वृत्तलालनमहार्थरसं जडानाम् ॥ १५ ॥

छन्दोवृत्ते, तिष्ठतु तावदेतत्। क्वेदानीं तत् कुक्कुटस्वामिनो मनोरथोच्चयसिद्धिभावनापक्षतावच्छेदकपर्यायं पुत्रभाण्डम्।

छन्दोवृत्तिः— को वेद हताशम ? किमद्यप्रभातं नापितो नापित इति ताम्यन् लालप्यमानो निरगच्छत्।

वज्रघोषः— युज्यते। अस्त्येतत् खलु आह्निकक्षौरधौरन्धर्यं पाश्चात्यफक्किकाविम्बग्राहिणामाधुनिकसुधियाम्।

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३१] कलि ५०५९ विलम्बि - मिथुन [सं १०

## राजकर्तारः ॥

रामे वनं दशरथे च दिवं गते यद् वृत्तं तद्वक्तुमारभ्य वाल्मीकिरिदमाह —

व्यतीतायां तु शर्वर्यामादित्यस्योदये ततः ।
समेत्य राजकर्तारः सभामीयुर्द्विजातयः ॥ २ ॥

मार्कण्डेयोऽथ मौद्गल्यो वामदेवश्च काश्यपः ।
कात्यायनो गौतमश्च जाबालिश्च महायशाः ॥ ३ ॥

एते द्विजाः सहामात्यैः पृथग्वाचमुदीरयन् ।
वसिष्ठमेवाभिमुखाः श्रेष्ठं राजपुरोहितम् ॥ ४ ॥

अतीता शर्वरी दुःखं या नो वर्षशतोपमा ।
अस्मिन् पञ्चत्वमापन्ने पुत्रशोकेन पार्थिवे ॥ ५ ॥

स्वर्गतश्च महाराजो रामश्चारण्यमाश्रितः ।
लक्ष्मणश्चापि तेजस्वी रामेणैव गतः सह ॥ ६ ॥

उभौ भरतशत्रुघ्नौ केकयेषु परन्तपौ ।
पुरे राजगृहे रम्ये मातामहनिवेशने ॥ ७ ॥

इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् ।
अराजकं हि नो राष्ट्रं न विनाशमवाप्नुयात् ॥ ८ ॥

इति। मार्कण्डेयप्रभृतयो द्विजा इह राजकर्तार उच्यन्ते। राजरहितोऽभवद्देशः। दशरथस्य आलेख्यशेषत्वात्। चतुर्णामपि तत्पुत्राणां प्रवासाच्च। क्षणमेकमपि एवं भवितुं नार्हति देशः। अराजकं हि राष्ट्रं विनाशमवाप्नुयात्। अतः सद्य एव राजा कश्चन कर्तव्यः। अतः ते द्विजाः रात्रेरपगमं प्रतीक्ष्य स्थिताः प्रभात एव सभां गत्वा वसिष्ठं विज्ञापनं चक्रुः। किमिति? 'इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम्' इति। अद्यैव विलम्बलवलेशमपि विना अस्मिन्नेव क्षणे, इह अयोध्यायां वर्तमानः, इक्ष्वाकूणां कश्चित् इक्ष्वाकुकुलोत्पन्नोयः कश्चित् राजा क्रियतामिति।

दशरथस्तावन्मृतः। न तस्य पुनरुत्थानप्रसक्तिरस्ति। रामलक्ष्मणौ चतुर्दश वर्षाणि वने वत्स्यतः। अतस्तयोरपि ततःप्राक् राजभावो न घटते। भरतशत्रुघ्नौ तु सहसा आनेतुं शक्यौ। केवलं बन्धुप्रियतया हि तौ मातामहकुले वसतः। न तु केनचिन्नियमेन। एवं सत्यपि तावपि उपेक्ष्य कञ्चन राजानं कर्तुं त्वरमाणास्ते अभूवन्।

धार्मिको महाराजो मृतः शेते। न शोकः प्रमादावसादाय नाकल्पत। तस्य यथोचितसंस्कारकरणाय भरत आनेतव्यः। तत्र ते चिन्तां नाकुर्वन्। दूतैः गत्वा भरताय वृत्तान्तो निवेदनीयः। ततस्तेन तस्मात्स्थानात् प्रस्थाय आगन्तव्यम्। तत्र कश्चन विलम्बो भवेत्। सोऽपि तेषां दुःसह आसीत्। तावन्तमपि कालं राष्ट्रस्य अराजकत्वं ते नैच्छन्। अतः सपदि यं कञ्चन राजभावे स्थापयितुं त्वरन्ते स्म। परन्तु किं सर्वो जनः राजभावमर्हति? तत्र हि विशिष्टा योग्यता अपेक्षिता। अपरीक्ष्य यः कश्चिदल्पो नरः सिंहासने स्थापितश्चेत् अराजकत्वादपि कष्टतरा राष्ट्रस्य स्थितिः स्यात्। अतस्ते इक्ष्वाकूनेव कञ्चन राजानं चिकीर्षन्ति स्म। इक्ष्वाकुकुले जातः को नाम राजभावोचितसकलगुणसम्पन्नो न भवेत्? तस्मिन् कुले जन्मैव यस्य कस्यापि चतुरन्तमहीपालभावयोग्यत्वे पर्याप्तं लिङ्गम्। न परीक्षाया अवश्यम्भावः।

राज्यतन्त्रधुरन्धराः अमात्याः सन्ति। कुलगुरुर्वसिष्ठोऽस्ति। एते किं 'अनन्तरं को राजा भवितुमर्हति। देशस्य कथं रक्षा कर्तव्या' इत्यादिकं न चिन्तयिष्यन्ति? तेषु सत्सु कथमेते द्विजास्तत्र व्यग्रा भवन्ति? अस्य प्रश्नस्य इदमुत्तरम्। एते सम्यक् जानन्ति— अमात्याः सन्ति। कुलगुरुर्वसिष्ठोऽस्ति। ते कर्तव्ये जागरूका भविष्यन्तीति। तथापि महा-

राजप्रायणशोकाकुलतया वा कारणान्तरेण वा तेषां कर्तव्यकरणप्रवृत्तौ विलम्बः स्यादपीति सम्भाव्य तत्परिहरणतत्परतया अमात्यैः सङ्गम्य तैः साकं वसिष्ठमुपगम्य उक्तां विज्ञप्तिमकुर्वन्, इति ।

लोकहितैकप्रवणा महान्तः । तेषां जन्मप्रयोजनं देशक्षेमः । तदन्तर्गत-आत्मक्षेम आनुषङ्गिकः । राज्यशासनं कथं क्रियत इति विज्ञाय रागद्वेष-लोभासूयादम्भरहितैः सर्वजनदयार्द्रहृदयैश्च साध्वसाधुविवेचनेन यथार्ह-मनुशासनं कर्तव्यमिति तेऽमन्यन्त । अद्यतना महान्तोऽपि एवमिदानीं कर्तुमर्हन्ति ।

---

# मुकुन्दमाला ॥

श्रीमन्नाम प्रोच्य नारायणाख्यं
केन प्रापुर्वाञ्छितं पापिनोऽपि ।
हा नः पूर्वं वाक् प्रवृत्ता न तस्मिन्
तेन प्राप्तं गर्भवासादि दुःखम् ॥ ३६ ॥

'इत्यालापिनं प्रतिपदं कुरु मां मुकुन्द' इति भगवन्नामसङ्कीर्तनसुकृत-सम्पत्तिप्रार्थनायामुपक्रम्य तत्प्रसक्तानुप्रसक्त्या तत्तत्कथनमुखेन सर्व-हितपुरुषार्थान् प्रतिपादयामास महाराजः कुलशेखरः । श्रीमान् नारायणः परतत्त्वम् । तच्चरणारविन्दयोर्भक्तिः प्रपत्तिर्वा हितम् । जननमरण-परम्परारूपसंसारसागरमतिलङ्घ्य नित्यनिरतिशयानन्दप्राप्तिः पुरुषार्थ इति ।

भक्तिर्वा प्रपत्तिर्वा सहसा जनानां न सम्पद्यते । बहुसुकृतलभ्यहि द्वयमिदम् । अतः प्रथमं सुकरं नामसङ्कीर्तनं कर्तव्यमिति च ज्ञापयामास ।

एतावता श्रोतॄणां अवश्यवेद्यविज्ञानं सम्पन्नं भवति । येषामिदं विज्ञानं सम्पन्नं भवति, तेषां सद्यः 'कथमितःपूर्वमेव वयं भक्तिं प्रपत्तिं वा अनुष्ठाय परमपुरुषार्थं न लब्धवन्तः स्मः' इति महान् निर्वेदो जायेत । 'तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानना' इति निर्वेदस्य लक्षणमाहुः ।

येषामेवं निर्वेदो न भवति तेषां तत्त्वहितपुरुषार्थविषयं विज्ञानं न सम्य गुत्पन्नमित्येव वक्तव्यम्। अत एव तेषां निरतिशयानन्दरूपतया उत्तम-पुरुषार्थभूतायां मुक्तौ अभिलाषो नोत्पन्न इत्यपि स्यात्। एवं निर्वेदस्या-पेक्षितत्वादेव मुक्तिसौधसोपानेषु इममपि गणयन्ति– विवेकनिर्वेदविर-क्तिभीतय इति। तदिदानीं यथावत् तत्त्वविज्ञानसम्पत्त्यनन्तरं उदयमानं निर्वेदं स्वनिष्ठतया व्यञ्जयन्नाह– श्रीमदिति।

श्रीमन्नाम। नाम श्रीमत्। मोक्षसाम्राज्यप्रदत्वात्। मोक्षमिच्छे-ज्जनार्दनादिति हि प्रसिद्धम्। श्रीमतः श्रिया नित्ययुक्तस्य भगवतो नाम इति च योजना।

प्रोच्य। प्रकर्षेण भक्तिश्रद्धाविशिष्टतया उक्त्वा। यद्यपि यथा-कथञ्चिदुक्तस्यापि फलाविनाभावः, तथापि अधिकस्याधिकं फलमिति न्यायेन तत्र प्रकर्षेऽपि यतितव्यमित्यभिप्रायः।

भगवतः सहस्रं ततोऽधिकानि च नामानि सन्ति। तेषु किं नाम विशेषतः कीर्तनार्हम्। सर्वसङ्कीर्तनं काममुचितम्। तथापि तत्र अश-क्त्या एकस्मिन् उपादेये कतमद्ग्राह्यम्। तत्राह– नारायणाख्यम्। आख्या-यते इत्याख्या स्वरूपम्। नारायण इति आख्या स्वरूपं यस्य तत्। नारा-यणशब्दात्मकं नामेत्यर्थः। 'सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्ति।' इति नारायणनामप्रभावः प्रसिद्धः।

के न प्रापुः। सर्वेऽपि प्रापुरेव। प्रतिषेधद्वयं दार्ढ्यार्थम्।

वाञ्छितं पापिनोऽपि। पापानि इष्टप्राप्तिप्रतिबन्धाय नालम्। भग-वन्नामकीर्तनं पूर्वकृतपापप्रायश्चित्तं च अभिलषितार्थप्राप्तिसाधनं च।

हा नः पूर्वम्। अस्माकमपि वाक्, इतः प्राक्तनेषु जन्मसु यस्मिन् कस्मिंश्चिदपि, तस्मिन् नारायणेति नाम्नि, तत्कीर्तने वा प्रवृत्ता अभवि-ष्यच्चेत्, नूनं निरतिशयानन्दानुभवरूपो मोक्षो लब्धोऽभविष्यत्। हन्त सा न प्रवृत्ता।

तेन प्राप्तम्। तेन कारणेन गर्भवासप्रभृति दुःखं प्राप्तमस्माकम्। भाग्यहीना वयम्।

अस्मिन् श्लोके द्वितीयादिपादारम्भेषु केन, हा न, तेन, इति दीर्घा-द्युत्तरनकारश्रवणात् श्रुत्यनुप्रासः। प्रथमपादेऽपि नकारविरहेऽपि तत्तु-ल्यमकारसत्त्वात् तत्रापि तत्सत्त्वमनुसन्धेयम्।

---

# सप्तर्षिवृत्तान्तः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—:O:—

अयं श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि कस्मिंश्चिदध्याये कथ्यते ।

भीष्म उवाच— अथात्रिप्रमुखा महर्षयो मूलानि फलानि च भक्षयन्त-स्तस्मिन्वने व्यचरन् । तदनु ते सुपीनांसपाणिपादमुखोदरं स्थूलाङ्गं परिव्रजन्तं शुनस्सखनामानं परिव्राजमपश्यन् ।

अरुन्धती तु 'सर्वाङ्गोपचितं सुन्दरं तं दृष्ट्वा भवन्तो नैवं भवि-तारः ?' इति ऋषीनब्रवीत् ।

वसिष्ठः, 'यथाऽस्माकमग्निहोत्रमहुतं सायंप्रातश्च होतव्यञ्च भवति तथै-तस्येह न भवति । तेन शुनस्सखः पीवान् ।' इत्यभणत् ।

अत्रिः– 'यथाऽस्माकं क्षुधया वीर्यमाहतं कृच्छ्राधीतं प्रनष्टं च भवति तथैतस्येह न भवति । तेनायं शुनस्सखः पीवान्' इत्यवदत् ।

विश्वामित्रः– 'यथास्माकं शश्वच्छास्त्राभ्यासकृतोऽवरस्तथैतस्येह न भवति । अयमलसः क्षुत्परिहारपरो मूर्खश्च । तेनायं शुनस्सखः पीवान्' इत्यु-दैरयत् ।

जमदग्निः– 'यथाऽस्माकं वार्षिकमन्नमिन्धनं च चित्ते सञ्चिन्त्यं भवति तथैतस्येह न भवति । तेनायं शुनस्सखः पीवान् ।' इत्यलपत् ।

कश्यपः– 'यथाऽस्माकं चत्वारस्सहोदरा देहि देहीत्यस्मान् भिक्षन्ते तथैन-मिह न भिक्षन्ते । तेनायं शुनस्सखः पीवान् ।' इत्यभाषत ।

भरद्वाजः– 'यथाऽस्माकं भार्यापवादेन शोकस्तथा स्वयमब्राह्मणस्य ब्राह्म-णान् बन्धुत्वेन व्यपदिशतोऽज्ञस्यैतस्येह न भवति । तेनायं शुनस्सखः पीवान् ।' इत्यभ्यधत्त ।

गौतमः– 'यथाऽस्माकं राङ्कवं त्रिषु स्थलेषु रज्ज्वास्यूतं तदेकैकं त्रैवर्षिकञ्च भवति तथैतस्येह न भवति । तेनायं शुनस्सखः पीवान् ।' इत्याचष्ट ।

अनन्तरं परिव्राट् शुनस्सखस्तान्महर्षीनवलोक्य यथान्यायमभिवाद्य तेषां पादौ पाणिभ्यामस्पृशत । अथ क्षुत्प्रतीकारकाङ्क्षिणस्ते तेन कृतां परिचर्यामन्योन्यन्निवेद्य तेन सहैव विपिने प्रातिष्ठन्त । एकरूपनिश्च-

यैकैककार्यंशालिनस्ते फलानि मूलानि च समुद्धृत्याददाना: काननानि व्यचरन्। सञ्चरन्तस्तेऽचिरबैर्वृक्षैर्वृतां शुचिपूर्णप्रसन्नोदकां बालादित्यवपु:प्रख्यै: पुष्करैरुपशोभितां वैडूर्यवर्णसदृशै: पद्मपत्रैर्जलभवरसैर्विभिर्नानाविधैर्विहगैश्च छन्नामेकद्वारां शोभनावतरणमार्गां कस्यापि पुरुषस्योपयोगस्यायोग्यामकर्दमां शुभां पद्मिनीमैक्षन्त। वृषादर्भिप्रयुक्ता यातुधानीति विख्याता विकृतदर्शना कृत्यानां पुष्करिणीमरक्षत्। ते सर्वे महर्षयश्शुनस्सखसहाया बिसार्थं कृत्यापरिपालितां तामभिजग्मु:। ततस्ते यातुधानीं विकृतदर्शनां कमलिनीतीरे स्थितां तां कृत्यामालोक्य 'त्वं पद्मिनीतीरमाश्रित्यैका तिष्ठसि। त्वं का? कस्यार्थे तिष्ठसि? तव किं प्रयोजनम्? त्वं किं चिकीर्षसि?' इत्यूचु:। यातुधानी— 'हे तपोधना:, अहं याकाचिदस्मि। मे अनुयोग: कथञ्चन न कर्तव्य:। सर्वे यूयं मां पद्मिन्या आरक्षिणीं वित्त' इति प्रत्यपादयत्। ऋषय:— 'वयं सर्व एव क्षुधार्तास्स्म:। अस्माकमन्यत्किञ्चिन्नास्ति। भवत्यास्सम्मतेरनन्तरं वयं सर्व एव बिसान्युत गृह्णीयाम।' इत्यपृच्छन्। यातुधानी— 'केनचित्समयेन यूयमितो बिसानि यथाकाममुपादद्ध्वम्। एकैको नाम मे प्रोच्य ततो मा चिरं गृह्णीत।' इति न्यवेदयत्।

(अनुवर्तते)

# राज्यविपर्यय:॥

(10)

## मन्त्रिसभा (अनुवृत्ता)

अमात्य:— प्रिया अस्मत्पौरमहान्त:, अयं श्रीमान् अकम्पन: यदुद्दिशति, यदर्थं यतमानो वर्तते, तन्मन्ये सम्यक् भवन्त: सर्वे जानन्ति। तदीया विविधा वाच: चिरात् शृण्वन्तोऽपि भवन्त: भिन्नमतयो न भवन्ति यत्, तेन महाराजस्य देशपरिपालनं ईदृशमिति, महाराजस्य युष्माकं च अन्योन्यं प्रेमबन्ध ईदृश इति च सुष्ठु ख्यापितम्।

बहुदेशगामी, बहुराज्यदर्शी, अत एव बहुज्ञोऽयं अकम्पनमिश्रः । अतो मम महत् कुतूहलं अस्य मुखात् श्रोतुं अस्मद्राज्यं प्रति कोऽस्याभिप्राय इति । राज्यशासनप्रकारः देशे देशे भिद्यते । तत्र देशान्तरीयेभ्यः अस्मद्देशीयस्य कं विशेषमयं पश्यतीति जिज्ञासा मे बलवती । (सर्वे अकम्पनं पश्यन्ति)

अकम्पनः— महाप्राज्ञ, मन्त्रिप्रवर, भवत्सकाशात् बहु मे ज्ञातव्यमस्ति । दयालुर्भवान् अपेक्षितपूरणेन मामनुग्रहीतुमर्हति ।

अमात्यः— आर्य, अकम्पन, पूर्वमेवोक्तवानस्मि आर्जवं तेऽभिनन्दनीयमिति । पूर्वगृहीतेऽर्थे अभिनिवेशरहितः तत्त्वान्वेषी सम्प्रति भवान् भवति । बहव एवं न भवेयुः । राज्यविपर्यये तव मतिरासीत् । सा मतिः सम्प्रति विपर्ययं गतेव । तदस्तु । इदं तु भवानद्य वक्तुमर्हति अस्मन्महाराजस्य शासनपद्धतिं प्रति किं भवान्मन्यत इति ।

अकम्पनः— अस्माकमिति अत्रभवान् वक्तुमर्हति, न त्वस्मन्महाराजस्येति ।

अमात्यः— न । न तन्न्याय्यं, न तद्धर्म्यम् । तत्तस्मादुपपादयिष्यते यदुपपादनीयम् । अधुना तु मम कुतूहलं निवर्तयतु भवान् ।

अकम्पनः— दर्शरात्रिमपेक्ष्य पूर्णिमासरात्रेः विधवामपेक्ष्य सुमङ्गल्याः, ऊषरमपेक्ष्य उर्वरायाः, रुग्णमपेक्ष्य स्वस्थस्य हृष्टपुष्टाङ्गस्य, यो विशेषः, स विशेषः अस्य देशस्य देशान्तराण्यपेक्ष्य दृश्यते ।

अमात्यः— कथम् ? किञ्चिद्विवृत्य वक्तुमर्हति भवान्, यथा सभासदः सर्वे सम्यक् बुध्येरन् ।

अकम्पनः – अन्यत्र सर्वं अग्निदग्धमिव दृश्यते– नीरसं, रूक्षं, अरम्यं दृशोः । मनुष्याः अशान्ताः, आतुराः, निस्स्नेहाः, स्वार्थपराः । अनृतवादः, चौर्यं, हिंसा, कलहः, स्पर्धा, असूया इतीमानि पापानि प्रायः सर्वत्र निस्सङ्कोचं क्रियमाणानि दृश्यन्ते । भवद्राष्ट्रे पुनः न तथा । इह प्रविष्टमात्रस्य सर्वाणि इन्द्रियाणि प्रीयन्ते । शीतो वातः । वृक्षा बहुशाखाः, पल्लवाः, उन्नताः फलिनश्च । परितो जलानि स्वच्छानि स्वादूनि च । जनाः निश्चिन्ताः, शान्ताः, विनीताः, मिथोऽनुरागिणः । अधर्मवैमुख्यं धर्मप्रावण्यं च सर्वेषु दृश्यते ।

अमात्यः— आर्य, अकम्पन, प्रीयेतमां यन्निर्व्यलीकं भाषसे। भवन्मुखादिमा वाचः शृण्वतो मे नन्दति हृदयम्।

गुरुदत्तः— अत्र अन्यत्र च प्रवर्तमानायां शासनपद्धतौ विशेषं अमात्यप्रभुरप्राक्षीत्। अत्रभवान् पुनः स्थावरजङ्गमानां विशेषं वर्णयति।

अमात्यः— नैवमार्य, गुरुदत्त। प्रश्नस्य यदुत्तरं वाच्यं तदेवार्य ब्रवीति।

गुरुदत्तः— कथम्? न वयमवगच्छामः। दयतां प्रभुः।

अमात्यः— भवतामुपकर्तुमहं सर्वदा सज्जः। वदामि, श्रूयताम्। राज्यशासनस्य इदमेकं लक्ष्यं यत् प्रजानां अशनाच्छादनं समृद्धं भवति। सुखं च ताः जीवन्ति। इदं लक्ष्यं यया निष्पन्नं भवति सा शासनपद्धतिः समीचीना। यया न निष्पद्यते, सा असमीचीना। अस्मद्राष्ट्रे तस्य लक्ष्यस्य निष्पत्तिः समग्रा दृश्यते। अन्यत्र सर्वथा नास्ति, इत्ययमाह। ततः परं किं विशिष्य किञ्चिद्वक्तव्यम्।

गुरुदत्तः— अस्मद्राष्ट्रे या शासनपद्धतिः सा समीचीनेति अयं स्ववाचा वदति?

अमात्यः— (सस्मितं) आम्। फलवर्णनेन स्फुटतरं व्यञ्जयति।

अकम्पनः— (स्मितं करोति)

अमात्यः— अतः स मन्ये इतः परं राज्यविपर्ययवार्तां युष्मासु न करिष्यति।

अकम्पनः— तन्न फलति, सचिवोत्तम।

अमात्यः— किं तर्हि फलितम्?

अकम्पनः— अत्रत्यः राज्यशासनप्रकारः समीचीन इत्येतन्मया अभ्युपगतम्। महाराजस्य का आवश्यकता। प्रजा एव कुतः स्वप्रतिनिधिद्वारा राज्यभारं वोढुं नार्हन्तीत्यत्र तु पूर्वाभिप्रायमद्यापि न परित्यक्तवानस्मि। अस्मिन् विषये अत्रभवतः सकाशात् अनल्पं ज्ञातव्यमस्ति।

अमात्यः— भवतु। अनन्तरे समागमे प्रश्नाः क्रियन्ताम्। यथामति समाधास्यामि। परं तु तावत् आर्येण राज्यविपर्ययं प्रति यस्यकस्यापि सविधे यत् किमपि न वक्तव्यमिति प्रार्थये।

---

# प्रकृतिभेदः ॥

— जानासि गोपालम् ?

— आं, जानामि । कुतः पृच्छसि ?

— तस्य सहस्राधिकानि रूप्याणि कुतोऽप्यागतानीति श्रूयते ।

— कामं भवतु । ततः किं तव ?

— मन्ये तवैतद्विदितं यदहमद्य अर्थहेतोः बलवत् पीडितोऽस्मि ।

— आं विदितम्।

— तेन हि गोपालं गत्वा पृच्छ द्वे शते रूप्याणि मह्यं ऋणं दीयताम् । अचिरात् प्रत्यर्पयिष्यामीति ।

— क्षमस्व माम् । नाहं तदुचितं मन्ये ।

— कुतः ?

— तदीयकुटुम्बस्थितिं न वयं जानीमः । व्ययहेतवो बहवः स्युः । बहूनि ऋणानि शोधनीयानि स्युः । अथवा 'आगतं वित्तं तथैव निधौ निधाय रक्षणीयम् । खण्डशो विनियुज्य न विलापनीय'मिति तस्य मतिर्भवेत् । बुद्धिमन्तो हि आपत्काले उपकरिष्यतीति धनस्य अवशेषणे रक्षणे च जागरूका भवन्ति । तेन वयं चेद्गत्वा अर्थयेमहि धर्मसङ्कटे पतितमात्मानं स मन्येत प्रतिषेद्धुं च अशृण्वन् दातुं चानिच्छन् । किमिति सा दुरवस्था अस्माभिः तस्य उत्पादनीया ?

— किमरे, महान्तमुपन्यासं करोषि ? गत्वा पृच्छ । यदि दास्यति, सम्यक् । न चेत् सम्यक्तराम् । गत्यन्तरान्वेषणमस्त्येव ।

— इदानीमेव गत्यन्तरं पश्य । किमिति तस्य क्लेशो देयः ? आत्मानमेव तावत् स्वयं विमृश । वेतनमादाय गृहं प्रविष्टं

त्वां सुहृदो बान्धवाश्च आगत्य 'इयन्मे देहि', 'तावन्मे देहि' इति यदाऽर्थयन्ते, तदा का ते अवस्था भवति। तस्मादियं प्रवृत्तिरनुचिता। विलम्बासहे अर्थसङ्कटे सति भूषणं वा रजतपात्रं वा निधौ आधाय अपेक्षितं वित्तं गृहाण। स शोभनो मार्गः।

---

# पुस्तकपरामर्शः॥

---

प्रतिराजसूयम्। नाटकम्। कविसार्वभौमबिरुदभाजा श्रीमन्महालिङ्गशास्त्रिणा प्रणीतम्। साहित्यचन्द्रशाला, Tiruvalangadu, Via Narasingampet, Tanjore Dt. अतो लभ्यम्।

मूल्यं 6 रू.

बहूनां काव्यानां कर्ताऽयं कविः प्रसिद्धः। विशिष्य च अस्याः पत्रिकाया वाचकानां सुपरिचितः, यतः तदीयानि बहूनि काव्यानि इह प्रकाशितानि। प्रकाश्यमानानि च सन्ति।

सप्ताङ्केऽस्मिन् नाटके काम्यकवने वसतां पाण्डवानां गन्धर्वराजहृतदुर्योधनप्रत्याहरणवत्सलाभिमन्युपरिणयाख्या कथा रसपरिवाहवत्या रीत्या निबद्धा। निसर्गसिद्धा शास्त्रिणः कवित्ववासना प्रतिवाक्यं प्रतिश्लोकं अभिव्यक्ता दृश्यते।

उदारा भावाः परिपाकवद्भिः पदैराविष्क्रियन्ते। तत्तत्पात्रानुगुणानां प्रौढरमणीयानां उक्तीनां कानिचिदुदाहरणानि दीयन्ते।

कञ्चुकी— हा धिक्। कष्टं खलु प्रभुसेवापारतन्त्र्यं नाम। तथा हि—

गच्छन्नतर्कितमुपेत इवाकुलोऽस्मि
तिष्ठन् विलम्बनमसाम्प्रतमित्यवैमि।
गृह्णन् गिरं प्रतिशिरश्चलनान्यपश्यन्
सञ्जातमन्तुरिव कातरतामुपैमि॥

शकुनिः— अयं कृतघ्नः खलु सर्वतो जनः
सरत्यलं न प्रकृतोपकारिणम्।
प्रशंसति प्रस्खलितानुभावकं
स्थिरानुभावद्युतिमत्यसूयया ॥

अपि च,

भूसुराणामयं धर्मो यत्स्तुवन्त्यन्नदायिनम्।
अद्य चेत्पाण्डवज्येष्ठं श्वस्त्वामन्यं परेद्यवि ॥

दुर्योधनः-- वयस्य, कर्ण, अतिदुर्जनः खल्वसि। कथं सुयोधनं षण्डमिव साहसोपक्रमेष्वपवर्जयसि। मम खलु भीमसेनशोणिताब्धिपारणोत्सुकं निस्त्रिंशबाडवज्योतिः प्रज्वलति।

अर्थकामपरा दृष्टिर्मनोबुद्ध्यात्मनां गुणान्।
जानात्युपायपर्यायान्न स्वतः फलसम्मितान् ॥

इत्यस्मिन् वसुपालोक्तिरूपे श्लोके दृश्यमाना प्रौढिः नूनमद्यतनकव्यन्तररचनासु न द्रष्टुं शक्या।

सुदर्शनः-- जय जय धर्मनन्दन, विभातप्रायेदानीं शर्वरी। तथा हि।

नैशं भित्त्वाऽन्धकारं त्वमिव रिपुकृतानन्तरायाननन्तान्
दिक्पालैः पूर्णकुम्भो धृत इव धुरि ते भानुरेषोऽभ्युदेति।
शैलारोहावरोहक्रमभरविवशस्रंसिनो यस्य पादान्
पद्मिन्यो मर्दयन्ति श्लथकमलदलप्रायलोलाङ्गुलीकाः ॥

सर्वप्रकारमस्य श्लोकस्य सौन्दर्यं कस्य सहृदयस्य मनो न हरेत्।

बहुभ्यो वर्षेभ्यः पूर्वं मद्रनगरस्थसंस्कृतसेवाऽऽश्रमप्रवर्तकैः दत्तपारितोषिकमिदं नाटकम्।

---

याप्पोळि । (யாப்பொளி) द्राविडच्छन्दोग्रन्थः । श्री R. श्रीनिवासराघवाचार्येण शिरोमणिना (M.A.), विरचितः । Sri Venkatesvara Oriental Series- No. 59, S. V. Oriental Institute, Tirupati.

संस्कृतमधीत्य शास्त्रेषु वैदुष्यं सम्पाद्य च ये द्राविडीपरिचये प्रवर्तन्ते तेषां तत्र पाण्डित्यं शोभतेतरामिति तत्त्वमिदं सर्वसम्प्रतिपन्नम् । पूर्वोत्तरमीमांसादिशास्त्रेषु समग्रप्रज्ञः श्री श्रीनिवासराघवाचार्यः द्राविड्यां तादृशमगाधं पाण्डित्यं सम्पाद्य द्राविडभाषासम्बन्धिच्छन्दस्तत्त्वमवजिगमिषूणां अत्यन्तोपकारकस्य ललितरमणीयस्य अस्य ग्रन्थस्य प्रणयनेन तत् सफलीकृतवानित्यभिनन्दनीयमेतत् । अत्रत्यं विशेषं तदीयैरेव वचोभिरावेदयामः ।

யாப்பு என்பது ஒரு சாத்திரம். சாத்திரம் என்பது கூடியவரையில் கட்டுப்பாட்டுக்கு உட்பட்டிருக்கவேண்டும். யாப்பருங்கலக் காரிகை முதலிய பழைய நூல்கள் யுக்திவாதத்திற்கு உகந்த சில கட்டுப்பாடுகள் இன்றியும் யுக்திவாதத்திற்கு ஒவ்வாத சில கட்டுப்பாடுகளுடன் கூடியனவாகவும் இருக்கின்றனவென்று எம் சிற்றறிவு கூறியது. மேலும் அவை எளியவையாயும் இல்லை என்றும் எம் சிற்றறிவு கூறியது. ஆகலின் எளியமுறையில், பொருளற்ற சில பழைய நியமங்களை நீக்கிப் புதிய சில நியமங்களைப் புகுத்தி, இவ் யாப்பொளியென்னும் நூலை இயற்றியுள்ளோம். ஊன்றிப் படித்தறிந்து உண்மையைப் புகட்டுமாறு வாசகர்களைக் கேட்டுக்கொள்கிறோம். பழைய கருத்துக்களினின்றும் மாறுபடும் இடங்களை 'புதியன புகுதல்' என்னும் தலைப்பில் பக்கங்களைக் காட்டிக் குறிப்பிட்டிருக்கிறோம்.

முதலிலிருந்து முடிவு வரை திருவேங்கடவன் திருமண வரலாற்றைச் செய்யுளாய் இயற்றி இந்நூலுக்கு இலக்கியமாய்க் கொடுத்திருக்கிறோம்.

---

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 11

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सदानिसश्चन्ति ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३१] कलि ५०५८ विलम्बि - कर्कट [सं ११

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

JULY, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription    Rs. Two only.
Do. With Sastraic Supplement    Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।
२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)
८. लेखप्रतिलेखेषु अवश्यं स्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

# विषयः ॥

शास्त्रानुबन्धः— श्रीगीतार्थदीपः। २६५–२७२

TIRUPATI

२८९ विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥

हे जनार्दन, 'अर्द गतौ याचने च' जनान् - प्रतिकूलान्, अर्दयति- नरकादि गमयतीति वा जनैः - अनुकूलैः, स्वाभिलषितं याच्यत इति वा जनार्दनः, आत्मनः - स्वस्य, योगं - स्रष्टृत्वादिगुणयोगं, विभूतिं च - नियमनमपि, भूयः विस्तरेण कथय — 'अहं सर्वस्य प्रभवः' इत्यादिना पूर्वं संक्षेपेणोक्तमपि पुनः सविस्तरं ब्रूहि । अमृतं - त्वयोच्यमानं त्वन्माहात्म्यामृतं, शृण्वतः मे तृप्तिः - परितोषः, नास्ति हि, अतः कथयेति पूर्वेण सम्बन्धः ।

ஸர்வஜனங்களாலும் அவரவர் அபேக்ஷித புருஷார்த்தங்களை யாசிக்கப்படுகின்றவரன்றோ தேவரீர். அடியேனுடைய ப்ரார்த்தனையையும் கேட்டருளவேணும். உலகத்தை ஸ்ருஷ்டித்து நியமனம் செய்வது என்பது தேவரீருக்கே உரித்தானது. இப்பெருமையைச் சுருக்கமாக அருளினீர். தேவரீருடைய மாஹாத்ம்யமானது அம்ருதம் போன்றது. தேவரீர் முகத்திலிருந்து அதைக் கேட்கக் கேட்க த்ருப்தி ஏற்படவில்லை. அடியேனுக்கு மேலும் அந்தப் பெருமையை ஸவிஸ்தாரமாக அருளிச் செய்யவேணும். 18

श्रीभगवानुवाच—

३९० हन्त ते कथयिष्यामि विभूतीरात्मनश्शुभाः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥

एवमतृप्त्या पृच्छन्तमर्जुनं प्रति अतिप्रसन्नो भगवांस्तस्याभिजनादिवर्णनमुखेन योग्यतां दर्शयन् विभूतेर्विस्तरेण प्रत्येकं वक्तुं श्रोतुं चाशक्यत्वात् केनचिदुपाधिविशेषेण संगृहीता विभूतीर्वक्ष्यामीत्याह — हे कुरुश्रेष्ठ ! हन्त - हर्षेण, ते - अनसूयुत्वादिगुणपूर्णाय तुभ्यं, आत्मनः - मम शुभाः - कल्याणीः, विभूतीः - नियन्तव्यवस्त्वन्तराणि, विभूतिशब्दो

विभवनकर्मपरः । प्राधान्यतः - उत्कर्षेण, कथयिष्यामि - वक्ष्यामि, मे 'विभूतीनां' इति शेषः, विस्तरस्य, अन्तः - अवधिः, संख्येति यावत्। नास्ति, अतः जगत्युत्कृष्टाः काश्चन विभूतीर्वक्ष्यामि ।

ஸ்ரீ பகவான் அருளியதாவது —

குருவம்ச ச்ரேஷ்டனாகிய அர்ஜுநனே! என்னுடைய திவ்ய மனத்திற்கு விஷயங்களான வஸ்துக்களைத் தனித் தனியே சொல்லுவதற்கும் கேட்பதற்குமியலாது. அவை எல்லையற்றவை. ஆனாலும் அவற்றுள் சிறந்தவைகளான சில மங்கள விபூதிகளை உனக்கு ஸந்தோஷத்துடன் சொல்லுகிறேன். 19

३९१ अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥

'विस्तरेणात्मनो योगं विभूतिं च' इति पृष्टमर्थद्वयं विस्तरेण वक्तुं तस्योत्तरद्वयं सङ्क्षेपेणोच्यते – हे गुडाकेश ! गुडाका - निद्रा, तस्याः ईशः गुडाकेशः, जितनिद्र इत्यर्थः घनकेश इति वा । सर्वभूताशयस्थितः - सर्वेषां भूतानां, जीवानां आशये- हृदये, स्थितः, आत्मा अहम् । अहम् - आत्मतयाऽवस्थितोऽहमेव, भूतानां आदिश्च - उत्पत्तिहेतुश्च, मध्यं च - स्थितिहेतुश्च, अन्त एव च - लयहेतुश्च ।

அர்ஜுநனே! ஸர்வாத்மாக்களுக்கும் அந்தர்யாமியாயிருக்கும் பரமாத்மா யானே. அவற்றைப் படைப்பவனும் காப்பவனும் அழிப்பவனும் யானே. 20

३९२ आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

भगवतस्स्वविभूतिभूतेषु सर्वेष्वात्मतयाऽवस्थानं तत्तच्छब्दसामानाधिकरण्यनिर्देशहेतुरिति 'अहमात्मा' इति पूर्वश्लोके प्रतिपादितम् ; 'आदित्यानामहं विष्णुः' इत्युपक्रम्य 'यच्चापि सर्वभूतानां बीजं तदहमर्जुन' इत्यन्तेन ग्रन्थेन विभूतिविशेषान् सामानाधिकरण्येन व्यपदिशति । अत्र

चोद्दिश्यमानानां पदार्थानां केषाञ्चित्प्राधान्यं प्रत्यक्षम् । केषाञ्चिदागमिकम्, कञ्चिद्व्यवहितम्, कञ्चिन्नीवव्यवहितं च सामानाधिकरण्यम् । आदित्यानां - द्वादशसङ्ख्यासङ्ख्यातानां अदितिपुत्राणां मध्ये, अहं, विष्णुः, विष्णुनामा चरमोत्पन्नोऽहमस्मि ।

> धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
> इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमस्स्मृतः ॥
> ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
> इत्येते द्वादशादित्या इन्द्रस्य पुरतस्स्थिताः ॥

इति पाद्मोत्तरवचनमिहानुसन्धेयम् । ज्योतिषां - प्रकाशकानां मध्ये, अंशुमान् - अतिशयितप्रकाशयुक्तः, रविः, अहं, रविशब्दोऽत्र द्वादशादित्यसाधारणः । मरुताम् - मरुतो वायवः एकोनपञ्चाशद्दितिपुत्राः, येषां सप्तकानि सप्तगणा भवन्ति तेषां मध्ये, मरीचिः, अस्मि, नक्षत्राणां, शशी, अहम्, नक्षत्राणां पतिश्चन्द्रोऽहमस्मि, 'नक्षत्राणां' इतीयं न निर्धारणे षष्ठी, किन्तु भूतानामस्मि चेतना, इत्यादिवक्ष्यमाणस्थलेष्विव सम्बन्धसामान्ये षष्ठी । प्रकृते स्वस्वामिभावरूपसम्बन्धविशेषे सा पर्यवस्यति ।

அதிதியின் புத்ரர்களான பன்னிரண்டு ஆதித்யர்களுக்குள் விஷ்ணுவென்னும் ஆதித்யன் நான். ப்ரகாசம் செய்யுமவற்றினுள் மிக்க ஒளிபொருந்தியதான ஸூரியனாகவுமாகின்றேன். நாற்பத்தொன்பது வாயுக்களில் மரீசி என்னும் வாயுவாக ஆகின்றேன் யான். நக்ஷத்திரங்களுக்குப் பதியான சந்திரன் யானே. 21

३९३ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥

वेदानां - ऋग्यजुस्सामाथर्वणां मध्ये, सामवेदः अस्मि, गीतिप्रधानत्वसहस्रशाखत्वादिना 'सामवेदो ब्राह्मणानां प्रसूतिः', इति श्रुत्या च सामवेदस्योत्कर्षः ; न तु प्रामाण्यतारतम्यात् । देवानां - स्वर्गवासिनां मध्ये, वासवः - इन्द्रः, अस्मि, इन्द्रियाणां - एकादशानां ज्ञानकर्मभेदभिन्नानां

मध्ये मनश्च, अस्मि, भूतानां - चेतनावतां सम्बन्धिनी, चेतना - बुद्धिः, अस्मि। अत्रापि न निर्धारणे षष्ठी, अपि तु सम्बन्धसामान्ये।

வேதங்கள் நான்கில் நான் சிறந்த ஸாமவேதமாகின்றேன். ஸ்வர்க்கத்திலுள்ள தேவர்களுக்குள் தலைவனான இந்திரன் நான். ஞானேந்திரியம் கர்மேந்திரியம் என்கிற பதினொன்று இந்திரியங்களுக்குள் முக்கியமான மனதாகின்றேன். அறிவுள்ள ஆத்மாக்களுடைய அறிவும் யானே யாகின்றேன். 22

२९४ रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुश्शिखरिणामहम् ॥ २३ ॥

रुद्राणाम् - एकादशानां मध्ये शङ्करश्च अस्मि।

'वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः॥
भुवनाधीश्वरश्चैव कपाली च विशांपते।
स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः॥'

इति पाद्मोत्तरोक्तिरनुसन्धेया। यक्षरक्षसां - यक्षाणां राक्षसानां च पतिः वित्तेशः - कुबेरोऽस्मि 'नक्षत्राणामहं शशी' इतिवदिह च षष्ठी। वसूनाम् - अष्टानां मध्ये पावकश्च - अग्निः, अस्मि। आपः, ध्रुवः, सोमः, अध्वरः, अनिलः, प्रत्यूषः, अनलः, प्रभासः, इत्यष्टौ वसवः।

शिखरिणां - शिखरशोभिनां पर्वतानां मध्ये, अहं, मेरुः - प्रशस्तरत्नकाञ्चनादिमच्छिखरयुक्तः मेरुपर्वतः (अस्मि)।

பதினொன்று ருத்ரர்களுக்குள் சங்கரனென்னும் ருத்ரன் நான். யக்ஷர் ராக்ஷஸர் இவர்களுக்கு அதிபதியான குபேரனும் யானே. எட்டு வஸுக்களுள் பாவகனென்னும் வஸு நான் ஆகின்றேன். சிறந்த சிகரங்களோடு கூடிய பர்வதங்களுக் குள் மேரு பர்வதம் யானே 23

२९५ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दस्सरसामस्मि सागरः ॥ २४ ॥

हे पार्थ, पुरोधसां च - पुरोहितानां मध्ये, मुख्यं - प्रधानम्, बृहस्पतिं मां, विद्धि, सेनानीनां - सेनापतीनाम्, अहं, स्कन्दः - देवसेनापतिः, सरसां - स्थास्नुसलिलाशयानां मध्ये, सागरः - समुद्रः, अस्मि।

அர்ஜுனா! புரோஹிதர்களுள் சிறந்தவரான ப்ருஹஸ்பதியாக என்னை அறிவாய். சேனைத்தலைவர்களுள் தேவஸேனாபதியான ஷண்முகன் யான், ப்ரவாஹமின்றிக்கே நிலைநின்றவையான ஜலாசயங்களுக்குள் ஸமுத்ரம் யான். 24

३९६ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥ २५॥

'महर्षीणां' इति ऋषिगणविशेषो विवक्षितः। स च—

'मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वसिष्ठं च भृगुं नारदमेव च॥'

इति मनुना स्मृता दशप्रजापतयः, तेषां मध्ये अहं भृगुः, गिरां - अर्थाभिधायिनश्शब्दा गिरः तासां मध्ये, एकं, अक्षरं - प्रणवः, अस्मि, स हि सर्वोत्कृष्टार्थाभिधायी। 'ओमित्येकाक्षरं ब्रह्म' इति ह्युच्यते। यज्ञानां - हिंसाऽहिंसात्मकानां मध्ये, जपयज्ञः - मन्त्रजपादिरूपो यज्ञः, अस्मि, 'विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः' इति स्मृत्या, हिंसादिप्रसङ्गाभावात् सर्वाश्रमसाधारणत्वात् विधुरादेरपि सिद्धिहेतुत्वाच्च यज्ञान्तरेभ्यो जपयज्ञः प्रशस्ततमः। स्थावराणां - पर्वतमात्राणां मध्ये, हिमालयः—शैलराजः, अस्मि, 'मेरुश्शिखरिणा'मिति पर्वतविशेषाणां पूर्वमुक्तत्वात् वृक्षाणां वक्ष्यमाणत्वाच्च पर्वतसामान्यपरः 'स्थावर' शब्दः।

மஹர்ஷிகளுக்குள் நான் ப்ருகு மஹர்ஷியாகின்றேன். சிறந்த அர்த்தங்களைச் சொல்லுகின்ற சப்தங்களுக்குள் ப்ரணவம் என்னுமோர் அக்ஷரம் யான். யாகங்கள் பலவற்றில் ஜபம் செய்தலாகிய யஜ்ஞமாகின்றேன். பர்வதங்களுக்குள் இமய மலையாயிருக்கின்றேன். 25

३९७ अश्वत्थस्सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथस्सिद्धानां कपिलो मुनिः ॥ २६ ॥

सर्ववृक्षाणां मध्ये अश्वत्थः अस्मि, स एव हि विशेषतः पूज्यः। देवर्षीणां च - देवाश्च ते ऋषयश्च देवर्षयः देवयोनयस्सन्तो मन्त्रदर्शिनो देवर्षयः, तेषां मध्ये नारदः, अस्मि। गन्धर्वाणां मध्ये चित्ररथः - गन्धर्वराजः, अस्मि, सिद्धानां - जन्मसिद्धाणिमाद्यैश्वर्यशालिनां मध्ये, कपिलः मुनिः, अस्मि ।

வ்ருக்ஷங்களினுக்குள் பூஜ்யமான அரசமரமாயிருக்கின்றேன். தேவர்ஷிகளாய் மந்த்ரஸாக்ஷாத்காரம் செய்யுமவர்களுக்குள் நாரதராயிருக்கின்றேன். கந்தர்வர்களில் சித்ரரதன் யான். பிறவி முதல் அஷ்டைச்வர்யஸித்திபெற்றவர்களுக்குள் கபில முனிவன் யான். 26

३९८ उच्चैश्श्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७ ॥

३९९ आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

४०० अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमस्संयमतामहम् ॥ २९ ॥

अश्वानां मध्ये माम्, अमृतोद्भवं - अमृतात् - जलात् उत्पन्नम्, उच्चैश्श्रवसम् - अश्वराजम्, विद्धि - जानीहि, गजेन्द्राणां - दिग्गजानां मध्ये, ऐरावतम् - इरावत्याः अपत्यं गजेन्द्रं, मां विद्धि, अमृतोद्भवत्वं च काकाक्षिन्यायादैरावतेऽप्यन्वेतव्यम्। नराणां च - मनुष्याणां, नराधिपं-राजानं मां विद्धि।

आयुधानां - सुदर्शनाद्यपेक्षयाऽर्वाचीनानामायुधानां मध्ये, अहम् वज्रं - दधीचेरस्थिसम्भवं वज्रं अस्मि, सुदर्शनाद्यपेक्षया वज्रस्य निक-

र्थात् अर्वाचीनायुधपरोऽयमायुधशब्दः। धेनूनां - दोग्ध्रीणां मध्ये, कामधुक् - वसिष्ठस्य सर्वकामानां दोग्ध्री दिव्या सुरभिः, अस्मि, प्रजनः - प्रजनयिता, कन्दर्पश्च - मन्मथः अस्मि, सः मदायत्त इत्यर्थः। सर्पाणां - एकशिरसां सर्पभेदानां मध्ये, वासुकिः - सर्पराजः अस्मि।

नागानां - बहुशिरसां नागभेदानां मध्ये, अनन्तश्च, नागराजः शेषः अस्मि, यादसां - जलजन्तूनां शेषे षष्ठी, न निर्धारणे, तेषां पतिः वरुणः अहमस्मि, पितॄणां मध्ये अर्यमा च - अर्यमा नाम पितृराजः अस्मि, संयमतां - दण्डयतां, यमः - वैवस्वतः, अहम् अस्मि।

குதிரைகளுக்குள் பாற்கடலிலுண்டான உச்சைச்ரவஸ்ஸாக என்னை அறிவாயாக. சிறந்த யானைகளுக்குள் பாற்கடலில் தோன்றிய ஐராவதம் யான். மனிதர்களுக்குள் அரசன் நான் என்று நினைப்பாயாக. 27

ஆயுதங்களுக்குள் யான் வஜ்ராயுதமாகின்றேன். கறவைப் பசுக்களில் வேண்டிற்றெல்லாம் தரும் காமதேனுவாகின்றேன். உலகம் உற்பத்தி பெறுவதற்குக் காரணமாகிய மன்மதன் (நான் இட்ட வழக்கிலிருப்பவன்) நான். ஒரு தலையோடு கூடிய ஸர்ப்பங்களுக்குள் நான் வாஸுகியாயிருக்கிறேன். 28

பற்பல தலைகளோடு கூடிய நாகங்களுக்குள் ஆதிசேஷன் யான். ஜலஜந்துக்களுக்கு அதிபதியான வருணன் யானே. பித்ருக்களில் அர்யமா என்னும் தலைவன் நானே. தண்டிப்பவர்களுக்குள் வைவஸ்வதன் என்ற யமன் யான்! 29

४०१ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥ ३०॥

दैत्यानां - दितिवंश्यानां मध्ये, प्रह्लादश्च अस्मि, कलयतां - कलनं गणनं कुर्वतां, अनर्थप्रस्तुतया गणयतामिति यावत्, तेषां मध्ये अहं कालः मृत्युः अस्मि। 'अहमेवाक्षयः कालः' कालतत्त्वस्य वक्ष्यमाणत्वात् यमस्य च पूर्वमुक्तत्वात् कालतत्त्वात् 'यमाच्चातिरिक्तः' पुरुषविशेष इह

SANSKRIT VIDYA PEETHA TIRUPATI

कालशब्देन विवक्षितः। मृगाणां च मध्ये अहं मृगेन्द्रः - सिंहः अस्मि, पक्षिणां मध्ये वैनतेयश्च - विनतासुतो गरुडः अस्मि। पक्षिषु वैनतेयस्य वेगातिशयात् वेदमयत्वादिना चोत्कर्षः।

அஸுரர்களுக்குள் ப்ரஹ்லாதன் நானே ஆகின்றேன். மரணத்தை அடையச்செய்யுமவர்களுக்குள் ம்ருத்யு என்னும் புருஷன் யானே. மிருகங்களுக்குள் ஸிம்ஹம் நான். பக்ஷி களுக்குள் தேவரூபியான பக்ஷிராஜனும் யானே. 29

४०२ पवनः पवतामस्मि रामश्शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३० ॥

पवतां - अजस्रगमनशीलानां मध्ये, पवनः - वायुः अस्मि। अहं शस्त्रभृतां - शस्त्राणां धारयितॄणां मध्ये रामः - दाशरथिः अस्मि। झषाणां मत्स्यादीनां मध्ये मकरश्च - मकरो नाम जातिविशेषः अस्मि, स्रोतसां स्रवन्तीनां मध्ये जाह्नवी - गङ्गा अस्मि।

எக்காலமும் சென்றுகொண்டேயிருக்குமவற்றிற்குள் வாயுவாக நான் ஆகின்றேன். வில்லாளிகளில் யான் ஸ்ரீராம சந்திரன். மத்ஸ்யம் முதலியவற்றிற்குள் சிறந்த ஜாதியான மகரம் நான். நதிகளுக்குள் நான் கங்கையாகின்றேன். 30

४०३ सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३१ ॥

हे अर्जुन! अहं, सर्गाणां - सृज्यन्त इति सर्गाः सृज्यमानानां वस्तूनां, आदिः - कारणं, अन्तश्च - संहर्ता च, मध्यं चैव - पालयिता च (अस्मि), विद्यानां - शिक्षाव्याकरणादीनां मध्ये, अध्यात्मविद्या - जीवपरमात्मयाथात्म्यविद्या (अस्मि)। अहं, प्रवदतां - जल्पवितण्डादिकुर्वतां सम्बन्धी, वादः - तत्त्वनिर्णयाय प्रवृत्तः वादो नाम कथा (अस्मि)।

Registered No. M 2300.

Book XXXI ॥ श्रीः ॥ No. 12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २१] कलि ५०५८ विलम्बि - सिंह [सं १२

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

AUGUST, 1958

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription **Rs. Two only.**

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणि रूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्यथा प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


---

## विषयः ॥


शास्त्रानुबन्धः— श्रीगीतार्थदीपः। २७३ — २८८

அர்ஜுனா! உலகங்களுக்குப் பிறப்பும் இறப்பும் காப்பும் செய்பவன் யானே. கல்விகளுக்குள் ஆத்மதத்வத்தைப் பற்றிய வேதாந்த வித்யை யாகுகின்றேன். வாதம் செய்பவர்கள் தத்வநிர்ணயத்திற்குச் செய்யும் வாதம் யானே. 32

४०४ अक्षराणामकारोस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥

अक्षराणां अकारः अस्मि - अक्षराणां मध्ये 'अकारो वै सर्वा वाक्' इति बह्वृचोपनिषदि श्रुतः सर्ववर्णानां प्रकृतिः अकारोऽहम्, सामासिकस्य - समाससमूहस्य मध्ये, द्वन्द्वः, स हि उभयपदार्थप्रधानत्वेनोत्कृष्टः, अहमेव, अक्षयः - स्वरूपतोऽनाद्यन्तः, कालः (अस्मि), विश्वतोमुखः - चतुर्मुखः, धाता च - स्रष्टा च अहम्।

அக்ஷரங்களில் அகாரமெனும் எழுத்து யான், ஸமாஸங்களுக்குள் த்வந்த்வம் எனும் ஸமாஸமாகின்றேன். அழிவற்ற நித்யமான காலமும் யானே. உலகத்தைப் படைக்கும் பிரமனும் யானே. 33

४०५ मृत्युस्सर्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥

सर्वहरः - सर्वप्राणहरः, मृत्युश्च - यमादेशकारिप्राणहरणाधिकृतपुरुषविशेषः, यमकालाख्यपुरुषयोरुक्तत्वात्, अहम्, भविष्यतां - उत्पत्स्यमानानां, उद्भवश्च - उत्पत्तिक्रिया च, अहम्, नारीणां - स्त्रीणां मध्ये, श्रीः, कीर्तिः, वाक्, स्मृतिः, मेधा, धृतिः, क्षमा च - लक्ष्मीकीर्तिप्रभृतयो भगवदसाधारणशक्तयश्च अहम्।

அனைவருடைய ப்ராணங்களையும் போக்கும் யம படனை புருஷனும் யானே. உண்டாகவேண்டிய பொருள்களின் உற்பத்தி என்னும் க்ரியையும் யானே. ஸ்திரீகளுக்குள் லக்ஷ்மீ, கீர்த்தி, வாக்கு, ஸ்ம்ருதி, மேதை, த்ருதி, க்ஷமை என்கிற பகவத் பத்னிகளும் யானே. 34

४०६ बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहं ऋतूनां कुसुमाकरः ॥ ३५ ॥

तथा साम्नां - सामवेदानां, बृहत्साम अहमस्मि, सामसु बृहत्साम्न उत्कृष्टत्वं श्रुत्यैव सिद्धम्— 'बृहच्च वा इदमग्रे रथन्तरं च आस्तां ...' इति । छन्दसां - गायत्र्यादिच्छन्दोविशिष्टानां ऋचां, गायत्री - ऋक् अहमस्मि, गायत्र्याश्छन्दसां - मातृत्वेनोत्कर्षः श्रुतिषु छन्दोविचितौ च प्रपञ्चितः । यथा बह्वृचोपनिषदि 'अग्रं वै छन्दसां गायत्री' इति । अहं, मासानां - द्वादशानां मासानां मध्ये, मार्गशीर्षः - वर्षगर्भाधानकालत्वात् मासाधिदेवेषु केशवादिषु प्रथमस्य केशवस्य मासत्वात् व्रतवर्गारम्भकालत्वाच्चातिशयितः मार्गशीर्षाख्यमासः, अस्मि, ऋतूनां - षण्णामृतूनां मध्ये, कुसुमाकरः - पुष्पाणामुत्पत्तिकालः वसन्तः, अस्मि । 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यादिप्रमाणैः पुष्पाणामाकरत्वाच्च वसन्तस्यातिशयः ।

மற்ற வஸ்துக்களுள் சிறந்த வஸ்துவாக நான் ஆகின்றது போலே ஸாமங்களுக்குள்ளும் ப்ருஹத் ஸாம என்னும் ஸாமமாகின்றேன். சந்தஸ்ஸுக்களில் காயத்ரீ என்னும் சந்தஸ்ஸாய் நான். மாதங்களுக்குள் மார்கழி மாதம் நான். ருதுக்களில் சிறந்ததான வஸந்த ருது நானே. 35

४०७ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

छलयतां - छलं कुर्वतां (वञ्चकानां) द्यूतं - अक्षदेवनादिलक्षणम् अस्मि, अनायासेन धर्माविरोधेनाभ्युपगमादेव समस्तधनहरणादेश्शक्यत्वात् अक्षादेरतिशयितत्वम् । अहं, तेजस्विनां - पराभिभवसामर्थ्यशालिनाम्, तेजः - पराभिभवनसामर्थ्यम् अस्मि, जयः - जेतॄणां सम्बन्धी जयो नाम धर्मः, अस्मि, व्यवसायः - व्यवसायिनां उद्योगलक्षणो व्यवसायः, अस्मि, अहम्, सत्त्ववतां - महामनस्कत्वरूपसत्त्वगुणशालिनाम्, सत्त्वं - महामनस्त्वम् अस्मि ।

கபடமார்க்கத்தைப் பின்பற்றுமவர்களுடைய த்யூதமாகிய கபடமார்க்கமாகின்றேன். பிறரைப் பரிபவம் செய்யும் சக்தி வாய்ந்தவர்களுடைய அந்த சக்தி யாமே. ஜயம் பெறுமவர்களுடைய ஜயம் என்னும் குணம் யானாகின்றேன். முயற்சியுடையோர்களுடைய ஸாரமான குணமாகிய முயற்சியாய் நிற்கின்றேன். ஸத்வகுணம் பெற்றவர்களுடைய அந்த ஸத்வ குணமும் யானே. 36

४०८ वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

वृष्णीनां - यादवानां मध्ये, वासुदेवः - वासुदेवशब्दोऽत्र लक्षणया वसुदेवगृहे चतुर्भुजतयाऽवतारप्रभृति प्रसिद्धमतिशयं लक्षयति । तस्य चार्जुने सत्यभिधानं दृष्टान्तार्थम् । वसुदेवकुमारत्वेऽपि अतिमानुषगुणविग्रहाद्यतिशयसम्पन्नोऽहम् अस्मि, पाण्डवानां - पाण्डुपुत्राणां मध्ये, धनञ्जयः - अर्जुनस्त्वमेव (अस्मि) अहम् । मुनीनामपि - मननेनार्थयाथार्थ्यदर्शिनां मध्ये, व्यासः - 'वेदविद्भगवान् कल्की' इति विभवावतारतया परिगणितः 'सहोवाच व्यासः पाराशर्यः' इति श्रुतिप्रसिद्धः व्यासमहर्षिः (अस्मि), कवीनां - क्रान्तदर्शिनां मध्ये, उशना कविः - शुक्राचार्यः, 'उशनसो विपश्चित्सु वैलक्षण्यं नीतिनिपुणत्वादिभिः' (अस्मि)

யாதவர்களுக்குள் வாஸுதேவகுமாரனை பரமபுருஷன் யானேயாகின்றேன். பாண்டுபுத்ரர்களுக்குள் ப்ரஸித்தனான அர்ஜுனனாகிய நீயே நான் ஆகின்றேன். யுக்திகளைக்கொண்டு வேதார்த்தநிர்ணயம் செய்யுமவர்களுக்குள்ளும் சாரீரக சாஸ்த்ர ப்ரவர்த்தகரான வ்யாஸபகவானாகின்றேன். சிறந்த ஞானிகளுக்குள் நீதிநிபுணரான சுக்ராசார்யர் யானே. 37

४०९ दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥

दमयतां - यथापराधदण्डानां सम्बन्धी, दण्डः - अदान्तानां दमनकारणं दण्डः अस्मि, जिगीषतां - जेतुमिच्छतां, नीतिः - जयोपायभूतो बुद्धिविशेषः अस्मि, गुह्यानां - गोप्यानां सम्बन्धि मौनं चैव - वाङ्नियमनरूपं मौनम्, अस्मि, मौनस्य चाषट्कर्णमन्त्रणादपि गोपनोपायत्वं सम्प्रतिपन्नम्, अहम्, ज्ञानवतां - ज्ञानशालिनां सम्बन्धि ज्ञानं पुरुषार्थौपयिकातिशयितज्ञानम् (अस्मि)।

அடக்குமுறையைக் கைக்கொண்டவர்களுடைய தண்டனை என்னும் உபாயமாகின்றேன். ஜயம் பெற விரும்புமவர்களுக்கு ஜயத்திற்கு உபாயமான புத்திவிசேஷமாகின்றேன். மறைக்கவேண்டுமவற்றில் மௌனமாகிய சிறந்த உபாயமாகின்றேன். ஞானிகளுடைய மோக்ஷோபாயமான சிறந்த ஞானமும் யானே. 38

४१० यथापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥ ३९॥

हे अर्जुन! सर्वभूतानां - तत्तत्कार्यावस्थावस्थितानां सर्वेषां द्रव्याणां, यथापि - प्रतीयमानं अनुमानादिवेद्यं च बीजं - उपादानद्रव्यम्, यच्चापि - प्रतीयमानं अनुमानादिवेद्यं च यत्, तत् अहम्, चराचरं - जङ्गमस्थावरात्मकम्, भूतं - वस्तुजातम्, मया विना - आत्मतयाऽवस्थितेन मया विना (मदनात्मकम्) यत् स्यात्, तत् - वस्तु, नास्ति, 'अनेन सर्वस्यास्य सामानाधिकरण्यनिर्देशस्यात्मतयाऽवस्थितिरेव हेतुरिति प्रकटयति' क्वचित्क्वचिद्द्रव्यव्यतिरिक्तैस्सामानाधिकरण्यमपि तदाश्रयद्रव्यस्य भगवच्छरीरत्वनिबन्धनम्।

ஹே அர்ஜுனா! ப்ரத்யக்ஷத்தாலும் அநுமானம் முதலியவற்றாலும் ஒவ்வொரு கார்யவஸ்தையிற்கும் உபாதானகாரணமென்று சொல்லப்படும் த்ரவ்யமானது யானே. எல்லாவற்றிலுமிருக்கும் நானே ஆத்மா. அவை எனது சரீரம். ஆத்மாவாகிய என்னைத் தவிர்த்து ஸ்வதந்த்ரமான பொருள் ஒன்றும் கிடையாது. சராசரமென்கிற ஜங்கமஸ்தாவரமனைத்தும் எனக்குப் பாரதந்த்ரமானது. ஸ்வதந்த்ரமன்று. 39

४११ नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

हे परन्तप - शत्रुतापन, मम दिव्यानां - कल्याणीनां, विभूतीनां - नियन्तव्यानां, अन्तः - इयत्ता, नास्ति, मया एषः विभूतेः विस्तरस्तु, उद्देशतः - एकदेशतः, प्रयोजकाकारैः विभूत्युद्धारेण, प्रोक्तः - प्रकर्षेणोक्तः ।

அர்ஜுனா! என்னுடைய மங்களவிபூதிகளுக்கு எல்லை இல்லை. ஆகிலும் விபூதியின் விஸ்தாரத்தை உனக்குச் சுருக்க
மாகச் சொன்னேனத்தனை. 40

४१२ यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥ ४१ ॥

अनुक्तानामवश्यवक्तव्यप्रधानविभूतीनां संग्रहाभिप्रायेणोपसंहरति— यद्यत्, सत्त्वं भूतजातम्, विभूतिमत् - ईशितव्यसम्पन्नम्, श्रीमत् - कान्तिमत्, ऊर्जितमेव वा - कल्याणारम्भेषूद्युक्तमेव वा, ऊर्जाशब्दो ह्यदीनत्वेन सन्नाहशीलत्वपरः, विभूतिमत् इत्यादि बलादिमतामुपलक्षणम् । तत्तदेव, भूतजातम्, मम - अचिन्त्यशक्तेः, तेजोंशसम्भवं - तेजसोंशस्सम्भवो यस्य तत्तेजोंशसम्भवम्, तेजः पराभिभवनसामर्थ्यम् - तच्च नियमनशक्तिः - अंशः - एकदेशः, नियमनशक्त्येकदेशसम्भवमिति यावत्- (इति) त्वम्, अवगच्छ - विजानीहि, 'यथा शैलान्दोलनदोहलिनश्चण्डमारुतस्य तृणप्रेरणादिकं वेगलेशमात्रभवम्, तद्वदिहेति भावः ।'

உலகில் யாதொரு வஸ்துவானது மஹிமையுள்ளதாகவோ அழகுள்ளதாகவோ, வலிமையுள்ளதாகவோ, மங்கள காரியங்களில் முயற்சியுள்ளதாகவோ இருக்கின்றதோ அதெல்லாம் என்னுடைய நியமன சக்தியின் சிறிதம்சத்தால் தோன்றியது
என நீ அறிவாயாக. 41

४१३ अथवा बहुनैतेन किं ज्ञानेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

इति श्री भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम
दशमोऽध्यायः ।

---

'प्राधान्यतः' इत्युपक्रान्तमुपसंहृतं 'यद्यत्' इति पूर्वश्लोकेन ; अथ संक्षेपेण प्रधानाप्रधानसमस्तविभूतिसंग्रहमाह— अथवा, हे अर्जुन, तव, बहुना - अनेकपदार्थविषयकेण, एतेन - उक्तिपर्यवसानरहितेन, ज्ञानेन किम् , विभूतिपर्यवसानज्ञानरूपं प्रयोजनं न सिद्ध्येत् । किंशब्दः क्षेपार्थकः । अहं, इदं - चिदचिदात्मकम्, कृत्स्नं - कार्यावस्थं स्थूलं कारणावस्थं सूक्ष्मं च समस्तं जगत्, एकांशेन - नियमनसामर्थ्यैकदेशलवमात्रेण, 'अंश' शब्दः 'तेजोंऽशसम्भवम्' इत्यनेनैकार्थ्यात् नियमनशक्त्येकदेशपरः, 'एक'शब्दोऽत्यातिक्षुद्रत्वपरः । विष्टभ्य - विशेषतः स्तम्भनं कृत्वा, स्तम्भनमत्र स्ववशीकरणरूपमधिष्ठानम् । स्थितः (अस्मि)।

इति श्री गीतार्थदीपे दशमोऽध्यायः ।

---

அர்ஜுநா, ப்ரதாநமும் ப்ரதாநமல்லாததுமான விபூதிகளைச் சொல்லிமுடிக்க இயலாது. விபூதிகளனைத்தையும் பற்றிய அறிவு உனக்கு ஏற்படவும் மாட்டாது. அறியவேண்டியதற்கும் அறிவிற்கும் எல்லையில்லை. சுருக்கச் சொல்லுகிறேன் கேள், ஸ்தூலமும் ஸூக்ஷ்மமும் எனப்படும் கார்யமும் காரணமுமான சேதநாசேதந ப்ரபஞ்சமனைத்தையும் என்னுடைய நியமன சக்தியின் லவலேசமாத்ரத்தினாலே என் வசமாக்கி ஆள்கின்றேன் யான். 42

பத்தாவது அத்யாயம் முற்றிற்று.

---

# अथ एकादशोऽध्यायः ।

अर्जुन उवाच—

४१४ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥

एवं भक्तियोगनिष्पत्तये तद्विवृद्धये च कल्याणगुणगणेन सह भगवतस्सर्वात्मत्वं कृत्स्नस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वं चोक्तम् । तथाभूतं भगवन्तं साक्षात्कर्तुकामोऽर्जुन उवाच—

मदनुग्रहाय - मोहितस्य ममानुग्रहैकप्रयोजनाय, परमं गुह्यं उत्तमं रहस्यम्, अध्यात्मसंज्ञितम् - आत्मनि प्रतिपादकत्वेनाधिवसनाद्वचोऽध्यात्मसंज्ञितम् - ईदृशं यत् वचः त्वया उक्तम्, तेन मम अयम् मोहः आत्मविषयः विगतः - विशेषेण गतः , अपुनरङ्कुरं विनष्टः ।

ஆர்ஜுனன் பகவானுடைய விச்வரூபத்தைக் காணவிரும்பியவனைச் சொன்னதாவது— ஆத்மவிஷயத்தில் மோஹம் கொண்ட அடியேனை அனுக்ரஹம் செய்வதற்கென்றே இதுவரையிலும் ஆத்மாவைப்பற்றிய உபதேசம் செய்தருளினீர். அதனால் என் மோஹமனைத்தும் அறவே ஒழிந்தது. 1

४१५ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥

हे कमलपत्राक्ष - कमलस्य पत्रं कमलपत्रं तद्वत् अक्षिणी यस्य सः, हे पुण्डरीकाक्ष ! त्वत्तः - त्वत्सकाशात्, भूतानां - त्वद्व्यतिरिक्तानां सर्वेषां भूतानां, भवाप्ययौ - भवः - उत्पत्तिः, अप्ययः - प्रलयः तौ, मया विस्तरशः श्रुतौ हि, (तव) अव्ययं - नित्यं, माहात्म्यमपि च - महात्मनः भावः माहात्म्यम् - सर्वचेतनाचेतनवस्तुशेषित्वादिकम्, श्रुतं हि, 'हि'शब्दो वक्ष्यमाणदिदृक्षाद्योतनार्थः ।

997

தாமரைக்கண்ணா! ப்ரபஞ்சத்தின் உத்பத்தி லயங்களை உம்மிடமிருந்து யான் விஸ்தாரமாகக் கேட்டேன். ஸர்வ ஸ்வாமியாயும் கல்யாணகுணங்களையுடையவராயுமிருக்கும் தேவரீருடைய மஹிமையையும் கேட்டாய்விட்டது. 2

४१६ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥

हे परमेश्वर, परमात्मत्वादिगुणशालिन्, पुरुषोत्तम आश्रिते दोषानादररूपनिरतिशयपौरुषाश्रय, त्वम्, आत्मानम् यथा - येन प्रकारेण, आत्थ कथयसि, एतत् एवम् नान्यथा ते ऐश्वरं - सर्वप्रशासितृत्वादीश्वरस्वभावविशिष्टं रूपं - वैष्णवं प्रकारमसाधारणम्, द्रष्टुं साक्षात्कर्तुम् इच्छामि-अभिलषामि ।

ஸர்வ நியந்தாவும் ஆச்ரிதவத்ஸலருமான கண்ணனே! தேவரீரைப்பற்றி அருளிச்செய்த மஹிமை எல்லாம் உண்மை தான். தேவரீருடையதான ஈச்வரத்தன்மை பொருந்திய ரூபத்தை நேரில் கண்ணால் காண விரும்புகின்றேன். 3

४१७ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

प्रभो, समर्थ, योगेश्वर - योगः - ज्ञानादिकल्याणगुणयोगः, तस्य ईश्वर - आश्रयभूत, मया, तत् - ऐश्वरं रूपं, द्रष्टुं - साक्षात्कर्तुम् शक्यम्, इति यदि मन्यसे - चिन्तयसि यदि, ततः - तस्मात्, मे - मह्यम्, आत्मानं त्वाम्, अव्ययं - अविकलं यथा तथा, दर्शय ।

ஜ்ஞானாதி கல்யாணகுணஸம்பன்னரும் ஸமர்த்தருமான கண்ணபிரானே! தேவரீருடைய அந்த வைஷ்ணவ ரூபத்தை அடியேன் நேரில் ஸேவிக்கலாமென்று திருவுள்ளமிருந்தால் அந்த ரூபத்தைப் பூர்ணமாக அடியேனுக்குக் காட்டியருள வேணும். 4